CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

ऋग्वेदसंहिता

संहिता
12

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वेद -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDI

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri. Funding: MID

ऋग्वेदसंहिता।

द्वितीयभागः।

(अस्मिन् मन्त्राणां व्याख्या समारब्धा)।

श्रीउमेशचन्द्रविद्यारत्न-

सम्पादितः।

"इदमहमनृतात् सत्यमुपैमि"। यजुः।

कलिकाताराजधान्याम्।

६७, शिमुलियावीथिकासंख्यात्

सारस्वतगेहात्

श्रीआशुतोषदासकर्त्तृकप्रकाशितः।

मूल्यं रूप्यकमेकम्।

सर्वस्वत्वं संरक्षितम्।

३८, शिवनारायणदासस्य वीथिस्थितात्

"घोषमेसिनयन्त्रात्

श्रीमन्मथनाथघोषेण मुद्रितः।

श्री ५ को सरकार वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIDL

PRINTED BY MANMATHA NATH GHOSH,
At the GHOSH MACHINE PRESS.
38, Shibnarayan Dass's Lane, Calcutta.

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

ऋग्वेदसंहिता

ब्राह्मणग्रन्थधृतव्याख्यया वेदाचार्य्ययास्कादिकृतनिर्वचनै:

शङ्करीवटहलायुधसायणमहीधरदयानन्दसरस्वती-

प्रभृतिभिः कृतैर्भाष्यै र्दत्तजानुवादै

स्तथा

श्रीउमेशचन्द्रदासशर्म्मविद्यारत्नकृतया

प्रकृतार्थवाहिनीतिनामटीकया

तत्कृतानुवादेन च

समलङ्कृता ।

(With an English translation)

—०—

वर्द्धमानान्तर्गतालमपुरग्रामवास्तव्यस्य अवदान

कल्पतरो र्वैद्यकुलावतंसस्य

माननीयरायवाहादुर-

श्रीवैकुण्ठनाथसेनशर्म्ममहाशयस्य

व्ययेन मुद्रितेयं द्वितीया संख्या ।

दाने कर्णयदेव देवचरितो धर्म्मे च पार्थाग्रजः

कान्तः शान्तजनेषु भीषणमहा भीमश्च दुष्टे तथा ।

छायापादप एव तापितजने वैकुण्ठनाथः स्वयं

तद्दाक्षिण्यगुणेन मुद्रित मिदं खण्डं द्वितीयं त्वृचाम् ॥

कलिकाता-राजधान्याम्

६७ शिमलारथ्यास्थसारस्वतगेहात्

श्रीआशुतोषदासद्वारा प्रकाशिता ।

प्रतिखण्डस्य मूल्यं १)

सर्वस्वत्वं संरक्षितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

294.59212
UME

কলিকাতা।

৩৮ নং শিবনারায়ণদাসের লেনস্থ "ঘোষ-মেসিন প্রেসে"

শ্রীমন্মথনাথঘোষদ্বারা মুদ্রিত।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

[stamp]

ऋग्वेदसंहिता

प्रथमं मण्डलम् ।

प्रथमं सूक्तम् ।

वैश्वामित्रो मधुच्छन्दा ऋषि र्मन्त्रसमाहर्त्ता, छन्दो गायत्री। अग्निर्देवता। आश्विने विनियोगः।

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ १ ऋक्

१। तत्र यास्कनिर्वचनम्—अग्निम् ईळे अग्निं याचामि, ईळिः—अध्येषणा-कर्म्मा पूजाकर्म्मा वा। पुरोहितो व्याख्यातो (पुर एनं दधति २अ)। यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा, द्युस्थानो भवतीति वा, यो देवः सा देवता होतारं ह्वातारं जुहोते र्होता इति और्णनाभः। रत्नधातमं रमणीयानां धनानां दातृतमं। तस्य एषा अपरा भवति।

२। सायणभाष्यम्—अग्निनामकं देवम् ईळे स्तौमि ईड़स्तुतौ इति धातुः, डकारस्य लकारो बह्वृचाध्येतृसम्प्रदायप्राप्तः अज्मध्यस्थडकारस्य लकारं बह्वृचा जगुः। "अज्मध्यस्थढकारस्य ह्लकारं वै यथाक्रमम्"। मन्त्रस्य होत्रा प्रयोज्यत्वात्। अहं होता स्तौमि इति लभ्यते। कीदृशम् अग्निं? यज्ञस्य पुरोहितं, यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति, तथा अग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति। यद्वा—यज्ञस्य सम्बन्धिनि पूर्व्वभागे आहवनीयरूपेण अवस्थितं। पुनः कीदृशं? देवं दानादिगुणयुक्तं, होतारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

ऋत्विजं देवानां यज्ञेषु होतृनामकऋत्विक् अग्निरेव। तथा च श्रूयते—

"अग्निर्वै देवानां होता" इति।

पुनरपि कीदृशं? रत्नधातमं, यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा। अत्र अग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति—

"अथातः अनुक्रमिष्यामः—अग्निः पृथिवीस्थानः, तं प्रथमं व्याख्यास्यामः—अग्निः कस्मात् अग्रणीर्भवति? अग्रं यज्ञेषु प्रणीयते अङ्गं नयति संनममानः "अक्नोपनो भवति" इति स्थौलाष्ठीविः, न क्नोपयति न स्नेहयति त्रिभ्यः आख्यातेभ्यो जायते इति शाकपूणिः। इतात् अक्तात् दग्धात् वा नीतात् स खल्वेतेः अकारम् आदत्ते, गकारम् अनक्तेर्वा दहतेर्वा नोः परः तस्य एषा भवति इति।

अग्निमीले—इति अस्य अयमर्थः—सामान्येन सर्वदेवतानां लक्षणस्य अभिहितत्वात् अनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यम् आकाङ्क्षितम् अतः अनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितः अग्निः प्रथमं व्याख्यास्यते—कस्मात् प्रवृत्तिनिमित्तात् अग्निशब्देन देवता अभिधीयते, इति प्रश्नस्य अग्रणीरित्यादिकम् उत्तरं। देवसेनाम् अग्रे स्वयं नयति इति अग्रणीः। एतदेकम् अग्निशब्दस्य प्रवृत्तिनिमित्तं। तथाच ब्राह्मणान्तरम्—

"अग्निर्देवानां सेनानीः" इति

एतदेव अभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति "अग्निर्मुखं प्रथमो देवतानाम्" इति मन्त्रः। "अग्निर्वै देवानाम् अवमः", इति ब्राह्मणं। तथाच तैत्तिरीया आमनन्ति—"अगिरग्रे प्रथमोदेवतानाम्" इति। "अग्निरवमो देवतानाम्" इति च। वाजसनेयिनस्तु एवम् आमनन्ति—"स वै एषः अग्रे देवतानाम् अजायत, तस्मात् अग्निर्नाम" इति।

यज्ञेषु अग्निहोत्रेष्टिपशुसोमरूपेषु अग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयते इति द्वितीयं प्रवृत्ति-निमित्तम्। सन्नयमानः सम्यक् स्वयमेव प्रह्वोभवन् अङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयति इति तृतीयं प्रवृत्तिनिमित्तं, स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चित्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

"अक्नोपनः" इत्यग्निशब्दं

निर्वक्ति, तत्र न क्नोपयति इत्युक्तेन स्नेहयति। किन्तु काष्ठादिकं रूक्षयति इत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयात् अग्निशब्द निष्पत्तिं मन्यते। इत इण् गतौ इति धातुः, अक्तः अञ्ज व्यक्ति-म्रक्षणकान्ति गतिषु इति धातुः दग्धो दह भस्मीकरणे इति धातुः। नीतो णीञ् प्रापणे इति धातुः। अग्नि-शब्दोहि अकारगकारनिशब्दान् अपेक्षमाण एतिधातोः उत्पन्नात् अयनशब्दात् अकारम् आदत्ते। अनक्ति धातुगतस्य ककारस्य गकारा देशं कृत्वा तमादत्ते। यद्वा दहतिधातुजन्यात् दग्धशब्दात् गकारम् आदत्ते नीरिति नयतिधातुः, स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वा अग्निशब्दो भवति।

यज्ञभूमिं गत्वा स्वकीयम् अङ्गं नयति काष्ठदाहे, हविःपाके च प्रेरयति इति समुदायार्थः तस्य अग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्श-नाय एषा "अग्निमीले" इति ऋग् भवति इति। तामेताम् ऋचं यास्क एवं व्याख्यातवान्। * * * अस्य अयमर्थः ईड़ति धातोः स्तुत्यर्थत्वं प्रसिद्धं। धातूना मनेकार्थत्वम् इति न्याय माश्रित्य याच्ञाऽध्येषणा पूजा अपि तत्र उचित त्वात् तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीये अध्याये—"यद् देवापिः शन्तनवे पुरोहितः" इत्येताम् ऋच मुदाहृत्य "पुर एनं दधति" इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्द्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन पुर एनं दधते इत्यामनन्ति। देवशब्दो दानदीपनद्योतनानाम् अन्यतमम् अर्थम् आचष्टे। यज्ञस्य दाता दीपयिता अयम् अग्नि रित्युक्तं भवति। दीपन-द्योत-नयो रेकार्थत्वे अपि अस्ति धातुभेदः। यद्यपि अग्निः पृथिवीस्थानः, तथापि देवान् प्रति हविर्वहनात् द्युस्थानो भवति *। देवशब्ददेवताशब्दयोः पर्य्यायत्वात् मन्त्रप्रतिपाद्या काचित् अग्निव्यतिरिक्ता देवता न अन्वेषणीया।

होतृशब्दस्य ह्वयतिधातो रुत्पन्नत्वेन देवाना माह्वातारम् और्णनाभ

* वस्तुतस्तु योऽग्निः पृथिवीस्थानः, स एव स्वर्गात् भारतवर्षमागत्य अत्रैव पृथिव्यां भारत-वर्षे तस्थौ, अतएव स नराग्निः "पृथिवीस्थानः"। परन्तु यो जड़ाग्निः देवाना माराध्य आसीत्, सोऽपि "द्युस्थानः" इति विशेषणविषयीभूतो नासीत्। भ्रान्तिरेषा सायणस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

ऋत्विजं देवानां यज्ञेषु होतृनामकऋत्विक् अग्निरेव। तथा च श्रूयते—

"अग्निर्वै देवानां होता" इति।

पुनरपि कीदृशं? रत्नधातमं, यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा। अत्र अग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति—

"अथातः अनुक्रमिष्यामः—अग्निः पृथिवीस्थानः, तं प्रथमं व्याख्यास्यामः—अग्निः कस्मात् अग्रणीर्भवति? अग्रं यज्ञेषु प्रणीयते अङ्गं नयति संनममानः "अक्नोपनो भवति" इति स्थौलाष्ठीविः, न क्नोपयति न स्नेहयति त्रिभ्यः आख्यातेभ्यो जायते इति शाकपूणिः। इतात् अक्तात् दग्धात् वा नीतात् स खल्वेतेः अकारम् आदत्ते, गकारम् अनक्तेर्वा दहतेर्वा नीः परः तस्य एषा भवति इति।

अग्निमीले—इति अस्य अयमर्थः—सामान्येन सर्वदेवतानां लक्षणस्य अभिहितत्वात् अनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यम् आकाङ्क्षितम् अतः अनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितः अग्निः प्रथमं व्याख्यास्यते—कस्मात् प्रवृत्तिनिमित्तात् अग्निशब्देन देवता अभिधीयते, इति प्रश्नस्य अग्रणीरित्यादिकम् उत्तरं। देवसेनाम् अग्रे स्वयं नयति इति अग्रणीः। एतदेकम् अग्निशब्दस्य प्रवृत्तिनिमित्तं। तथाच ब्राह्मणान्तरम्—

"अग्निर्देवानां सेनानीः" इति

एतदेव अभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति "अग्निर्मुखं प्रथमो देवतानाम्" इति मन्त्रः। "अग्निर्वै देवानाम् अवमः", इति ब्राह्मणं। तथाच तैत्तिरीया आमनन्ति—"अग्निरग्रे प्रथमोदेवतानाम्" इति। "अग्निरवमो देवतानाम्" इति च। वाजसनेयिनस्तु एवम् आमनन्ति—"स वै एषः अग्रे देवतानाम् अजायत, तस्मात् अग्निर्नाम" इति।

यज्ञेषु अग्निहोत्रेष्टिपशुसोमरूपेषु अग्रं पूर्वदिग्वर्त्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयते इति द्वितीयं प्रवृत्ति-निमित्तम्। सन्नयमानः सम्यक् स्वयमेव प्रह्वोभवन् अङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविःपाके च प्रेरयति इति तृतीयं प्रवृत्तिनिमित्तं, स्थूलाष्ठीविनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चित्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

"अक्नोपनः" इत्यग्निशब्दं

निर्वक्ति, तत्र न क्नोपयति इत्युक्तेन स्नेहयति। किन्तु काष्ठादिकं रूक्षयति इत्युक्तं भवति। शाकपूणिनामको निरुक्तकारो धातुत्रयात् अग्निशब्द निष्पत्तिं मन्यते। इत इण् गतौ इति धातुः, अक्तः अञ्ज व्यक्ति-म्रक्षणकान्ति गतिषु इति धातुः दग्धो दह भस्मीकरणे इति धातुः। नीतो णीञ् प्रापणे इति धातुः। अग्नि-शब्दोहि अकारगकारनिशब्दान् अपेक्षमाण एतिधातोः उत्पन्नात् अयनशब्दात् अकारम् आदत्ते। अनक्ति धातुगतस्य ककारस्य गकारा देशं कृत्वा तमादत्ते। यद्वा दहतिधातुजन्यात् दग्धशब्दात् गकारम् आदत्ते नीरिति नयतिधातुः, स च ह्रस्वो भूत्वा परो भवति। ततो धातुत्रयं मिलित्वा अग्निशब्दो भवति।

यज्ञभूमिं गत्वा स्वकीयम् अङ्गं नयति काष्ठदाहे, हविःपाके च प्रेरयति इति समुदायार्थः तस्य अग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्श-नाय एषा "अग्निमीले" इति ऋग् भवति इति। तामेताम् ऋचं यास्क एवं व्याख्यातवान्। * * * अस्य अयमर्थः ईड़ति धातोः स्तुत्यर्थत्वं प्रसिद्धं। धातूना मनेकार्थत्वम् इति न्याय माश्रित्य याच्ञाऽध्येषणा पूजा अपि तत्र उचित त्वात् तदर्थतया व्याख्याताः। पुरोहितशब्दो द्वितीये अध्याये—"यद्‌ देवापिः शन्तनवे पुरोहितः" इत्येताम् ऋच मुदाहृत्य "पुर एनं दधति" इति व्याख्यातः। तैत्तिरीयाश्च पौरोहित्ये स्पर्द्धमानस्य पश्वनुष्ठानं विधाय तत्फलत्वेन पुर एनं दधते इत्यामनन्ति। देवशब्दो दानदीपनद्योतनानाम् अन्यतमम् अर्थम् आचष्टे। यज्ञस्य दाता दीपयिता अयम् अग्नि रित्युक्तं भवति। दीपन-द्योत-नयो रेकार्थत्वे अपि अस्ति धातुभेदः। यद्यपि अग्निः पृथिवीस्थानः, तथापि देवान् प्रति हविर्वहनात् द्युस्थानो भवति *। देवशब्ददेवताशब्दयोः पर्य्यायत्वात् मन्त्रप्रतिपाद्या काचित् अग्निव्यतिरिक्ता देवता न अन्वेषणीया।

होतृशब्दस्य ह्वयतिधातो रुत्पन्नत्वेन देवाना माह्वातारम् और्णनाभ

* वस्तुतस्तु योऽग्निः पृथिवीस्थानः, स एव स्वर्गात् भारतवर्षमागत्य अत्रैव पृथिव्यां भारत-वर्षे तस्थौ, अतएव स नराग्निः "पृथिवीस्थानः"। परन्तु यो जड़ाग्निः देवाना माराध्य आसीत्, सोऽपि "द्युस्थानः" इति विशेषणविषयीभूतो नासीत्। भ्रान्तिरेषा सायणस्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

नामक सु सुनि जुं होतिधातो रुत्पन्नो होतृशब्द इति मन्यते। अग्नेस्च होतृत्वं होमादिकरणत्वेन द्रष्टव्यम्।

रत्नशब्दो द्वितीयाध्याये—"मघ"मित्यादिषु अष्टाविंशतौ धननामसु पठितः। रमणीयत्वात् रत्नत्वम्। दधातिधातुः अत्र दानार्थवाचीति। तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम्।

अथ व्याकरणक्रिया उच्यते—अगिधातोर्गत्यर्थात् "अङ्गेर्नलोपश्च" इत्युणादिसूत्रेण नि-प्रत्ययः।†

२। दयानन्दभाष्यम्—पदार्थः—अग्निं परमेश्वरं भौतिकं वा।

"इन्द्रं मित्रं वरुण मग्निमाहुः, अथो दिव्यः स सुपर्णो गरुत्वान्।
एकं सत् विप्रा बहुधा वदन्ति, अग्निं यमं मातरिश्वान माहुः॥ १म।१६४।४६
अनेन एकस्य सतः परब्रह्मणः इन्द्रादीनि बहुधा नामानि सन्तीति वेदितव्यम्।

तदेवाग्नि स्तदादित्य स्तद् वायु स्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः॥ यं—३२अ।१क

यत् सच्चिदानन्दादिलक्षणं ब्रह्म, तदेवात्र अग्न्यादिनामवाच्यमिति बोद्धव्यम्। ब्रह्म, ह्यग्निः। शं—१।४।२।११। आत्मा वै अग्निः। शं—१।२ ३।२।

अत्र अग्निर्ब्रह्मात्मनो वाचकोऽस्ति। अयं वै अग्निः प्रजाश्च प्रजापतिश्च। शं—८।१।२।४२। अत्र प्रजाशब्देन भौतिकः, प्रजापतिशब्देन ईश्वरश्च अग्नि र्ग्राह्यः। अग्निर्वै देवानां व्रतपतिः। एतत् ह वै देवा व्रतं चरन्ति, यत् सत्यं। शं—१।१।८।२—५। सत्याचारनियमपालनं व्रतं तत्पतिरीश्वरः।

त्रिभिः पवित्रै रपुपोद्धि अर्कं, हृदा मतिं ज्योति रनु प्रजानन्।
वर्षिष्ठं रत्नम् अकृत स्वधाभिः, आदित् द्यावापृथिवी पर्य्यपश्यत्॥ ८।२६।३म।

अत्र अग्निशब्दस्य अनुवृत्तेः प्रजानन् इति ज्ञानवत्त्वात् पर्य्यपश्यत् इति सर्वज्ञत्वात् ईश्वरो ग्राह्यः। अथ यास्कव्याख्या—

अग्रणीः सर्वोत्तमः। सर्वेषु यज्ञेषु पूर्वम् ईश्वरस्य एव प्रतिपादनात् तस्य अत्र ग्रहणं दग्धात् इति विशेषणात् भौतिकस्यापि च। प्रशासितारं सर्वेषा मणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परम्॥ १२२

---

† बहु बाहुल्यत्वात् ग्रन्थाकारवर्द्धनभिया च सायणस्य व्याकरणप्रकरणं परित्यक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

एत मेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। इन्द्र मेकेऽपरे प्राण मपरे ब्रह्म शाश्वतम्॥१२३।१२अ-मनु।

अत्रापि अग्न्यादीनि परमेश्वरस्य नामानि सन्तीति। ईले अग्निं विपश्चितं गिरा यज्ञस्य साधनम् श्रुष्टीवानं धितावानं। ३म।२७।२। विपश्चितम् ईले इति विशेषणात् अग्निशब्देन अत्र ईश्वरो गृह्यते। अनन्तविद्यावत्त्वात् चेतनस्वरूपत्वाच्च।

अन्वयः—अहं यज्ञस्य पुरोहितम् ऋत्विजं होतारं रत्नधातमं देवमग्निमीले।

४। रमानाथघोषसरस्वतीभाष्यम्—पुरोहितं देवानाम् अपेक्षितहोमसम्पादकं पुरोधसं यज्ञस्य देवं दीप्यमानं दानादिगुणयुक्तं वा ऋत्विजं होतारं देवाना माह्वातारं "देवानां यज्ञेषु होता अग्निरेव" इति श्रुतिः। रत्नानां यागफलरूपाणाम् अतिशयेन धारयितारं रत्नधातम मग्निमीले स्तौमि। ईड़धातोर्लट्।

५। रमेशचन्द्रदत्तानुवादः *—अग्नि यज्ञेर पुरोहित एवं दीप्तिमान्; अग्नि देवगणेर आह्वानकारी ऋत्विक्, एवं प्रभूत रत्नधारी, आमि अग्निर स्तुति करि।

अथ टीकाकृतः स्वाभिमतम्—अग्निशब्दस्य व्युत्पत्ति माश्रित्य यास्केन सायणेन च बहु वृथा वाग्जालविस्तारः कृतः। वस्तुतस्तु जलस्थलादिशब्दवत् अग्निरपि कश्चित् रूढ़शब्द इति अनुमीयते। अग्निशब्देन ब्रह्म ईश्वरो वा अवबोधितः स्यादेवं किमपि वेदेषु न दृश्यते। वेदेषु अग्निशब्देन आदिमानवः संसूचितः, जड़ाग्निर्वह्निस्तथा नराग्निश्च अवबोधित इति। "ब्रह्म ह्यग्निः" इति यत् शतपथे अस्ति, तत् लोकपितामहं ब्रह्माण मेव बोधयितुं प्रयुक्तं, न पुनः परमेश्वर मिति। विद्यावत्ता परमेश्वरस्य न, परन्तु नराग्नेरेव आसीत्। "ईश्वरो विद्वान्", "स गणितवित्", इत्थं प्रयोगो न स्यात्, व्यवहारविरुद्धत्वात्। वस्तुतस्तु वेदे कुत्रापि अग्निशब्दः परमेश्वरार्थे प्रयुक्तो नाभूत्। भ्रान्तिरेषा विदुषो दयानन्दस्य। दृश्यते च—

त्वं हि अग्ने अग्निना विप्रो विप्रेण सन्त् सता।
सखा सख्या समिध्यसे॥ १४—४३ सू—८म।

---

* एवं ग्रासम्यानलाडुड्कमोचमूलरादयो बहवः पाश्चात्या अपि मनीषिणो वेदस्य व्याख्यातारः सन्ति,परन्तु ग्रन्थकलेवरवृद्धिभयात् धनाभावाच्च तेषां व्याख्या नात्र गृहीता इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

अस्मिन् मन्त्रे येन विप्रेण अग्निना अग्निः प्रज्वालितः, स खलु नराग्निर्ऋषिः, न तु परमेश्वरो ब्रह्म वा, प्रज्वालितस्तु अग्निरपिवह्नि रिति। तथाहि—

एकं सत् विप्रा बहुधा वदन्ति

एष मन्त्रस्तु द्वापरयुगे पौराणिकभ्रान्त्या केनचित् अर्वाचीनेन ऋषिणा प्रणीत इति। जड़ाग्निरीश्वरः, नराग्निरीश्वरः, अदितिनन्दनः अहल्याजारश्च इन्द्रः ईश्वर, इति न। "भयादस्याग्निस्तपति भयात्तपति सूर्य्यः। भयादिन्द्रश्च वायुश्च" इत्यादि मुण्डकोपनिषद्वचनात् जड़ाग्नेर्नराग्ने जंड़सूर्य्यस्य नरस्य इन्द्रादेश्च ईश्वरत्वं निर्मूलीकृतमिति।

६। प्रकृतार्थवाहिनी टीका—अग्निमील इति। वेदेषु त्रयः अग्नयो विद्यन्ते, एको जड़ाग्निर्वह्निः, द्वौ च नराग्नी इति। हिमेभ्यो देहसंरक्षणात् आदौ सर्वे देवा जड़ाग्नेरुपासका अभवन्। यदुक्तम् ऋचि—सूक्तवाकं प्रथममादित् अग्निमादित् हविरजनयन्त देवाः,स एषां यज्ञो अभवत् तनूपाः। तं द्यौर्वेद तं पृथिवी तमापः" । ८।८८।१० म। नराग्न्योर्मध्ये एक आदिमानवः (७—१२१ सू—१०म) द्वितीयस्तु केषाञ्चित् ब्राह्मणानामादि-पितामहः। (आग्नेया वै ब्राह्मणाः इति श्रुतेः) स च गुणबाहुल्यात् सर्वेषां पूजनीयो बभूव। स एव नराग्निः दैत्य-दानवनिपीड़ितान् वैवस्वतमन्वादिदेवान् पथप्रदर्शनपूर्वकं स्वर्गात् भारतवर्षमानीय अत्रैव भारतवर्षे वसतिं चक्रे। सुरज्येष्ठब्रह्मण आदेशात् स एव भूर्लोक-भारतवर्षात् ऋग्वेदस्य वस्तुसमाहारं कृतवान्। उक्तञ्च छान्दोग्ये "अग्ने ऋचः। अथ कालेन तस्यापि उपासना प्रचलिता अभवत्। अस्मिन् मन्त्रे तयोर्द्वयोरेव जड़नराग्न्यो रेकस्य वा स्तुतिः कृता मन्त्रप्रणेत्रा ऋषिणा, अतो वयमपि अस्य मन्त्रस्य द्वे व्याख्ये कर्त्तुमुत्सहामहे।

प्रथमव्याख्या—जड़ाग्निविषया। अहं मन्त्रप्रणेता ऋषिः पुरोहितं पुरः अग्रे सम्मुखभागे यज्ञकुण्डे हितं (धा+क्त) स्थापितं स्थितमिति यावत् अग्निं प्रज्वलितवह्निं हुताशन मिति यावत् ईले स्तौमि। ईड़् ङल स्तुतौ, ततः लट् ए विभक्तिः। यद्वा यज्ञस्य पुरोहितं यजुर्वेदविद मध्वर्य्यु स्वरूपम्; ऋत्विजं सामवेदविद मुद्गातृस्वरूपं, होतारम् ऋग्वेदविदं याजकं होतृस्वरूपं यज्ञस्य देवं दिव्यति ज्वालया इति देव स्तं यज्ञस्य आराध्यदेवता मग्निं वह्निं स्तौमि। उक्तञ्च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

ऋग्वेदेन होता करोति। १८। यजुर्वेदेन अध्वर्युः। १९। सामवेदेन उद्गाता। २०। सर्वैर्ब्रह्मा। २१। आपस्तम्बपरिभाषासूत्रम् —१म खण्डः। तथाहि—

अध्वर्य्युद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्।
आग्नीध्राद्या धनैर्वार्य्या ऋत्विजो याजकाश्च ते॥ इति।

वस्तुतस्तु स्तोतात्र अतिशयोक्तिच्छलेन तमेव अग्निं "होता", "ऋत्विक्" "पुरोहित" इति विशेषणत्रयेण संसूचितवान्। अभिप्रायस्तु हे अग्ने त्वमेव मे पुरोहितः—"अध्वर्युः"; त्वमेव मे ऋत्विक्—'उद्गाता," त्वमेव मे होता ऋग्वेदविद्-याजक इति, त्वमेव मे सर्वमिति। "होता" देवाना माह्वाता, इति न, वह्नेर्जड़त्वात् इति। पुनरसौ अग्निः किम्भूतः? रत्नधातमः। रत्नं मणिमाणिक्यादि धनं तस्य धातमः पोष्टृतमः (धा धातोः क्विप् ततः तमप्रत्ययः सर्व्वोत्कर्षे) तं रत्नधातमं धनरत्नादिप्रदानसमर्थम् अग्निं वन्दे। वह्नेरुपासनया धनरत्नादिलाभो भवति इति भावः। तथा च पौराणिकाः—"धनमिच्छेद्धुताशनादिति"।

অনুবাদ। আমি আমার সম্মুখবর্ত্তী যজ্ঞকুণ্ডস্থিত এই যজ্ঞাগ্নির বন্দনা করি। তিনি আমার এই অনুষ্ঠীয়মান যজ্ঞের দেবতা, ঋত্বিক্ ও হোতা। অথবা তিনি আমার পুরোহিত বা যজুর্ব্বেদবিৎ অধ্বর্য্যু এবং সামবেদবিৎ ঋত্বিক্ বা উদ্গাতা, ঋগ্বেদবিৎ হোতা। তিনি স্তবে তুষ্ট হইয়া ধনরত্নাদি প্রদান করিয়া থাকেন, তিনি শ্রেষ্ঠ ধনদাতা।

I adore this Fire-god of sacrifice, who is in the sacrificial pit before me, or a priest who knows the yajur-veda. He is the deity, the priest who knows the Sama-Veda and the offerer of oblations (in sacrifices) who knows the Rig-Veda. Pleased with prayers he gives wealth, jewels—he is the chief giver of riches,

द्वितीया व्याख्या। अहं मन्त्रप्रणेता यागकर्त्ता ऋषिः अग्निम् अग्निनामानं महर्षिम् ईळे स्तौमि। कथं नरदेवताग्नेः स्तुतिरियं? यतः स पथप्रदर्शनपूर्व्वकं देवानिह आनीतवान्, तेन च ऋग्वेदस्य ऋचोऽपि समाहृताः, स च पुनः सामवेदीयब्राह्मणानां पूर्वपितामहश्च—"आग्नेया वै ब्राह्मणाः" इति श्रुतेः। स पुनः किम्भूतः? अस्य यज्ञस्य देव आराध्य-देवता ऋत्विक् पुरोहितो होताच। उपासितः स च पुनः रत्नधातमः रत्नानां श्रेष्ठप्रदाता भवेत्। तदुपासनया तस्मिन् प्रसन्ने धनागमश्च स्यादेव इति भावः। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

অথবা, যে মহর্ষি অগ্নিদেব সামবেদীয় ব্রাহ্মণগণের পূর্ব্বপিতামহ, যিনি পথপ্রদর্শন-পূর্ব্বক আদি পিতৃভূমি স্বর্গহইতে দৈত্যদানবগণনিপীড়িত বৈবস্বতমন্বাদি দেবগণকে ভারতবর্ষে আনয়ন করিয়া এখানেই উপনিবিষ্ট হয়েন, এবং যিনি সুরজ্যেষ্ঠ ব্রহ্মার আদেশে ভারতহইতে ঋঙ্মন্ত্রসমূহের সমাহার করিয়া দেন, যিনি অনুগতগণকে ধনরত্নাদি দান করিয়া থাকেন, সেই অগ্নিদেবের উপাসনা করি। ১

Or.

I worship that great sage, the Agni-deva, who is the first progenitor of the Brahmanas of the Samaveda; who showed the way to the Vaivasvata Manu and the other Devas suffering from the oppression of the Daityas and Danavas and brought them from Svarga their original fatherland, to Bharatavarsha and settled down there; who at the command of Brahma, the chief of the Devas, collected the hymns of the Rigveda from Bharatavarsha: and who gives wealth, jewels, &c., to his dependants.

अग्निः पूर्वेभिॠषिभि रीड्यो नूतनैरुत ।
स देवाँ एह वक्षति ॥ २

पदपाठ। अग्निः, पूर्वेभिः, ऋषिभिः, ईड्यः, नूतनैः, उत, सः, देवान्, आ, इह, वक्षति।

१। यास्कनिर्वचनम्—अग्नि यः पूर्वैर्ऋषिभिरीड़ितव्यो वन्दितव्यः, अस्माभिश्च नवतरैः स देवान् इह आवहतु इति। स न मन्येत। अयमेव अग्निः इत्यप्येते उत्तरे ज्योतिषी अग्नी उच्येते। ततो नु मध्यमः। ७५पृ। २खण्ड।

२। सायणभाष्यम्—अयमग्निः, पूर्वेभिः पुरातनैः भृग्वङ्गिरःप्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः, नूतनैरुत इदानीन्तनैरस्माभिरपि स्तुत्यः। सोऽग्निः स्तुतः सन् इह यज्ञे देवान् हविर्भुज आवक्षति। वह प्रापणे इति धातुः आवहतु इत्यर्थः।

३। दयानन्दभाष्यम्—अग्निः परमेश्वरो भौतिको वा। पूर्वेभिः अधीतविद्यैः वर्त्तमानैः प्राक्तनै र्वा विद्वद्भिः ऋषिभिर्मन्त्रार्थ-द्रष्टृभिः अध्यापकैः तर्कैः कारणस्थैः प्राणैर्वा। ऋषिप्रशंसा च एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

भवन्ति। निरु ७।३। इयमेव ऋषीणां प्रशंसा यतस्त एव मुच्चावचैर्महदल्पाभिप्रायैर्मन्त्रार्थैर्विदितैः प्रशंसनीया भवन्ति। तेषामृषीणां मन्त्रेषु दृष्टयः अर्थात् अत्यन्त-पुरुषार्थेन मन्त्रार्थानां यथावत् दर्शनानि ज्ञानानि भवन्ति, तस्मात् ते पूज्याः सत्कर्त्तव्या आसन् इति। साचातक्कतधर्म्माण ऋषयो बभूवुः, ते अवरेभ्यः असाचात्क्कतधर्म्मभ्यः उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तः, अवरे विल्मग्रहणाय इमं ग्रन्थं समाम्नासिषु वेदञ्च वेदाङ्गानि च विल्मं भिल्मं भासनमिति वा। निरु १।२०। कीदृशा ऋषयो भवन्ति? इत्यत्राह—यतः साचात्क्कतधर्म्माणो धार्म्मिका आप्ताः, यैः सर्वा विद्या यथावत् विदिताः, ये अवरेभ्यो ह्यसाचात्क्कतवेदेभ्यो मनुष्येभ्यो उपदेशेन वेदमन्त्रान् मन्त्रार्थांश्च सम्प्रादुः प्रकाशितवन्तः, तस्मात् ते ऋषयो जाताः। तैः कस्मै प्रयोजनाय मन्त्राध्यापनं तदर्थप्रकाशश्च क्कत इत्यत्र उच्यते। उत्तरोत्तरं वेदार्थप्रचाराय ये अवरे अल्पबुद्धयोमनुष्या अध्ययनाय उपदेशाय च ग्लायन्ते तेषां वेदार्थविज्ञानाय इमं नैघण्टुकं निरुक्ताख्यम् च ग्रन्थं समाम्नासिषुः सम्यक् अभ्यासार्थं रचितवन्तः। येन सर्वे मनुष्या वेदं वेदाङ्गानि च यथार्थतया विजानीयुः। एवं क्कपालव ऋषयो गण्यन्ते इति।

पुरस्तात् मनुष्या वा ऋषिषु उत्क्रामत्सु देवान् अब्रुवन् को न ऋषिर्भविष्यति? इति तेभ्यः एवं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूढं। निरु—१३।१२। अत्र तर्क एव ऋषिरुक्तः। अविज्ञाततत्त्वे अर्थे कारणोपपत्तितः तत्त्वज्ञानार्थं मूह स्तर्कः। न्यायं--१।१।४०। या तत्त्वज्ञानार्थोहा सैव तर्कशब्देन गृह्यते। प्राणा ऋषयः। शतं ७।२।१।५। अत्र ऋषिशब्देन प्राणा गृह्यन्ते। ईड्यः नित्यं स्तोतव्यः अन्वेष्टव्यश्च। नूतनैः वेदार्थाध्येतृभिः ब्रह्मचारिभि स्तर्कैः कार्य्यस्थैः विद्यमानैः प्राणैर्वा उत अप्येव स पूर्वोक्तः देवान् दिव्यानि इन्द्रियाणि विद्यादिदिव्यगुणान् दिव्यान् ऋतून् दिव्यान् भोगान् वा। ऋतवो वै देवाः। शं ७।२।२।२६ अनेन ऋतुशब्देन दिव्यगुणविशिष्टा भोगा गृह्यन्ते। आ समन्तात् इह अस्मिन् वर्त्तमाने संसारे जन्मनि वा वच्चति वहतु प्रापयतु।

४। रमानाथघोषसरस्वतीभाष्यम्—अग्निः पूर्वेभिः पूर्वैरुत अपि च नूतनै रिदानीन्तनैः ऋषिभिश्च ईड्यः स्तुत्यः। सः अग्निर्देवान् इह यज्ञे आवच्चति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

आवहतु आनयतु। पूर्वेभिरित्यत्र भिस् ऐसादेशाभावः छान्दसः। बहुलं छन्दसीति सूत्रम्। आवक्षति इत्यत्र वहधातोर्लोड़र्थे छान्दसोलुट्। स्य प्रत्ययगतस्य यकारस्य लोपोऽपि छान्दसः। यद्वा—वह धातोर्लेट् सिप्, बहुलं लेटीति सूत्रेण सिप्, लेटोऽडाटौ इति सूत्रेण अड़ागमश्च। ततस्तिपिति कृते "आवक्षति" इति सम्पद्यते।

५। रमेशचन्द्रदत्तानुवादः—अग्नि पूर्व ऋषिदिगेर स्तुतिभाजन छिलेन। नूतन ऋषिदिगेरओ स्तुतिभाजन; तिनि देवगणके एइ यज्ञे आनयन करुन। २

स्वाभिमतम्—अग्निः देवानाम् आह्वाता आनयनकर्त्ता च इति बहुषु मन्त्रेष्वपि दृश्यते। यदा "वयं मूलत एव भारतवासिनः, स्वर्गाः पारलौकिका देवाश्च इन्द्रादय उपास्या" इति भ्रान्तिर्बद्धमूला, तदैव भ्रान्ता ऋषयः केचित् तादृशान् मन्त्रान् विरेचु रत एते भाष्यकारा निरपराधा इति। परन्तु कथं स्वयमसिद्धो जड़ाग्नि र्देवान् आनयेत् इति न मन्त्रकारै र्भाष्यकारै र्वा चिन्तितं। अग्नौ अपि काचिदधिष्ठात्री देवता विद्यते इत्यन्धविश्वासः खलु एनान् व्यामोहयदिति। वस्तुतस्तु ऋषय एव इन्द्रादीन् देवान् "आगहि," "आगच्छतम्" इत्थं आह्वतवन्तः तत्कथं पुनर्देवानामाह्वान-विधौ जड़ाग्निं नियोजयेयुः? देवा अपि ते इन्द्रादयः पूर्व्वम् अग्न्युपासका आसन्। यदुक्त मृचि—

सूक्तवाकं प्रथम मादित् अग्निमादित् हविरजनयन्त देवाः।
स एषां यज्ञो अभवत् तनूपाः तं द्यौर्वेद तं पृथिवी तमापः ॥८।८८।१०म

अस्मिन् मन्त्रे अन्येषु च बहुषु मन्त्रेष्वपि एवं विद्यते यत् देवा जड़ाग्ने-रुपासका आसन्। तथाहि—

यज्ञेन यज्ञमयजन्त देवाः तानि धर्म्माणि प्रथमाणि आसन्।१६।९०।१०म

अनेनापि देवाना मग्न्युपासना संसूच्यते। अतएव स जड़ाग्निरपरान् कान् देवान् आनेष्यति? वस्तुतस्तु नराग्निरेव पथप्रदर्शनपूर्वकं देवान् मन्वादीन् भारतवर्षमानिनाय। अस्य मन्त्रस्य प्रणेता ऋषिरपि तदुद्दिश्य अस्मिन् मन्त्रे उक्तवान्—

स इह देवान् आवक्षति।

स नराग्निः इह यज्ञे इति न, परन्तु अस्मिन् भारतवर्षे देवान् आवक्षति आवाक्षीत् आनयामास। आ—वह—लुङ् द। तत्र प्रमाणम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने। साम, ऋक्, च। देवो देवेभि रागमत्। ५।१।१म इत्यादयो मन्त्राः किं देवैः सह अग्नेर्भारतागमनं न प्रकटीकुर्वन्ति ?

भाष्यकारा यास्कादयश्च "आवचति" इति पदं वहधातोर्लुप्प्रत्ययेन निष्पन्नम् इतिकृत्य बहु वृथावाग्जालविस्तारं कृतवन्तः, परन्तु भाषाया विकारेण "आवहतु" पदं कदापि "आवचति" आकारम् न गच्छति। आवाक्षीत् इति पदस्य विकारेण एव आवचति पदं सञ्जातमिति।

ऋषयः साक्षात्कारधर्म्माणः सर्वविदः अभ्रान्ताश्च इति न। एवं चेत् तत् कथं बहुषु वेदमन्त्रेषु भ्रान्तिर्दृश्यते ? संशयश्च लक्ष्यते ?

"आत्मा कस्वित् को विद्वांसमुपगात् प्रष्टुमेतत्।" ४।१६४।१म। इत्यत्र किं मन्त्रप्रणेतुरपि अल्पज्ञता न प्रकटीभूता ? वस्तुतस्तु ऋषिप्रशंसाच्छलेन निरुक्ति-प्रशंसामुखेन च यास्कभक्तो दयानन्दो यत् किमपि उक्तवान् तत् सर्व्वं निरर्थकमिति।

অনুবাদ। সামবেদীয়মন্ত্রপ্রণেতা বিশ্বদেব, সাধ্যদেব ও অন্যান্য পূর্ব্বকালীন দেবর্ষিরা এই অগ্নিদেবের আরাধনা করিয়াছেন, ঋগ্বেদীয়মন্ত্রপ্রণেতা নূতন ঋষি আমরাও তাঁহার উপাসনা করিব। তিনি এই ভারতবর্ষে দৈত্যদানবনিপীড়িত মন্বাদিদেবগণকে আনয়ন করিয়াছেন। ২।

Visvadeva, the compiler of the Mantras of the Sama-veda, Sadhyadeva as well as other ancient divine sages have worshipped or adored this Agni. We, the modern sages, the compilers of the Mantras of the Rigveda do also adore or worship Him. It was He who brought Monu and the other Devas to India when they were oppressed by the Daityas and the Danavas.

अग्निना रयि मश्नवत् पोषमेव दिवे दिवे।
यशसं वीरवत्तमम् ॥ ३

१। सायणः—योऽयं होता स्तुत्यः अग्निः तेन अग्निना निमित्तभूतेन यजमानो रयिं धनम् अश्नवत् प्राप्नोति। कीदृशं रयिं ? दिवे दिवे पोषमेव प्रतिदिनं पुष्यमानतया वर्द्धमान मेव नतु कदाचिदपि क्षीयमाणं यशसं दानादिना यशो युक्तं वीरवत्तमम् अतिशयेन पुत्त्रभृत्यादिवीरपुरुषोपेतं, सति हि धने पुरुषाः सम्पद्यन्ते। २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

२। दयानन्दः—अग्निना परमेश्वरेण संसेवितन भौतिकेन संयोजितेन, वा रयिं विद्यासुवर्णाद्युत्तमधनम् अश्नवत् प्राप्नोति। लेट्प्रयोगः व्यत्ययेन परस्मैपदं। पोषम् आत्मशरीरयोः पुष्ट्या सुखप्रदं। एव निश्चयार्थे दिवे दिवे प्रतिदिनं यशसं सर्वोत्तमकीर्त्तिवर्द्धकं, वीरवत्तमं वीराः विद्वांसः शूराश्च विद्यन्ते यस्मिन्, तदतिशयितं वीरवत्तमम्। ३

३। रमानाथः—अग्निना यशोऽस्य अस्तीति यशसं यशोयुक्तं (यशस्+अच्) वीरवत्तमम् अतिशयेन वीरपुरुषोपेतं सति हि धने पुरुषाः सम्पद्यन्ते इतिभावः। रयिं धनं पोषञ्च एव वृद्धिं सम्पद मिति यावत्। दिवे दिवे प्रतिदिनं यजमानः अश्नवत् (अश्+लेट् तिप्) अश्नुयात् प्राप्नुयात्। सायणस्तु पोषं पुष्यमाणतया वर्द्धमानमिति व्याख्यातवान्। ३

४। रमेशचन्द्रः—अग्निद्वारा यजमान धनलाभ करेन, से धन दिन दिन वृद्धि प्राप्त ओ यशोयुक्त हय ओ तद्वारा अनेक वीरपुरुष नियुक्त करा याय। ३

स्वाभिमतम्—अयं पूर्वोक्तः अग्निः अग्निनामा देवः पूर्वेभिः ऋषिभिः पूर्वैः पूर्वजैः सामवेदमन्त्रप्रणेतृभिः विश्वसाध्यदेवप्रभृतिभिः ईड्यः अर्चनीयः तेऽपि अस्य अग्नेरुपासका आसन्, नूतनैः इदानीन्तनैः अस्माभिर्भारतप्रसूतैरपि अभिनवर्षिभि र्ऋग्वेदप्रणेतृभिश्च ईड्यो वन्दनीयः। वयमपि नूतनर्षयः तमग्निदेवमुपास्महे। सः अस्माभिरुपास्यमानः अग्निः इह भारतवर्षे पथप्रदर्शनपूर्वकं (अग्ने नय सुपथा राये अस्मान्) देवान् मन्वादीन् आवक्षति आवाक्षीत् आनयामास। आ—वह—लुङ्+द्। अपभ्रंशोऽयम्।

५। प्रकृतार्थवाहिनी—अग्न्युपासनया किं फलं स्यात् तदेवाह अग्निदेवेन कर्त्ता यजमानः दिवे दिवे दिवा दिवा प्रतिदिनं रयिं धनं पोषं पुष्टिं यशसं यशः, पुंस्त्वं छान्दसं, कीर्त्तिं वीरवत्तमम् अतिशयेन वीर्य्यादियुक्तं पुत्रपौत्रादिकं च अश्नवत् अश्नुयात् प्राप्नुयात्। अयमग्निर्जड़ो नरो वा। ३

অনুবাদ। যিনি অগ্নির উপাসনা করিয়া থাকেন, তিনি প্রতিদিন ধন, পুষ্টি, যশঃ ও বীর্য্যবান্ পুত্রপৌত্রাদি লাভ করেন। ৩

He who adores Agni, gets every day wealth, nourishment, fame and strong or vigorous offspring.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अग्ने यं यज्ञ मध्वरं विश्वतः परिभूरसि।
स इत् देवेषु गच्छति ॥ ४

१। सायणभाष्यम्—हे अग्ने! त्वं यं यज्ञं विश्वतः सर्वासु दिक्षु परिभूः परितः प्राप्तवान् असि, स इत् स एव यज्ञो देवेषु तृप्तिं जनयितुं स्वर्गे गच्छति। प्राच्यादिचतुर्दिगन्तेषु आहवनीय-मार्जालीय-गार्हपत्याग्नीध्रीय-स्थानेषु अग्निरस्ति। परिशब्देन होत्रीयादिधिष्ण्यव्याप्ति विवक्षिता। कीदृशं यज्ञं? अध्वरं हिंसारहितं। नहि अग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति। ४

२। दयानन्दभाष्यम्—पदार्थः—अग्ने परमेश्वर! भौतिको वा यं यज्ञं प्रथममन्त्रोक्तम् अध्वरं हिंसाधर्म्मादिदोषरहितं। ध्वरति हिंसाकर्म्मा तत्प्रतिषेधो निपातः। निरु'। १।८ विश्वतः सर्वतः जलपृथिवीमयानां पदार्थानां विविधाश्रयात्। परिभूः यः परितः सर्वतः पदार्थेषु भवति। "परि" इति सर्वतोभावं प्राह। निरु' १।३। असि अस्ति वा स यज्ञः इत् एव देवेषु विद्वत्सु दिव्येषु पदार्थेषु वा गच्छति प्राप्नोति ॥ ४

अन्वयः—हे अग्ने त्वं यम् अध्वरं यज्ञं विश्वतः परिभूरसि व्याप्य पालकोऽसि तथा अयमग्निरपि संपादयिता अस्ति। स इत् देवेषु गच्छति।

३। रमानाथसरस्वतीभाष्यम्—हे अग्ने त्वं यमध्वरं राक्षसादिकृतहिंसारहितं निर्विघ्नं समाप्तं यज्ञं विश्वतः सर्वासु दिक्षु परिभूरसि परतः प्राप्तवानसि, स इत् एव यज्ञो देवेषु देवान् प्रीणयितुं स्वर्गे गच्छति। अग्निदेवेन सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं न प्रभवन्ति। ४

४। दत्तजानुवाद—हे अग्नि! तुमि ये यज्ञ चारि दिके वेष्टन करिया थाक, से यज्ञ केह हिंसा करिते पारे ना। एवं से यज्ञ निःसन्देहद्र देवगणेर निकट गमन करे। ४

स्वामिमतम्—पूर्वं तावत् स्वर्गवासिन इन्द्रादयो देवा एव अग्नेरुपासका यज्ञानुष्ठातारश्च आसन्। यदुक्तमृचि—

यज्ञेन यज्ञ मयजन्त देवाः, तानि धर्म्माणि प्रथमानि आसन्
ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६।९०।१०म।
तस्मिन्नग्नौ सूक्तवाक्येन देवा हवि विंश्वे आजुहवुः ।७।८८।१०म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

तर्हि स्वर्गस्थै स्तैर्देवैः पूजितः अग्निः तेषामनुष्ठितं यज्ञं कतमेषु स्वर्गेषु कान् वा देवान् प्रापयेत् ? वस्तुतस्तु यदा भौमस्वर्गवासिन स्ते अपारलौकिका इन्द्रादयो देवाः अस्माकम् उपास्याः पारलौकिकाश्च अभवन्, तदैव उपासकानां मनसि एषः अन्धविश्वासः सञ्जातो बभूव यत् यज्ञाग्निः आराधितः सन् तां यज्ञानुष्ठान वार्त्तां स्वर्गस्थान् इन्द्रादीन् देवान् विज्ञापयति, तान् आह्वयति यज्ञस्थले आनयति च। देवाश्च प्रीताः उपासकेभ्यः शुभफलं प्रयच्छन्ति। अतोऽयं मन्त्र इति।

५। प्रकृतार्थवाहिनी—यज्ञशब्दः, अध्वरशब्दश्च एकार्थवाची। उक्तञ्च—अमरेण विदुषा—"यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः।"
अतएव प्राक्तनकवीनामत्र निरङ्कुशतया यज्ञशब्दस्य द्विरुक्ति र्बभूव इति। यद्वा अध्वरशब्दो यज्ञशब्दस्य विशेषण मिति। अध्वरः हिंसारहितः निर्विघ्नं सम्पन्नः।

दम्नोति श्नथति ध्वरति इति त्रयस्त्रिंशत् वधकर्म्माणः। २३१ पृ निघण्टु
ध्वरो वधो हिंसेति यावत् न नास्ति ध्वरो हिंसा यत्र सः "अध्वरः" इति।

हे अग्ने! हे वह्ने! त्वं यमध्वरं हिंसारहितं यज्ञं विश्वतः सर्वतः चतुर्दिक्षु परिभूः प्राप्तवान् असि भवसि, यो यो यज्ञो निर्विघ्नं यथा स्यात् तथा सम्पादितः स्यात्, दैत्यदानवासुरराक्षसादयो यस्य यज्ञस्य विघ्नं जनयितुं न समर्था भवन्ति स यज्ञो भूलोकात् देवेषु देवलोकेषु गच्छति। ४

হে অগ্নে! আমরা তোমার উদ্দেশে যে যে যজ্ঞ সম্পাদন করি, উহারা নির্ব্বিঘ্নে সম্পন্ন হইলে তুমি তাহা প্রাপ্ত হও, ও সেই যজ্ঞই দেবলোকে দেবগণের নিকট গমন করে। অর্থাৎ দেবতারা উহা জানিতে পারিয়া আমাদিগকে উহার ফল দান করেন। ৪

Oh Agni, whatever sacrifices we perform unto thee, thou getest when duly and safely performed and then those sacrifices go unto the gods in the Devaloka (Heaven)—(that is to say it is then only that the gods can know of our sacrifices and give us our due reward therefore.)

अग्निर्होता कविक्रतुः सत्य श्चित्रश्रवस्तमः।
देवो देवेभि रागमत् ॥ ५।१

१। सायणभाष्यम्—अयमग्निर्देवः अन्यैर्देवेभिः सर्वैः हविर्भोजिभिः सह आगमत्, अस्मिन् यज्ञे समागच्छतु। कीदृशोऽग्निः ? होता होम-निष्पादकः, कविक्रतुः। कविशब्दः अत्र क्रान्तवचनो नतु मेधाविनाम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

क्रतुः प्रज्ञानस्य कर्म्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्म्मा वा। सत्यः अनृतरहितः, फलमवश्यं प्रयच्छति, इत्यर्थः। चित्रश्रवस्तमः। श्रूयते इति श्रवः कीर्त्तिः, अतिशयेन चित्रकीर्त्तियुक्तः। कविक्रतुः चित्रश्रवस्तमः, इत्यत्र उभयत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम्। सत्सु साधुः सत्यः। ५

२। दयानन्दभाष्यम्—पदार्थः अग्निः परमेश्वरो भौतिको वा। होता दाता, ग्रहीता द्योतको वा। कविक्रतुः कविः सर्व्वज्ञः, क्रान्तदर्शनो वा। करोति यो येन वा स क्रतुः, कविश्चासौ क्रतुश्च सः। कविः क्रान्तदर्शनो भवति। कवतेर्वा। निरु १२।१३। यः सर्व्वविद्यायुक्तं वेदशास्त्रं कवते उपदिशति स कविरीश्वरः क्रान्तं दर्शनं यस्मात् स सर्व्वज्ञो भौतिको वा। क्रान्तदर्शनः। सत्यः सन्तीति सन्तः, सज्ज्नोहितः, तत्र साधु र्वा। चित्रश्रवस्तमः—चित्र मद्भुतं श्रवः श्रवणं यस्य सः अतिशयितः। देवः स्वप्रकाशः प्रकाशकरो वा, देवेभिः विद्वद्भिः दिव्यगुणैः सह वा आ समन्तात् गमत् गच्छतु, प्राप्तो भवति वा। लुङ् प्रयोगः अड़भावश्च। ५

३। रमानाथसरस्वती—होता देवानाम् आह्वाता कविक्रतुः यज्ञनिष्पादनेन कर्म्मकुशलः, सुन्दरज्ञानविशिष्टो वा। सत्यः कपटरहितः, सत्यस्वरूपः चित्रश्रवस्तमः अतिशयेन विचित्रयशोयुक्तः। देवः अग्निः देवेभिः देवैः सह इह यज्ञे आगमत् आगच्छतु (लेट्)॥ ५

४। दत्तजानुवाद—अग्नि देवगणेर आह्वानकारी सिद्धकर्म्मा, सत्यपरायण ओ प्रभु ओ विविधकीर्त्तियुक्त। सेइ देव देवगणेर सहित एइ यज्ञे आगमन करुन। ५

स्वाभिमतम्—जड़ाग्निर्न होता होमकर्त्ता जड़त्वात्, न च स देवानामाह्वाता वा। वस्तुतस्तु नराग्निर्देव एव पञ्चनदवासिनां सर्वेषां देवानां पुरोहितो होता च आसीत्। उक्तञ्च—

अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम्। ७—२३सू—८म।

अग्निर्ऋषिः पाञ्चजन्यः पुरोहितः। २०—६६सू—९म।

स एव उपद्रुतैः देवैः सह भारतवर्षमाजगाम—ततः पञ्चनदे तेषां कर्षणीनां (चर्षणीनां—ककारस्य चकारत्वं)कृषकाणां पौरोहित्यं होतृत्वञ्च प्राप। उक्तञ्च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्वमग्ने देवेभिर्मानुषे जने। ऋक् १।१६।६ म। सामवेदप्रारम्भश्च।

अग्निर्देवेषु राजति अग्निर्मर्त्येषु आविशन्। ४।२५।५ म।

परन्तु यदा एतत्सर्वं प्रकृतमैतिह्यं स्मरणपथादतीतमभवत् तदैव नराग्नेः पौरोहित्यं होतृत्वं च जड़ाग्नौ समर्पितम्, तथा तस्य भौमस्वर्गात् देवानयनमपि पारलौकिकस्वर्गात् देवानामाह्वाने पर्य्यवसितं बभूव, तेनैव बहुषु मूलमन्त्रेषु भाष्यादिषु च नितरां प्रमादः समागत इति।

प्रकृतार्थवाहिनी—देवः अग्निः भारतवर्षात् ऋग्वेदस्य मन्त्रसमाहर्त्ता भारतीयसामवेदीयब्राह्मणानां पूर्वपुरुषः अग्निनामा देवः देवैः वैवस्वतमन्वादिभिः सह आगमत् अस्मिन् भारतवर्षे आजगाम। आ—गम्—लुङ्। स किम्भूतः? इत्याह—

स होता होमकर्त्ता होमसम्पादयितुं समर्थः, तथा कविक्रतुः क्रतौ यज्ञे यज्ञकर्म्मणि कविः पण्डितः सुदक्षः (कविशब्दस्य पूर्वनिपातः)।

कविर्वाल्मीकिशुक्रयोः, सूरौ (पण्डिते)
काव्यकरे पुंसि। इति मेदिनी।

तथा सत्यः सत्यवान् अनृतपरिशून्यः श्रूयते इति श्रवः कीर्त्तिः चित्रं रमणीयं श्रवः कीर्त्तिर्येषां तेषु अतिशयेन श्रेष्ठः चित्रश्रवस्तमः नितरां कीर्त्तिमान् महायशा इति। ५। १

অনুবাদ। যে অগ্নিদেব হোতা, যজ্ঞদক্ষ, সত্যবান্, মহাযশাঃ, তিনি বৈবস্বতমনুপ্রভৃতি দেবগণ সহ এই ভারতবর্ষে আগমন করিয়াছিলেন। ৫। ১

5. That Agnideva who was a performer of sacrifices, an adept in the art of performing a sacrifice, and who was truthful and greatly renowned came to this India with Vaivasvat Manu and other gods.

यदङ्ग दाशुषे त्व मग्ने भद्रं करिष्यसि।
तवेत् तत् सत्य मङ्गिरः॥ ६

१। सायणभाष्यम्—"अङ्ग" इति अभिमुखीकरणार्थो निपातः। अङ्ग अग्ने हे अग्ने! त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यत् भद्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि, तद् भद्रं तव इत् तवैव सुखहेतुरिति शेषः। हे अङ्गिरः अग्ने ! एतच्च सत्यं न तु अत्र विसंवादः अस्ति। यजमानस्य वित्तादिसम्पत्तौ सत्याम् उत्तरक्रत्वनुष्ठानेन अग्नेरेव सुखं भवति। भद्रशब्दार्थं शाट्यायनिनः समामनन्ति "यत् वै पुरुषस्य वित्तं, तत् भद्रं, गृहा भद्रं प्रजा भद्रं पशवो भद्रमिति।"

अङ्गिरा अङ्गारा इति यास्कः (निः—३।१७)। ऐतरेयिणोऽपि प्रजापति दुहितृध्यानोपाख्याने समामनन्ति—"ये अङ्गाराः आसन्, ते अङ्गिरसः अभवन्" इति। तस्मात् अङ्गिरोनामकमुनिकारणत्वात् अङ्गाररूपस्य अग्ने रङ्गिरत्वम्।

२। दयानन्दभाष्यम्—पदार्थः—यत् यस्मात् अङ्ग सर्वमित्र दाशुषे सर्वस्वं दत्तवते त्वं मङ्गलमय अग्ने परमेश्वर भद्रं कल्याणं सर्वैः शिष्टैर्विद्वद्भिः सेवनीयं भद्रं भगेन व्याख्यातं भजनीयं भूतानामभिद्रवणीयं भवद्रमयति इति वा भाजनवत् वा। (निरु ४।१०) करिष्यसि। करोषि। अत्र वा छन्दसि सर्वे विषयो भवन्तीति लडर्थे लृट्। तव इत् एव तत् तस्मात् सत्यं सत्सु पदार्थेषु सुखस्य विस्तारकं सत्प्रभवं सद्भिर्गुणैरुत्पन्नं अङ्गिरः पृथिव्यादीनां ब्रह्माण्डस्य अङ्गानां प्राणरूपेण शरीरावयवानां चान्तर्य्यामिरूपेण रसरूपः अङ्गिराः तत्सम्बुद्धौ। प्राणो वै अङ्गिराः। शं—६।३।७।३। देहे अङ्गारेषु अङ्गिरा अङ्गारा अङ्कना अञ्चनाः। (निरु ३।१७)। अत्रापि उत्तमानाम् अङ्गानां मध्ये अन्तर्यामी प्राणाख्यः अर्थोगृह्यते। ६

३। रमानाथसरस्वतीभाष्यम्—अङ्ग भो अग्ने ! त्वं दाशुषे हविर्दत्तवते यजमानाय यत् भद्रं कल्याणं करिष्यसि तत् हे अङ्गिरः अग्ने सत्यं तव इत् तवैव। तादृशकल्याणदायकः त्वदन्यो देवोनास्तीति भावः। ६

४। दत्तजानुवाद—हे अग्ने तुमि हव्यदाता यजमानेर ये कल्याण साधन: करिवे, हे अङ्गिरा से कल्याण प्रकृत तोमारइ। ६

स्वाभिमतम्—मन्त्रोऽयमतीव प्राञ्जलार्थ स्तथापि न कोऽपि भाष्यकारः प्रकृतार्थस्यानुगामी अभवत्। कथम् अग्नेः "अङ्गिरः" इति विशेषणं प्रदत्तं, तदपि न केनापि चिन्तितमिति। सायणस्तु ऐतरेयिणां प्रमाण मृदृत्यापि न तदनुसरणं कृतवान्। वस्तुतस्तु अङ्गारेण सह नरस्य अग्नेर्न किमपि सागम्यं विद्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

अग्निस्तु स्वायम्भुवमनोः पुत्रस्य अङ्गिरसो गोत्रप्रभव इति तस्य "अङ्गिरः" इति विशेषणम्। न केनापि विदुषा क्लिष्टं यास्कनिर्वचनं ग्रहीतव्यमिति।

प्रकृतार्थवाहिनी—अङ्ग भो अङ्गिरः अङ्गिरोवंशप्रभव अग्ने अग्निदेव त्वं दाशुषे त्वदुद्देशे हविर्दत्तवते यजमानाय भद्रं शुभं करिष्यसि यस्त्वामुद्दिश्य यजति, त्वं तस्यापि, मङ्गलं करोषि, तस्य हविर्दानादिकं न निष्फलं भवति। तव तत् इत् तदिदं सत्यं ध्रुवम्।

"दाशुषे" दाश्धातोः क्वसुन् दाश्वान्, तस्मै दानकर्त्रे। निपातनात् सिद्धमेतत्। दाश्वान्साह्वान्मीढ्वांश्च (६।१।१२) इति पाणिनिसूत्रम्। ६

অনুবাদ। হে অঙ্গিরোবংশপ্রভব অগ্নে যাঁহারা তোমার উদ্দেশ্যে হবিঃপ্রভৃতি দান করেন, তাঁহারা নিস্ফল হয়েন না, তুমি তাঁহাদের কল্যাণ করিয়া থাক. ইহা সত্যই। ৬

6. O Agni who hast been descended from the Angira family, those who offer libations of ghee (clarified butter) to you, meet with success in their sacrifices. It is really true that you do good to them.

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि ॥ ७

पदपाठः। उप, त्वा, अग्ने दिवा, दिवा, दोषावस्तः, धिया. वयं, नमः, भरन्तः, आ, इमसि। ७

१। उवटभाष्यम्—उप इत्ययम् उपसर्गः। एमसि इत्यनेन आख्यातपदेन सह संबाध्यते। 'इमसि" इति सिद्धे छन्दसि वर्त्तमानार्थे मस् लिटि "इदं तोमसि" इति रूपम्। उपेम उपेयामः उपगच्छामः त्वां हे अग्ने दिवे दिवे अहनि अहनि हे दोषावस्तः! दोषेति रात्रिनाम। वस निवासे रात्र्यां वसनशील। "दोषावस्ताः" तस्य सम्बोधनम् हे दोषावस्तः।

"अग्नी ह वै देवा इत्युपक्रम्य तौ (तेः ?) संगृह्य रात्रिं प्रविवेश" इति। यदनेन इतिहासेन उच्यते, तदयं मन्त्रद्रष्टाह दोषावस्तरिति। धिया बुद्ध्या प्रोक्तं यत मनस्काः श्रद्दधाना वयं नमो भरन्तः, नम इत्यन्ननाम, अन्नं बिभ्रतः उप "आ इमसि" इत्याख्यातपदं व्याख्यातमेव। २२-३अ शुक्लयजुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२। सायणः—हे अग्ने वयम् अनुष्ठातारो दिवे दिवे प्रतिदिनं दोषावस्तः रात्रौ अहनि च धिया बुद्ध्या नमो भरन्तः नमस्कारं सम्पादयन्तः उप समीपे त्वा एमसि त्वाम् आगच्छामः। दोषाशब्दो रात्रिवाची, "वस्तः" इत्यहर्वाची। द्वन्द्व-समासे। नम इति निपातः। "इमसि" इत्यत्र "इदन्तोमसि" इति "मसिः" इत्यादेशो निघातश्च।

३। सायणसामवेदभाष्यम्--सैषा चतुर्थी। मधुच्छन्दा ऋषिः। हे अग्ने (शिष्टम् ऋग्वत्)। एमसि इति "इदन्तोमसि" इत्यनेन इकारः, "तिङः" इति निघातः।

४। महीधरभाष्यम्—तिस्रो गायत्र्य आग्नेय्यो मधुच्छन्दोदृष्टाः। हे दोषावस्तः हे अग्ने दोषा रात्रिः तस्यामपि वसति अजस्रं धार्य्यमाणत्वात् न उपशाम्यति इति दोषावस्ताः। यद्वा अग्नौ हे देवाः इत्युपक्रम्य तैः संगृह्य रात्रिं प्रविवेश इति इतिहासेन अग्ने रात्रौ प्रवेश उक्तः, तमयं मन्त्रे आह। हे दोषा-वस्तः रात्रौ वसनशील गार्हपत्य। दिवे दिवे प्रतिदिनं वयं यजमानाः त्वा त्वा मुप एमसि त्वां प्रत्यागच्छामः। किम्भूता वयं? धिया श्रद्धायुक्तया बुद्ध्या नमो भरन्तः नमस्कारं सम्पादयन्तः। यद्वा नम इत्यन्ननाम, अन्नं इति बिभ्रतः। यजुः ३अ २२।

५। दयानन्दः—उप सामीप्ये त्वा त्वाम् अग्ने सर्वोपास्य ईश्वर दिवे दिवे विज्ञानस्य प्रकाशाय प्रकाशाय दोषावस्तः अहर्निशं दोषेति रात्रिनामसु पठितम् निघं १।७। रात्रेः प्रसङ्गात् वस्त इति दिननामात्र ग्राह्यं। धिया प्रज्ञया कर्म्मणा वा। वयम् उपासकाः नमः नम्रीभावे भरन्तः धारयन्तः आ समन्तात् इमसि प्राप्नुमः।

६। रमानाथः—हे अग्ने नमो नमस्कारं भरन्तः कुर्वन्तो वयं दिवें दिवे अनुदिनं धिया भक्त्या दोषावस्तः रात्रौ प्रकाशमानं त्वा त्वा मुप तव समीपे एमसि एमः आगच्छामः। वस् प्रकाशने तृच्प्रत्ययेन "वस्ताः" इति सिद्धं सायणस्तु दोषा रात्रौ वस्तः अहनि च इति व्याख्यातवान्।

७। दत्तजानुवाद—हे अग्नि! आमरा दिने दिने दिवारात्र मनेर सहित नमस्कारसम्पादनकरतः तोमार समीपे आसितेछि।

स्वाभिमतम्—धीमता सायणेन, "दोषावस्तः रात्रौ अहनि च इति यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

व्याख्यातं, तन्न समीचीन मभूत्। दयानन्दोऽपि अत्र सायण मनुसृत्य न सुष्ठु कृतवान्। यतः कस्मिन्नपि कोषे "वस्तः" शब्दः "अहर्वाची" इति न दृश्यते। निघण्टौ अपि "वस्तोः" इति शब्दः अहःपर्य्याये धृतः इति दृश्यते। निगमस्य सायणमतं खण्डयति—

कुह स्वित् दोषा कुह वस्तो रश्विना। २।४०सू।१०म

मन्त्रेऽस्मिन् दोषाशब्देन रात्रि स्तथा वस्तोःशब्देन च दिवा संसूचितम्। सायणोपि तत्र इत्थं व्याख्यातवान्—

"कुहस्वित् क्वस्वित् दोषा रात्रौ भवथ इति शेषः।
कुह वस्तोः क्व वा दिवा।" तथाहि—

क। तत् सूर्यं रोदसी उभे दोषावस्तोरुपब्रुवे। २१।२५।८म
सायणः—दोषा रात्रौ वस्तोः अहनि च।

ख। अश्वान् दोषावस्तोर्वह्नीयसः प्रपित्वे। १।१०४।१म
सायणः—दोषा रात्रौ वस्तोरहनि च।

ग। एकस्या वस्तो रावतं। २१।११६।१म
सायणः—एकस्या वस्तोः एकस्य अह्नः।

घ। श्वानं वस्तो बोधयितारं। १३।१६१।१म
सायणः—वस्तः—सर्वस्य वासयिता आदित्यः वसेरौणादिकस्तप्रत्ययः, वबयोरभेदात् वत्तं।

ङ। त्वं नः पाहि अंहसो दोषावस्तः दिवा नक्तम् अदाभ्य॥ १५।१५।७म
सायणः—हे अदाभ्य अहिंस्य दोषावस्तः रात्रे राच्छादयितः तमसो वारयितः अग्ने। त्वं दिवा नक्तं अहनि रात्रौ च।

तत् कथम् इत्थमभिज्ञस्यापि सायणस्य अमुत्र स्खलन मभूत्? वस्तुतस्तु यत् सायणभाष्यं सायणनाम्ना परिचितं, तत् सर्वं तस्य बहुभिः शिष्यैः सम्पादित मतो विरोधोऽयं भ्रान्तिरेषा च। ऋग्वेदभाष्ये अनेनैव हेतुना बहुवैषम्यं परिलक्ष्यते। यत् भवतु सर्वादौ श्रीमता उवटेन अस्य "दोषावस्तः" इति पदस्य प्रकृतव्याख्या कृता। तदनु महीधरस्य तदनुकारी अभवत्। शार्म्मण्य-देशीयेन श्रीमता Grassman महोदयेन च व्याख्यातं—दोषावस्तः—Nachter-heller! (यत् रात्रौ दीप्यते।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

प्रकृतार्थवाहिनी—हे दोषावस्तः अग्ने! दोषा रात्रिः, तस्यां वस्ते (वस्‌ङ्ल दीप्तौ) धातूनामनेकार्थत्वात् दीप्त्या विस्तृतो भवति दीप्यमानतरो भवतीति वस्ताः (वस्—तृच्) तत्सम्बुद्धौ वस्तः। हे रात्रौ दीप्यमानतर अग्ने। दिवे दिवे (कपोलचलमेतत्) दिवा दिवा प्रतिदिनं धिया बुद्ध्या त्वा त्वां नमो भरन्तः नमस्कारं कुर्वन्तः वयम् उप त्वत्समीपे एमसि एमः आगच्छामः। इदन्तो मसीति (७।१।४६) सूत्रेण मस्यादेश आर्षः। मन्त्रोऽयं जड़ाग्निपरः।

অনুবাদ। হে রাত্রিতে সম্যক্ প্রকাশমান অগ্নে! আমরা তোমাকে প্রতিদিন নমস্কার করিতে করিতে তোমার নিকটবর্ত্তী হইতেছি। ৭

7. O Agni (Lit god of fire), who art fully brilliant at night, we are approaching you by saluting you daily.

राजन्त मध्वराणां गोपा मृतस्य (गोपाम्-ऋतस्य)
दीदिविं वर्द्धमानं स्वे दमे ॥ ८

१। उवटभाष्यम्—अस्मिन् मन्त्रे आख्यातं नाम्नातमतः अधस्तनमन्त्रे यदाख्यातं तदनुवर्त्तते। राजन्तं दीप्यमानम् अध्वराणां गोपां यज्ञानां गोप्तारम्, ऋतस्य दीदिविं सत्यस्य दीपयितारम्। अग्निसमीपे व्रतं गृहीत्वा सत्यं वदति तदभिप्राय मेतत्। वर्द्धमानं चातुर्मास्यपशुसोमैः। स्वे दमे स्वकीये यज्ञगृहे दम इति गृहनाम। दाम्यन्ति हि गृहस्थाः उप आ इमसि इति अनुवर्त्तते। २३-२अ यजुः।

२। सायणः—पूर्वमन्त्रे "त्वामुपैमसि" इत्यग्निमुद्दिश्य उक्तं—कीदृशं त्वां? राजन्तं दीप्यमानम् अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकम्, ऋतस्य सत्यस्य अवश्यम्भाविनः कर्म्मफलस्य दीदिविं पौनःपुन्येन भृशं वा द्योतकम् आहुत्याधारम् अग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्म्मफलं स्मर्य्यते। स्वे दमे स्वकीये गृहे यज्ञशालायां हविर्भिर्वर्द्धमानम्। राजन्तं वर्द्धमानम् इत्यत्र उभयत्र पूर्ववत् धातुस्वरः शिष्यते। दीदिविशब्दस्य अभ्यस्तानाम् आदि रित्याद्युदात्तत्वम्। दमशब्दो वृषादित्वात् आद्युदात्तः।

३। महीधरभाष्यम्—क्रियापद मनुवर्त्तते, वयमीदृशमग्निमुपैमः। कीदृशं? राजन्तं दीप्यमानम्। अध्वराणां गोपां गोपायति इति गोपाः, तं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

यज्ञानां गोप्तारं ऋतस्य सत्यवचनलक्षणस्य व्रतस्य दीदिविं दीपयितारम्, अग्निसमीपे व्रतं गृहीत्वा सत्यं वदति इत्याशयः। स्वे दमे अस्मदीये गृहे वर्द्धमानं चातुर्मास्यसोमपश्वादिभिरभिवृद्धिं गच्छन्तं दाम्यन्ति गृहस्था यत्र इति दमो गृहम्। दिवेः कि प्रत्ययो बाहुलकात् लिड्वद्भावात् द्वित्वं तुजादीनां दीर्घः अभ्यासस्य इति अभ्यासदीर्घः। देवयति इति दीदिविः। २३—क। ३अ।

४। रमानाथः—अध्वराणां राजन्तं दीप्यमानं राजानम् ऋतस्य सत्यस्य आर्य्यधर्म्मस्य दीदिविं दीप्यमानं गोपां रक्षकं स्वे दमे गृहे यज्ञशालायां वर्द्धमानं हविर्भिः समिद्धम् अग्निमिति पूर्व्वया ऋचा अन्वयः। ८

५। दयानन्दः—पदार्थः—राजन्तं प्रकाशमानम् अध्वराणां पूर्व्वोक्तानां यज्ञानां धार्म्मिकाणां मनुष्याणां वा गोपां, गाः पृथिव्यादीन् पाति रक्षति तम्। ऋतस्य सत्यस्य सर्व्वविद्यायुक्तस्य वेदचतुष्टयस्य सनातनस्य जगत्कारणस्य वा। ऋतमिति सत्यनामसु पठितं (निघ—३।१०) ऋत इति पदनामसु च (निघं ५।४)। दीदिविं सर्व्वप्रकाशकम्—दिवो द्वे दीर्घश्च अभ्यासस्य (उं-४'५५)। अनेन क्विन्प्रत्ययः। वर्द्धमानं ह्रासरहितं, स्वे स्वकीये दमे दाम्यन्ति उपशाम्यन्ति दुःखानि यस्मिन् तस्मिन् परमानन्दे पदे। दमुधातोः हलश्च। अं ३ ३।१२१। अनेन अधिकरणे घञ् प्रत्ययः।

६। दत्तजानुवाद—तुमि दीप्यमान, तुमि यज्ञेर रक्षक, यज्ञेर अतिशय दीप्तिकारक एवं यज्ञशालाय वर्द्धनशील। ८

स्वाभिमतम्—अस्मिन् मन्त्रे ऋषिरग्निं विशिनष्टि अध्वराणाम् ऋतस्य सत्यस्य च गोपा मिति। कथमेतत्? यतः तदा स्वर्गे भारतवर्षे च दैत्यदानवा असुरराक्षसपिशाचदस्यवश्च यज्ञध्वंसकारिण आसन्। उक्तञ्च—

ये देवा यज्ञहनो यज्ञमुषो दिवि अध्यासते। ये देवा यज्ञहनो यज्ञमुषः पृथिव्या मध्यासते। ये देवा यज्ञहनो यज्ञमुषः अन्तरिक्षे अध्यासते।२०४कृष्णयजुः।

यज्ञविघ्नकारिण एते दिवि स्था देवा दैत्यदानवाः, पृथिवीस्था देवा अन्तरीक्षस्था देवाश्च वृत्रबलादयः असुराः। तथाहि वायुपुराणम्।

न तत्र दुरितं किञ्चित् विदधुर्न्न रक्षराक्षसाः।
न च यज्ञहनो दैत्या न च यज्ञमुषोऽसुराः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

असुराः (असुराश्च तदा आसन् तेषां दायादबान्धवाः) देवविरोधिनो भारतीया आर्य्याश्च केचित् वृत्रादयो यज्ञविघ्नकारिणो बभूवुः। यज्ञाग्नौ पितृउद्देशेन देय पिण्डमपि ते बलात् भक्षयामासुरित्यपि ऋग्वेदेषु वर्त्तते (५।५१।१म)। दमशब्दो धामशब्दस्य अपभ्रंशः, स्वतन्त्रो दमशब्दो वा। अयमेव शब्दः ग्रीकभाषायां (दोमोस्), तथा लाटिनभाषायाञ्च (दमुस्) इत्याकारेण वर्त्तमान इति। "Domestic" इदमपि विशेषणं दमशब्दात् व्युत्पादितमिति।

७। प्रकृतार्थवाहिनी—कीदृश मग्निम् एमः? इत्यत आह राजन्तं स्वज्वालया दीप्यमानम् अध्वराणां यज्ञानाम् ऋतस्य सत्यस्य च गोपां रक्षकं दीदिविं (अपभ्रष्टोऽयं शब्दः) देदीप्यमानं पौनःपुन्येन भृशं वा द्योतकं नितरामुज्ज्वल मिति यावत्. तथा हविरादिना स्वे दमे स्वकीये गृहे (दमो गृह मिति निघण्टुः) वर्द्धमानं वृद्धिं प्राप्तम्। ८

অনুবাদ। যিনি আহুতিদ্বারা বর্দ্ধিত হইয়া অতিশয় দীপ্তি পাইয়া থাকেন, যিনি সত্য বা যজ্ঞের রক্ষাকর্ত্তা, যিনি নিজ যাগগৃহে বর্দ্ধমান ও দেদীপ্যমান, আমরা প্রতিদিন সেই অগ্নির নিকট গমন করিতেছি। ৮

We are daily approaching the Fire God who shines brilliantly when fed with offerings, who is the preserver of truth and sacrifice, who is augmented in his own sacrificial house (yaga mandap) and looks bright.

स नः पितेव सूनवे ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये॥ ९|२-१सू-१म।

१। उवटः—यस्त्व मुक्तगुणः सः अस्माकं पिता इव सूनवे पुत्राय हे भगवन् अग्ने सूपायनः सुखोपगमनोभव। किञ्च "सचस्वा नः स्वस्तये' सेवस्व नः अस्मान् स्वस्तये अविनाशाय। २४ क—३अ, शुक्लयजुः।

२। सायणः—हे अग्ने स त्वं नः अस्मदर्थं सूपायनः शोभनप्राप्तियुक्तो भव। तथा नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्र उभयत्र दृष्टान्तः यथा सूनवे पुत्रार्थं पिता सुप्रापः,प्रायेण समवेतो भवति तद्वत्।

३। महीधरः—हे अग्ने गार्हपत्य! स पूर्वोक्तगुणयुक्तस्त्वं, न अस्माकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

सूपायनो भव। सुखेन उपैतुं शक्यः सूपायनः। सुष्ठु उप प्राप्तुं शक्यो भव। तत्र दृष्टान्तः - सूनवे पितेव यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यः। किञ्च नः अस्माकं स्वस्तये क्षेमाय सचस्व। अनेन कर्म्मणा समवेतो भव। षच समवाये इति धातुः (धाः ११,६,२२, २८)। यद्वा सचस्व सेवस्व, षच सेवने (धाः ६, २)। २४ क। ३अ।

४। दयानन्दः—पदार्थः—स जगदीश्वरः नः अस्मभ्यं पितेव जनकवत् सूनवे स्वसन्तानाय अग्ने ज्ञानस्वरूप सूपायनः सुष्ठु उपगतम् अयनं ज्ञानं सुखसाधनं पदार्थप्रापणं यस्मात् सः। भव सचस्व समवेतान् कुरु। अन्येषामपि दृश्यते। अं ६।३।१३७। इति दीर्घः। नः अस्मान् स्वस्तये सुखाय कल्याणाय च।

५। रमानाथः—अग्ने स त्वं नः अस्माकं सूनवे पुत्राय पितेव सूपायनः सुगमः अनायासलभ्यो भव। नः स्वस्तये कल्याणाय सचस्व, अस्माभिर्युक्तो भव। अस्मदनुग्रहार्थं यज्ञस्थलमागच्छ इति भावः।

६। दत्तजानुवाद—पुत्रेर निकट पिता येमन अनायासे अधिगम्य, हे अग्नि तुमि आमादिगेर निकट सेइरूप हओ। मङ्गलार्थ आमादिगेर निकट वास कर।

७। प्रकृतार्थवाहिनी—हे अग्ने! स त्वं सूनवे पुत्राय पिता इव सूपायनः सुगमः अनायासेन प्राप्तव्यो भव, तथा त्वम् अस्माकं स्वस्तये कल्याणार्थं सचस्व यतस्व।९।२

হে অগ্নে! পিতা যেমন পুত্রের অনায়াসলভ্য হয়েন, তদ্রূপ তুমিও আমাদিগের সুখলভ্য হও, আমাদিগের কল্যাণের নিমিত্ত চেষ্টা কর। ৯।২

O Fire-God, first as the father is easily accessible to the son so you be equally approachable to us and active for our good. 9·2.

द्वितीयं सूक्तम्।

वैश्वामित्रो मधुच्छन्दा ऋषिर्मन्त्रसमाहर्त्ता वायुप्रभृतयो देवताः।

गायत्री छन्दः। आध्वर्य्यवे वायव्योपस्थाने विनियोगः बाह्वृच्ये प्रउगे शास्त्रे शस्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

**वाय वायाहि (वायो ! आयाहि) दर्शतेमे सोमा अरङ्कृताः।
तेषां पाहि श्रुधी हवम् ॥१॥**

१। यास्कः—वाय वायाहि दर्शनीयेमे सोमाः अरङ्कृताः, अलङ्कृताः, तेषां पिब, शृणु नो ह्वान मिति। कमन्यं मध्यमादेव मवच्यत् तस्य एषा परा भवति। २२ पृ २य भाग।

२। सायणः—दर्शत हे दर्शनीय वायो कर्म्मणि एतस्मिन् आयाहि आगच्छ। त्वदर्थम् इमे सोमा अरङ्कृता अलङ्कृताः। अभिषवादिसंस्कारः, अलङ्कारः तेषां तान् सोमान्। यद्वा तेषामेकदेशम् इत्यध्याहारः। पाहि स्वकीयं भागं पिब इत्यर्थः। तत्पानार्थं हवम् अस्मदीयम् आह्वानं श्रुधि शृणु।

३। दयानन्दः—वायो अनन्तबल सर्वप्राणान्तर्यामिन् ईश्वर, तथा सर्वमूर्त्तद्रव्याधारो जीवनहेतुर्भौतिको वा। अन्तरिक्षमध्ये ये पदार्थाः सन्ति, तेषां मध्ये वायुः प्रथमागामी अस्ति। वाति सोऽयं वायुः सर्वगत्वात् ईश्वरो गतिमत्त्वात् भौतिकोऽपि गृह्यते। वेत्ति सर्वं जगत् स वायुः परमेश्वरः अस्ति, तस्य सर्वज्ञत्वात्। मनुष्यो येन वायुना तन्नियमेन प्राणायामेन वा परमेश्वरं शिल्पविद्यामयं यज्ञं वा वेत्ति जानाति इत्यर्थेन भौतिको वायुर्गृह्यते। एवमेव एति प्राप्नोति चराचरं जगत् इत्यर्थेन परमेश्वरस्यैव ग्रहणम्। तथा एति प्राप्नोति सर्वेषां लोकानां परिधीन् इत्यर्थेन भौतिकस्यापि। कुतः ? अन्तर्यामिरूपेण ईश्वरस्य मध्यस्थत्वात् प्राणवायुरूपेण भौतिकस्यापि मध्यस्थत्वात् एतद्द्वयार्थस्य वाचिका वायवायाहि इति ऋक् प्रवृत्ता अस्ति इति विज्ञेयम्। —

वायुः सोमस्य रक्षिता वायुमस्य रक्षितार माह साहचर्य्यात् रसहरणात् वा। निरुक्तं—११। ५। वायुः सोमस्य सुतस्य उत्पन्नस्य अस्य जगतो रक्षकत्वात् ईश्वरोऽत्र गृह्यते। कस्मात् सर्वेण जगता सह साहचर्य्येण व्याप्तत्वात्। सोमवल्ल्यादेरोषधिगणस्य रसहरणात् तथा समुद्रादेर्जलग्रहणात् च भौतिको वायुरप्यत्र गृह्यते।

वायुर्वा अग्निः सुषमित् वायुर्हि स्वयमात्मानं समिन्धे। स्वयमिदं सर्वं यदिदं किञ्च वायुमेव तदन्तरिक्षलोके आघातयति वायुर्वै प्रणीर्यज्ञानां वायुर्वै तूर्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

हव्यवाट्। वायुर्हि इदं सर्वं सद्यस्तरति यदिदं किञ्च। वायुर्देवेभ्यो हव्यं वहति। ऐतरेयब्राह्मणम्। २।३४

वायुर्भौतिकः अग्निदीपनस्य सुषमित् इति ग्राह्यः। वायुसंज्ञः अहमीश्वरः स्वयमात्मानं यदिदं किञ्चित् जगत् वर्त्तते तदिदं सर्वं स्वयं समिन्धे प्रकाशयामि तथा स एव अन्तरिक्षलोके भौतिकमिमं वायुम् आयातयति विस्तारयति स एव वायुर्भौतिको वा यज्ञानां प्रापकः अस्ति, इति अत्र वायुशब्देन ईश्वरस्य तथा वायुर्वै तूर्णिः इत्यादिना भौतिको गृह्यते इति। आयाहि आगच्छ आगच्छति वा। अत्र पक्षे व्यत्ययः। दर्शत ज्ञानदृष्ट्या द्रष्टुं योग्यः अयोग्यो वा। इमे प्रत्यक्षाः सोमाः सूयन्ते उत्पद्यन्ते ये ते पदार्थाः। अरंकृताः अलङ्कृता भूषिताः-संज्ञाच्छन्दसोर्वा कपिलकादीनामिति वक्तव्यम्। (अ—८।२।१८ इति लत्वविकल्पः)। तेषां तान् पदार्थान् (षष्ठी शेषे अ २।३।५० इति शेषत्वविवक्षायां षष्ठी)। पाहि रक्षयति वा। श्रुधि श्रावयति वा। अत्र बहुलं छन्दसि इति विकरणाभावः।

४। रमानाथः—हे दर्शत दर्शनीय (दृश्+अतच्) वायो आयाहि यज्ञस्थले आगच्छ, इमे सोमा अरंकृता अलङ्कृताः संस्कृताः प्रस्तुता इति यावत्। तेषां तान् पाहि पिब (पिबादेशाभावश्छान्दसः) अस्माकं हवम् आह्वानं प्रार्थनाञ्च श्रुधी शृणु (हे धिंभावश्छान्दसः)। १

५। दत्तजानुवाद—हे दर्शनीय वायु! आइस, एइ सोमरससमूह अभिषुत हइयाछे, इहा पान कर। आमादिगेर आह्वान श्रवण कर।

स्वाभिमतम्—दयानन्दस्तु अस्य मन्त्रस्य व्याख्याविधौ नितरां वृथा वाग्जाल-विस्तारं कृतवान्। यथा देवानाम् आर्य्याणां वा अग्निजलसूर्य्याः जड़ाः उपास्या आसन्, तथा भारतीयाः सर्वे ऋषयोऽपि वाय्वादिनरदेवानामुपासका आसन्। मन्त्रस्थोऽयं वायुर्नरदेव एव, स तु त्वष्टुर्जामाता, यजुर्वेदमन्त्रसमाहर्त्ता च। उक्तञ्च—

अग्निर्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता आदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवता इन्द्रो देवता वरुणो देवता। २० क—१४ अ यजुः।

इत्यत्रापि वसुरुद्रबृहस्पतीन्द्रादित्यादीनां साहचर्य्यात् बोद्धव्यं यत् एषः अग्निः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

एष वातः, एष सूर्य्यः, एष चन्द्रः एते सर्वे जड़ा न, परन्तु नरदेवा एव। इत्थं दयानन्दोद्धृते पूर्वह्नतौ (४४।२३ अ) यजुर्मन्त्रे च "वायुः पूषा" इति शब्दयोर्विद्यमानत्वात् बोद्धव्यं यत् एष वायुः एष पूषा च नरदेवौ, ते पुनः प्रभञ्जनो जड़सूर्य्यश्च इति च तस्य नितरां भ्रान्तिरेव। भवतु वा एष वायुः पवनः, एष वायुः प्रभञ्जनः, परन्तु एष वायुः "परमेश्वरःइति तु महती एव भ्रान्तिस्तस्य दयानन्दस्य इति मुण्डकवचनात् गम्यते। "भयादस्याग्निस्तपति, भयात्तपति सूर्य्यो भयात् इन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः। पचान्तरे वायुनामा कश्चित् देव आसीत्। यथा—

त्वष्टुर्जामातरं वायुं। २६—२२—८म

कश्चित् वायुनामा देवः त्वष्टुर्जामाता। वेदे ब्राह्मणादिष्वपि इन्द्रेण सह वायोर्नाम बहुशो गृहीतमिति। इन्द्रावायू इमे सुताः। ४।२।१म

तथाहि ब्राह्मणम्—देवा इन्द्रमब्रुवन् इमं नोवाचं व्याकुरु इति। सोऽब्रवीत् वरं वृणे मह्यं चैव एष वायवे च। तथाहि मनुसंहिता—

अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः। ८ अ—४२

अयमेव वायुर्नाम देवः, ब्रह्मण आदेशात् अन्तरीक्षलोकात् (तुरुष्कपारस्यापोगस्थानेभ्यः) यजुर्वेदस्य मन्त्रसमाहारं कृतवान्। स च तस्य अन्तरीक्षस्य अधिपतिरपि आसीत्। यदुक्त मथर्ववेदे—

वायुरन्तरिक्षस्य अधिपतिः।

परन्तु इदम् अन्तरीक्षमपि गगनम् इति महान् प्रमादो दयानन्दं नितरामुत्पथगामिन मकरोत्। परन्तु अन्तरीक्षं जनपदविशेषः (भुवर्लोकः) अस्य ज्ञानस्य अभावादेव सर्वे भारतीयाः पाश्चात्याश्च भाष्यकारा लक्ष्यभ्रष्टा अभवन् इति

६। प्रकृतार्थवाहिनो—हे वायो! त्वष्टुर्जामातः! इमे पुरोवर्त्तिनः सोमाः सोमरसाः अरङ्कृता अलङ्कृता दध्यादिमिश्रणेन प्रस्तुतीकृताः, त्वम् आयाहि आगच्छ, दर्शत पश्य च (दर्शतपदमार्षम्) अपि च आगत्य च तेषां तान् (विभक्तिव्यत्ययः) सोमरसान् पाहि पिब, हवम् आह्वानञ्च स्रुधि शृणु। १

হে ত্বষ্টার জামাতা মহর্ষি বায়ুদেব! এই দেখ আমরা তোমার জন্য দধ্যাদিমিশ্রিত করিয়া উত্তম সোমরস প্রস্তুত করিয়া রাখিয়াছি, তুমি আসিয়া ইহা পান কর ও আমাদিগের কথা গুলি শ্রবণ কর। ১

O Vayu, who art the son-in law of Tvasta see how we have prepared excellent Soma wine mixed with curd and other things. Kindly come and drink it an ı hear what we have got to say.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वाय उक्थेभिः (वायो उक्थेभि) जरन्ते त्वा मच्छा जरितारः।
सुतसोमा (:) अहर्विदः॥ २

१। सायणः—हे वायो! जरितारः स्तोतार ऋत्विग्यजमानाः त्वाम् अच्छ त्वा मभिलक्ष्य उक्थेभिः आज्यप्रउगादिशस्त्रैः जरन्ते स्तुवन्ति। कीदृशाः सुतसोमाः, अभिषुतेन सोमेन उपेताः अहर्विदः अहःशब्दः—एकेन अह्ना निष्पाद्ये अग्निष्टोमादिक्रतौ वैदिकव्यवहारेण प्रसिद्धः, क्रत्वभिज्ञा इत्यर्थः। २

२। दयानन्दः—वायो अनन्तबलेश्वर उक्थेभिः स्तोत्रैः जरन्ते स्तुवन्ति। त्वां भवन्तं, अच्छ साचात् निपातस्य च। (अ ६।३।१३६ इति दीर्घः) जरितारः स्तोतारः अर्चकाश्च। सुतसोमाः सुता उत्पादिताः सोमा ओषध्यादिरसाः विद्यार्थं यै स्ते, अहर्विदः य अहर्विज्ञानप्रकाशं विन्दन्ति प्राप्नुवन्ति इति। भौतिक वायुग्रहणे खल्वयं विशेषः। वायो गमनशीलो विमानादिशिल्पविद्यानिमित्तः पवनः, जरितारः स्तोतारः अर्थात् वायुगुणस्तावका भवन्ति। यतः तद्विद्या प्रकाशितगुणफला सती सर्वोपकाराय स्यात्। २

३। रमानाथः—हे वायो सुतसोमाः संस्कृतसोमरसविशिष्टा अहर्यज्ञ-कालं विदन्ति इति अहर्विदः जरितारः स्तोतारः त्वाम् अच्छा अभिलक्ष्य उक्थेभिः उक्थैः आज्यप्रउगादिशस्त्रमन्त्रैर्जरन्ते स्तुवन्ति। प्रगीतमन्त्रसाध्यं स्तोत्रम् अप्रगीतमन्त्रसाध्यं शस्त्रमिति स्तोत्रशस्त्रमन्त्रयोर्विवेकः। २

पादटीका—वायु पवनदेवेर नाम, मित्र दिवसेर अधिष्ठाता एवं वरुण रात्रिर अधिष्ठाता। ८० सूक्त देख। सचराचर मित्र सूर्य्यदेव एवं वरुण जलाधिप, इन्द्र आकाशेर देवता।

४। रमेशचन्द्र—हे वायु यज्ञाभिज्ञ स्तोतागण (स्तोतृगण लेखा उचित छिल) सोमरस अभिषुत करिया तोमार उद्देशे स्तुतिबाक्य प्रयोग करिया स्तव करितेछे। २

स्वाभिमतम्—यदा चतुर्थपञ्चममन्त्रयो स्तथा अन्येषु बहुषु च मन्त्रेषु इन्द्र-वाय्वोर्नाम समस्तभावेन प्रयुक्तमभूत्, तदा इन्द्रस्य अजड़त्वात् अस्य वायोरपि अजड़त्वं स्वतःसिद्धमिति। तथापि कथं दयानन्दरमानाथौ तमेव नरदेवं वायुं पवनं स्थिरीचक्रतुः तद् वयं न जानीमहे। रमानाथस्तु पुनः कथं पाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

टीकायां मित्रः—दिवसस्य अधिष्ठाता ; वरुणो—रात्रेरधिष्ठाता इति प्रमाण-शून्यस्य मतस्य अभिव्यक्तिं चकार, कथं नरदेवं मित्रं जड़सूर्यं स्थिरीचकार तदपि चिन्तनीयमिति। वरुण खलु अपाम् अन्तरीक्षलोकस्य (पारस्यस्य) तथा इन्द्रोऽपि आकाशस्य (मङ्गलियाजनपदस्य) अधिपतिरास्तां न पुनः सलिलानां गगनस्य वा, गगनम् आकाशं न।

५। प्रकृतार्थवाहिनी—हे वायो ! त्वष्टुर्जामातः अच्छाः निर्म्मलाः धूतपापा अहर्विदः यज्ञकालज्ञाः सुतसोमाः सुताः अभिषुताः सोमाः सोमरसा यैं स्ते जरितारः स्तोतारः (जृङ्स्तुतौ निरुक्तधातुः, ततः तृच् पुंसि भूम्नि) स्तुतिकारकाः त्वा त्वाम् उक्थेभिः उक्थैः साममन्त्रैः जरन्ते स्तुवन्ति। २

হে বায়ো ; যজ্ঞকালজ্ঞ স্তোতৃগণ সোমরস প্রস্তুত করিয়া তোমাকে উকৃথমন্ত্র অর্থাৎ উচ্চৈঃস্বরে গেয় সামমন্ত্রে স্তুতি করিতেছেন।

O Vayu! worshippers who knoweth what is the fit time for offering a sacrifice have made somarasa (wi.e made from the juice of the soma plant) and are chanting *Uktha mantras* (*Sama Veda* hymns) for your praise.

वायो तव प्रपृञ्चती धेना जिगाति दाशुषे।
उरूची सोमपीतये ॥ ३

१। सायणः—हे वायो तव धेना वाक् सोमपीतये सोमपानार्थं दाशुषे दाश्वांसं दत्तवन्तं यजमानं जिगाति गच्छति। "हे यजमान त्वया दत्तं सोमं पास्यामि" इत्येवं वायुर्ब्रूते इत्यर्थः। कीदृशी धेना ? प्रपृञ्चती प्रकर्षेण सोम-सम्पर्कं कुर्वन्ती, सोमगुणं वर्णयन्ती इत्यर्थः। उरूची उरून् बहून् यजमानान् गच्छन्ती, ये ये सोमयाजिनः, तान् सर्वान् वर्णयन्ती इत्यर्थः।

व्याकरणं—प्रपृञ्चती—इत्यत्र "शतुरनुम" इति ङीबुदात्तः श्लोको "धारा" इत्यादिषु सप्त पञ्चाशत्सु वाङ्नामसु गणः—"धेना ग्ना" इति पठितम्। वर्त्तते अयते इत्यादिषु द्वाविंशाधिकशतसंख्येषु गतिकर्म्मसु "गाति जिगाति" इति पठितम्। "दाशुष" इत्यत्र गत्यर्थकर्म्मणीति चतुर्थी। उरूची इत्यत्र गौरादित्वेन ङीपि कृते प्रत्ययस्वरः। "सोमपीतये" इत्यत्र बहुव्रीहित्वाभावेऽपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः। ३

२। दयानन्दः—वायो वेदवाणीप्रकाशकेश्वर ! तव जगदीश्वरस्य प्रपृञ्चती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रकृष्टा चासौ पृञ्चती चार्थसम्बन्धेन सकलविद्यासम्पर्ककारयित्री धेना वेदचतुष्टयी वाक्. जिगाति प्राप्नोति। जिगातीति गतिकर्मसु पठितम्। तस्मात् प्राप्त्यर्थो गृह्यते। दाशुषे निष्कपटेन विद्यां दात्रे पुरुषार्थिने मनुष्याय उरूची बह्वीनां पदार्थविद्यानां ज्ञापिका। उरु इति बहुनामसु पठितम्। निघ—३।४ सोमपीतये सूयन्ते ये पदार्थाः तेषां पीतिः पानं यस्य तस्मै विदुषे मनुष्याय, अत्र सह सुपेति समासः। भौतिकपक्षे तु अयं विशेषः। वायो पवनस्य योगेनैव तव अस्य प्रपृञ्चती शब्दोच्चारणसाधिका धेना वाणी दाशुषे शब्दोच्चारणकर्त्रे उरूची बह्वर्थज्ञापिका। अन्यत् पूर्ववत्। ३

३। रमानाथः—हे वायो! प्रपृञ्चती प्रकर्षेण सोमसम्पर्कं कुर्वन्ती सोमगुणान् वर्णयन्ती उरूची विस्तृता, बहुभ्यो यजमानेभ्यः प्रयुक्ता तव धेना वाक् सोमपीतये सोमरसपानार्थं दाशुषे सोमदानकारिणे यजमानाय जिगाति गच्छति, हे यजमान त्वया दत्तं सोमरस-समूहं पास्यामि इति वायुर्ब्रूते इति भावः। ३

४। रमेशचन्द्र—हे वायु! तोमार सोमगुणप्रकाशक वाक्य, सोमपानार्थ हव्यदाता यजमानेर निकट आसितेछे। अनेकेर निकट आसितेछे। ३

स्वाभिमतम्—नायं मन्त्रः सुखबोधः। प्रपृञ्चती, धेना, जिगाति च, एतत् पदत्रयं न खलु तावत् प्रसादगुणोपेतम्। सायणस्कन्दस्वामिमाधवप्रभृतिभि र्व्याख्याकारैर्यत् व्याख्यातं तदपि च न निसर्गसुन्दरं, नच हृद्यं च इति प्रतीयते। वयं मन्यामहे एतानि पदानि खलु यथाक्रमेण "प्रपञ्चयन्ती""धमनिः""तथा"जागरयति" इत्येतत्पदसमूहानाम् अपभ्रंश एव। यद्यपि सायणेन "देवान् जिगाति (शतपथ—२६२ पृ) इत्यत्र—जिगीषति जेतुमिच्छति" (२७५ पृ) इति व्याख्यातवान्, तथापि तत्रापि देवान् जागरयति इदमपि भवितुं युज्यते। भवतु यत् वयं एवमेव व्याख्यातुमभिलषामहे।

५। प्रकृतार्थवाहिनी—हे वायो! त्वष्टुर्जामातः! तव प्रपृञ्चती प्रपञ्चयन्ती विस्तारयन्ती उरूची उरून् बहून् यजमानान् अञ्चति गच्छतीति उरूची बहुजनविलासिनी धेना धमनिः (वाक् इति निरुक्तम्) वाक्यं "हे यजमाना अहं युष्मत्प्रदत्तं सोमं पास्यामि" इत्येतत् वायुवचनं दाशुषे हविर्दत्तवते यजमानाय सोमपीतये त्वत्सोमपानार्थं जिगाति जागरयति (जागाय इति भाषा) प्रबोधयति उन्मुखीकरोति इत्यर्थः। ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

হে বায়ুদেব! তোমার বহুজনসম্বন্ধীয় বাক্‌প্রপঞ্চ হবির্দানকর্ত্তা যজমানকে "তোমাদের প্রদত্ত সোম আমি পান করিব, তোমরা আমাকে সোমরস দাও" ইহা বলিয়া জাগাইয়া দেয়।৩

O Vayu your words addressed to many worshippers rouse the sacrificer who offers libation of ghee by saying "I shall drink the soma wine offered by you you give me some Soma wine."

इन्द्रवायू इमे सुता उप प्रयोभि (प्रयः-भिः) रागतम्।
इन्दवो वा मुशन्ति हि ॥ ४

१। उवटभाष्यम्—द्वितीय पुरोरुक् (?) इन्द्रवायू-वायवो गायत्री। हे इन्द्रवायू! इमे अभिषुताः सोमाः, अतः कारणात् उप प्रयोभिरागतम्। उप इत्ययम् उपसर्ग, आगतमित्यनेन संबध्यते। उपागतम् उपागच्छतं प्रयोभिः। प्रयःशब्दः इण् गतौ, इत्यस्य धातोः शतृप्रत्ययान्तस्य। इणो यणि तियणादेशः भिस्। ततस्तकारस्य छान्दसः सकारः। ततो रुत्वादि,ततः प्रपूर्वस्य प्रयोभिरिति सिध्यति। प्रयद्भिरश्वैः शीघ्रं रागच्छतम्। किञ्च इन्दवो वा मुशन्ति हि। हि शब्दो यस्मादर्थे यस्मात् इन्दवः सोमा वां युवाम् उशन्ति। वश कान्तौ, कामयन्ते। यत् यस्मात् इन्द्रवायू पिबतमिति। ८—७अ शुक्लयजुः।

२। सायणभाष्यम्—एतस्या ऋचः, ऐन्द्रवायवग्रहे द्वितीया। पुरोऽनुवाक्यारूपेण विशेषविनियोगः पूर्वमेवोक्तः। हे इन्द्रवायू भवदर्थम् इमे सोमाः सुता अभिषुताः, तस्मात् युवां प्रयोभिः अन्नैः अस्मभ्यं दातव्यैः सह उपागतम् अस्मत्समीपं प्रति आगच्छतं। हि यस्मात् इन्दवः सोमाः, वां युवाम् उशन्ति कामयन्ते तस्मात् आगमनम् उचितम्। ४।२ सू।

३। महीधरः—अपगृह्य पुनः इन्द्रवायू इतीति। एकवारम् अर्द्धमादाय पृथक्-कृत्य पुनः ऐन्द्रवायवं गृह्णाति। ऐन्द्रवायवी गायत्री, मधुच्छन्दोदृष्टा। उपयामेति यजुःसहितो मन्त्रः।

हे इन्द्रवायू युष्मदर्थम् इमे सोमाः सुता अभिषुता, "प्रयः" इत्यन्ननाम। (निघ २।७।६)। प्रयोभिः एतैः सोमरसरूपैरन्नै र्निर्मित्तैः उप समीपे युवाम् आगतम् आगच्छतम्।

यद्वा प्रयःशब्द इण गतौ इति धातोः शतृप्रत्ययान्तस्य रूपं। प्रैति इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रयन् इणो यण् तस्य भिसि, परे तकारस्य छान्दसः सकारः, तस्य रुत्वादि प्रयोभिरिति सिध्यति। प्रयोभिः प्रयद्भिः शीघ्रैरश्वैः आगच्छतं। हि यस्मात् इन्दवः सोमा वां युवाम् उशन्ति कामयन्ते। अस्मात् आगच्छतम् इत्यर्थः।

४। दयानन्दः—इन्द्रवायू इमौ प्रत्यक्षौ सूर्य्यपवनौ। "इन्द्रेण रोचना दिवो दृढ़ानि दृंहितानि च स्थिराणि न पराणुदे"।१। ऋक् ८म। १४।८। यथा इन्द्रेण सूर्य्यलोकेन प्रकाशमानाः किरणा धृताः, एवं च स्वाकर्षणशक्त्या पृथिव्यादीनि भूतानि दृढ़ानि पुष्टानि स्थिराणि कृत्वा दृंहितानि धारितानि सन्ति। न पराणुदे, अतो नैव स्वस्वकक्षां विहाय इतस्ततो भ्रमणाय समर्थानि भवन्ति। इमे चित् इन्द्र रोदसी अपारे यत् संगृभ्णा मघवन् काशिरित्ते। इमे चित् इन्द्र रोदसी—रोधसी द्यावापृथिव्यौ विरोधं नाद्रोधः कूलं रुजति विपरीताल्लोष्ठो विपर्य्ययेण अपारे दूरपारे यत् संगृभ्णासि मघवन् काशिस्ते महान्। अहस्तमिन्द्र सं पिणक् कुणारुं अहस्तम् इन्द्र कृत्वा संपिढि परिक्कणनं मेघं। निरु—६।१। यतोऽयं सूर्य्यलोको भूमिप्रकाशौ धारितवान् अस्ति। अतएव पृथिव्यादीनां निरोधं कुर्वन् पृथिव्यां मेघस्य च कूलं स्रोतश्च आकर्षणेन निरुणद्धि, यथा वाहुवेगेन आकाशे प्रतिक्षिप्तो लोष्टो मृत्तिकाखण्डः पुनर्विपर्य्ययेण आकर्षणात् भूमिमेव आगच्छति, एवं दूरे स्थितानपि पृथिव्यादिलोकान् सूर्य्य एव धारयति। सोऽयं सूर्य्यस्य महान् आकर्षः प्रकाशश्च अस्ति। तथा वृष्टिनिमित्तोऽपि अयमेवास्ति। इन्द्रो वै त्वष्टा। ऐ ६।१। सूर्य्यो भूम्यादिस्थितस्य रसस्य मेघस्य च छेत्ता अस्ति। एतानि भौतिकवायुविषयाणि (वायवायाहि) इति मन्त्रप्रोक्तानि प्रमाणानि अत्रापि ग्राह्याणि, इमे सुताः प्रत्यक्षभूताः पदार्थाः उप समीपं प्रयोभिः तृप्तिकरैः अन्नादिभिः पदार्थैः सह। प्रीञ तर्पणे कान्तौ च इत्यस्मात् औणादिकः असुन् प्रत्ययः। आगतम् आगच्छतं। लोट् मध्यमद्विवचनं। इन्दवः जलानि क्रियामया यज्ञाः प्राप्तव्याः भोगाश्च। इन्दुरित्युदकनामसु पठितं निघ—१।१२। यज्ञनामसु निघ ३।१७। पदनामसु च। ५।४। वां तौ उशन्ति प्रकाशन्ते। हि यतः। ४

५। रमानाथः—हे इन्द्रवायू! देवौ इमे सोमाः सुताः संस्कृताः सन्ति। भोक्तॄन् प्रीणयन्तीति प्रयांसि अन्नानि। तैः प्रयोभिः उप अस्मत्समीपे आगतम् आगच्छतम्। हि यस्मात् इन्दवः सोमा वाम् उशन्ति कामयन्ते। उन्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

क्लेदने धातोरुण् प्रत्ययः। उकारस्य इकारः छान्दसः इति इन्दवः। सोम-रसस्य द्रवत्वात् क्लेदनं सम्भवति। ४

६। रमेशचन्द्र—हे इन्द्र ओ वायु। एइ सोमरस अभिषुत हइयाछे, अन्न लइया आइस। सोमरस तोमादिगके कामना करितेछे। ४

स्वाभिमतम्—इन्द्रो वृष्टिदाता कल्पितपदार्थो न, स हि अदितिनन्दनः विष्णोर्ज्येष्ठभ्राता; ब्रह्मणः कनिष्ठभ्रातृविशेषश्च; वायुरपि त्वष्टुर्जामाता, न पुनः पवन इति। विष्णोर्युन्यः सखा स इन्द्रश्च जड़सूर्य्यो, वायुरपि प्रभञ्जनः, किमत्र वक्तव्यम्? तस्य अहल्याजारस्य उपेन्द्रज्येष्ठस्य इन्द्रस्य सूर्य्यत्व-संसिद्ध्यर्थम् इह विदुषा दयानन्देन योऽयं मन्त्र उद्धृतः—(८।१४।८म). स खलु तस्य मन्त्रस्यापि प्रकृतार्थं न बुबुधे। येन इन्द्रेण दिवो द्युलोकस्य (नतु गगनस्य) रोचना रोचनानि ज्ञानविज्ञाने रत्युन्नतानि स्थानानि महस्तपःसत्यनामधेयानि (त्रि रोचनानि, त्रिदिवं) दृढ़ानि शत्रूणामधृष्याणि कृतानि, स इन्द्रो नरदेव एव। इन्द्रः सूर्य्यो वृष्टिमेघस्य च नियामकः किमत्र प्रमाणं वा? तेन हि दयानन्देन यत् यत् प्रमाणम् उपस्थापितं, तत् सर्वं भ्रष्टं। इन्द्रः त्वष्टापि न, स तु त्वष्टु भ्राता एव। वस्तुतस्तु दयानन्देन खलु केवलं वृथा वाग्जालविस्तारं कृत्वा लोकाः सर्व्वे व्यामोहिता इति।

७। प्रकृतार्थवाहिनी—हे इन्द्रवायू हे देवराज इन्द्र! महर्ष वायो च इमे पुरोवर्त्तिनः इन्दवः सोमरसा युष्मदर्थं सुता अभिषुताः प्रस्तुतीकृता विद्यन्ते, इमे सोमा वां युवाम् उशन्ति इच्छन्ति कामयन्ते, अतएव युवाम् इन्द्रवायू प्रयोभि प्रयोभिः (आर्षत्वात् एकाराभावो लिपिकरप्रमादो वा एष) यजमानेभ्यो देयैर्वाञ्छितप्रियवस्तुभिः सह उपागतम् अस्मत्समीपे आगच्छतम्। ४

হে ইন্দ্র ও বায়ুদেব! আমরা তোমাদিগের নিমিত্ত সোমরস প্রস্তুত করিয়া রাখিয়াছি। সোমরস তোমাদিগকে পাইতে ইচ্ছা করিতেছে, তোমরা আমাদিগের বাঞ্ছিত বস্তুর সহিত এখানে আগমন কর। ৪

O, Indra and Vayu, we have prepared Soma-juice for you. Soma-juice wishes to get you; you do come here with our desired objects.

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू।
तावायात मुपद्रवत् ॥ ५ | ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

१। सायण:—अत्र चकारेण अन्य: समुच्चीयते सन्निहितत्वात् वायुरेव। हे वायो! त्वम् इन्द्रश्च युवां उभौ, सुतानाम् अभिषुतान् सोमान् चेतथो जानीथ:। यद्वा अभिषुतानां सोमानां विशेषम् इत्यध्याहार:। कीदृशौ युवाम्? वाजिनीवसू। वाजिनीशब्दो यद्यपि उषोनामसु पठित:, तथापि अत्र असम्भवात् न गृह्यते। वाज:—अन्नं, तद् यस्यां हवि:सन्ततौ अस्ति, सा वाजिनी। तस्यां वसत:. इति तौ वाजिनीवसू। आमन्त्रितत्वात् अनुदात्त:। तौ तथाविधौ युवां द्रवत् क्षिप्रम् उप समीपे आयातम् आगच्छतम्। ५

२। दयानन्द:—वायो ज्ञानस्वरूप ईश्वर! इन्द्र: पूर्वोक्तश्च, अनुक्तसमुच्चयार्थे, तेन वायुश्च चेतथ: चेतयत: प्रकाशयित्वा धारयित्वा च संज्ञापयत:। अत्र व्यत्यय: अन्तर्गतो ण्यर्थश्च। सुतानां त्वया उत्पादितान् पदार्थान्, अत्र शेषे षष्ठी। वाजिनीवसू उषोवत् प्रकाशवेगयोर्वसत:। वाजिनी—इति उषसो नामसु पठितम्। (निघ—१।८) तौ इन्द्रवायू आयातम् आगच्छतम्। अत्रापि व्यत्यय:। उप सामीप्ये। द्रवत् शीघ्रम्। द्रवत् इति क्षिप्रनामसु पठितं (निघ २।१५)। ५

३। रमानाथ:—हे वाजिनीवसू वाजिन्यां हवि:सन्ततौ वसतो यौ तौ। यद्वा वाजिनी उषा तद्वत्। वसू प्रकाशमानौ, हे वायो त्वमिन्द्रश्च, इत्येतौ युवां सुतानां सोमानां सुतान् सोमान् चेतथो जानीथ:, तौ युवां द्रवत् क्षिप्रम् उप, अस्मत्समीपे आयातम् आगच्छतम्। ५

४। रमेशचन्द्र—हे वायु ओ इन्द्र! तोमरा अभिषुत सोमरस जान, तोमरा अन्नयुक्त हव्ये वास कर, शीघ्र निकटे आइस। ५

स्वाभिमतम्—यद्यपि निघण्टुकारेण वाजिनीशब्द:, उषसो नामसु पठित: तथापि असम्भवात् सायणादिभि स्तत् न गृहीतं, निघण्टुकार: प्रमादपरिशून्यो न, "वाजिनी उषा" इत्यत्र किं प्रमाणं? न कत्यं देवराजयज्वना न किमपि निगमान्तरमत्र उपस्थापितम्? अतो नितरां भ्रष्टसिद्धान्त एष:। वयमपि तेनैव हेतुना दयानन्दस्य सायणादीनामपि एतदसङ्गतं व्याख्यानं न ग्रहीतुं समर्था इति। निघण्टुकारस्तु सम्यक् विचार्य शब्दानामर्थान् प्रकृतान् स्थिरीकर्त्तुं न समर्थो बभूव। सायणदयानन्दरमानाथा अपि यत्र तत्र तमनुसृत्य प्रमत्ता अभवन् इति।

५। प्रकृतार्थवाहिनी—हे, महर्षे वायो! त्वम् इन्द्रश्च उभौ सुतानां सुतान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

(विभक्तिव्यत्ययः) सोमान् चेतथो जानीथः, अस्माभिः सोमा अभिषुता अभवन्,इति युवाभ्यां परिज्ञातम् । अतएव तौ युवां वाजिनीवसू वाजिनौ घोटकौ एव वसु धनं ययोः तौ घोटकयारूढ़ौ सन्तौ द्रवत् द्रुतं तूर्णं यथा स्यात् तथा उपायातं मत्समीपमागच्छतम् । ५ । ३ ।

অনুবাদ। হে মহর্ষে বায়ুদেব! আমরা যে সোম প্রস্তুত করিয়াছি, তাহা তুমি ও ইন্দ্র উভয়ে জান, অতএব তোমরা ঘোটকী আরোহণে অতিদ্রুত আমাদিগের নিকট আগমন কর। ৫।৩।

O, Vayu, you and Indra both know the Soma-juice which we have prepared, hence both of you came to us immediately on mare's back. 5

वायविन्द्रश्च सुन्वत आयात मुप निष्कृतम् ।
मक्षित्था धिया नरा ॥ ६

१। सायणः—हे वायो त्वम् इन्द्रश्च सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य निष्कृतं संस्कर्त्तारं (संस्कृतं ?) सोमम् उपायतम् आगच्छतम् । नरा हे नरौ पुरुषौ पौरुषेण सामर्थ्येन उपेतौ युवयो रागतयोश्च सतो धिया अमुना कर्म्मणा मक्षु त्वरया संस्कारः सम्पत्स्यति. इत्था सत्यम् । ६

२। दयानन्दः—वायो सर्वान्तर्यामिन् ईश्वर। इन्द्रश्च अन्तरिक्षस्थः सूर्य्यप्रकाशो वायुर्वा—

इन्द्रियम् इन्द्रलिङ्गम् इन्द्रदृष्टम् इन्द्रसृष्टम्
इन्द्रजुष्टम् इन्द्रदत्तम् इति वा (अ-५ ।२।८३)

इति सूत्राशयात् इन्द्रशब्देन जीवस्यापि ग्रहणम् प्राणोवै वायुः। (श ८।१।७।२)। अत्र वायुशब्देन प्राणस्य ग्रहणं। सुन्वतः अभिनिष्पादयतः, आ—समन्तात्, यातं प्राप्नुतः अत्र व्यत्ययः। उप सामीप्यं, निष्कृतं कर्मणां फलञ्च मक्षु त्वरितगत्या। मक्षु इति क्षिप्रनामसु पठितं (निघ २।१५) इत्याधारणपालनवृद्धिक्षयहेतुना धिया धारणवत्या बुद्ध्या कर्मणा वा। नरा नयनकर्त्तारौ। सुपां सुलुक्, इत्याकारादेशः।

३। रमानाथः—हे वायो त्वम्, इन्द्रश्च इति नरौ नेतारौ वीरौ युवां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य निष्कृतं संस्कृतं सोमम् इत्था धिया अनया अस्माकं प्रार्थनया भक्तियुक्तया वा मक्षु शीघ्रम् उपायातम् अस्मत्समीपे आगच्छतम्। ६

४। रमेशचन्द्र—हे वायु ओ इन्द्र! अभिषवकारी यजमानेर अभिषुत सोमरसेर निकटे आइस। हे नरद्वय एइ कर्म्म त्वराय सम्पन्न हइवे।

स्वाभिमतम्—इन्द्रस्तु अदितिनन्दनविशेषो देवराजश्च। तत्साहचर्य्यात् वायु रत्र न जड़ो, न पुनः परमेश्वरो वा इति। दयानन्दस्तु अकाण्डेऽपि वृथा विस्तारं अघटयदिति। पाणिनिसूत्रे इन्द्रशब्दस्य भूरिप्रयोगो बभूव, अतएव इन्द्रो जीव इति कथमनुमितं सिन्धान्तितं वा? यदि केवल मनुमानेन प्रयोजनवशाद्वा इन्द्रो जीवः स्यात्, तर्हि अयमिन्द्रो भल्लुक इन्द्रः शृगाल इति वा न कथं भवेत्? इन्द्रो जीवो विद्युत् सूर्य्यं, अस्त्यस्य कोऽपि निगमः शिष्टप्रयोगो, अस्त्यभिधानं वा? ब्राह्मणे वर्त्तते—"तं देवा इन्द्रमब्रुवन् इमं नो वाचं व्याकुरु इति। सः अब्रवीत् वर वृणे। मह्य चैव एष वायवे च॥ अत्र वायुना सह मिलित्वा मुनीनां सखा य इन्द्र ऐन्द्रं व्याकरणं चकार, तत्र किं व्याकरणकर्त्ता स इन्द्रश्च जड़सूर्य्यो विद्युत् जीवविशेषो वायुरपि एष प्रभञ्जनः परमेश्वरो वा भवितु मर्हति? वायुप्रोक्तं पुराणं वायुपुराणं, हनुमद्भीमादयोऽपि वायुपुत्रा इति। तर्हि किं स्वोकुर्म्मो वयं यत् वायुपुराणमन्तर्य्यामिभगवत्प्रणीतं, भीमादयश्च प्रभञ्जनसुता इति। अहो व्यामोहोऽयं तत्रभवतो विदुषो दयानन्दस्य खलु।

५। प्रकृतार्थवाहिनो—सुन्वतः (विभक्तिव्यत्ययः) सुन्वता सोमाभिषवं कुर्वता मया यजमानेन इत्था इत्थं धिया एवम्प्रकारया बुद्ध्या भक्तिपूर्व्वक मिति यावत् निष्कृतं परिष्कृतं सोमरसः प्रस्तुतीकृतः पानयोग्यः कृतः। अतएव हे वायो! त्वम् इन्द्रश्च नरा नरौ नरकुलप्रभवौ युवां तत्पानार्थं मक्षु क्षिप्रं यथा स्यात् तथा उपायातं मत्समीपे आगच्छतम्। ६

অনুবাদ। হে দেববায়ো! তুমি ও দেবরাজ ইন্দ্র, তোমরা উভয়ে আমাদিগের নরবংশীয়, আমি তোমাদিগের নিমিত্ত ভক্তিপূর্ব্বক সোমরস প্রস্তুত করিয়া রাখিয়াছি? তোমরা উভয়ে তৎপানার্থ অতি সত্বর আমার নিকট আগমন কর। ৬

O vayu, yourself *Devaraja* Indra, both of you belong to the same denomination of man (नर)! I have prepared some-juice for you most

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

reverentially! Both of you do come to me immediately to dring the same.

मित्रं हुवे पूतदक्षं वरुणञ्च रिशादसम्।
धियं घृताचीं साधन्ता ॥ ७

१। उवट:—मित्रं हुवे द्वे गायत्र्यौ। मित्रम् आह्वयामि, पूतदक्षं पूतस्य शुद्धस्य प्राणिन उद्धरणे दक्षं सोमं; वरुणञ्च रिशादसं हिंसकादिविनाशने शक्तिं कुर्वाणं हुवे। कीदृशौ? धियं कर्म्म घृताचीं येन कर्म्मणा घृतम् अच्यते ह्रयते, तत् कर्म्म साधयन्ता साधन्तौ, नहि देवता सन्तरेण कर्म्मसिद्धि:। ५७ क—२२ अ यजु:।

२। सायण:—अहम् अस्मिन् कर्म्मणि हवि:प्रदानाय पूतदक्षं पवित्रबलं मित्रं हुवे। तथा रिशादसं रिशानां हिंसकानाम् अदसम् अत्तारं वरुणञ्च हुवे, आह्वयामि। कीदृशौ मित्रावरुणौ? घृतम् उदकम् अञ्चति भूमिं प्रापयति या धीर्वर्षणकर्म्म तां घृताचीं धियं साधन्ता साधयन्तौ कुर्वन्तौ। मित्रशब्द: पुंलिङ्ग:। ७

३। महीधर:—द्वे मधुच्छन्दोदृष्टे, गायत्र्यौ, आद्या लिङ्गोक्तदेवत्या। मित्रं वरुणञ्च अहं हुवे आह्वयामि। कीदृशं? पूतदक्षं पूतं पवित्रं सदाचारं दक्षयति धनपुत्रादिभिर्वर्द्धयति पूतदक्ष: तं रिशादसं रिशन्ति हिंसन्ति रिशा दुष्टा:, तान् समन्तात् दसति नाशयति रिशादस:, तं; रिश हिंसायां, दस उप-क्षये द्वयोर्विशेषणे। कीदृशौ उभौ? धियं कर्म्म साधन्ता साधयन्तौ। कीदृशीं धियं? घृताचीं घृतम् अच्यते ह्रयते यत्र ताम्। ५७ क—२२ अ।

४। दयानन्द:—मित्रं सर्वव्यवहारसुखहेतुं ब्रह्माण्डस्थं सूर्य्यं, शरीरस्थं प्राणं वा। मित्र इति पदनामसु पठितं। (निघ—५।४)! अत: प्राप्यर्थ:।

मित्रो जनान्यातयति ब्रुवाणो, मित्रो दधार पृथिवी मुत द्याम्।
मित्र: कृष्टी रनिमिषाभिचष्टे, मित्राय हव्यं घृतवत् जुहोत ॥ १।५८।३म।

अत्र मित्रशब्देन सूर्य्यस्य ग्रहणं। प्राणो वै मित्र: अपानो वरुण:। (शत ८।२।५।६)। अत्र मित्रवरुणशब्दाभ्यां प्राणापानयो र्ग्रहणं। हुवे तन्निमित्तां बाह्याभ्यन्तरपदार्थविद्याम् आददाम्। पूतदक्षं पूतं पवित्रं दक्षं बलं वरुणञ्च वह्निस्थं प्राणं शरीरस्थम् अपानं वा। रिशा रोगा: शत्रवो वा हिंसिता येन तं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

धियं कर्म्म धारणावतीं बुद्धिम् वा। घृताचीं—घृतं जलम् अञ्चति प्रापयतीति तां क्रियां। घृतमित्युदकनामसु पठितं (निघ-१।१२) साधन्ता सम्यक् साधयन्तौ। अत्र सुपां सुलुक् इत्यकारादेशः। ७

५। रमानाथः—पूतदक्षं पवित्रबलं मित्रं देवं रिशानां हिंसकानां वैरिणा मदसं भञ्जकं हन्तारं वरुणं च देवम् इत्येतौ। घृताचीं घृतेन विशिष्टां धियं भक्तिबुद्धिप्रार्थनां साधयन्तौ सम्पादयन्तौ उपासकानां मनसि उत्तेजयन्तौ देवौ हुवे आह्वयामि प्रार्थये। घृताहुतेरनन्तरं प्रार्थना कार्य्या इति प्रार्थना घृताची।

६। रमेशचन्द्र—पवित्रवल मित्र ओ हिंसकशत्रुनाशक वरुणके आमि आह्वान करि। ताँहारा घृताहुतिप्रदानरूप कर्म्मसाधन करेन।

स्वाभिमतम्—मित्रवरुणादयः सर्वे अदितिगर्भप्रभवाइति वेदब्राह्मण स्मृतिरामायणमहाभारतपुराणादिषु सर्वेषु शास्त्रेषु विवृतमस्ति। पाश्चात्याल् लब्धमन्दबुद्धिस्तु रमेशचन्द्रो यत् किमपि वक्तुं शक्यते, भारतीयब्राह्मणो दयानन्दः, कथमोदृक् मिथ्या व्याख्यां कृत्वा हास्यास्पदमभूत्! मित्रः—सूर्य्यः, वरुणः—प्राणः, तौ पुनः प्राणापानौ इति पौराणिका एव वक्तुमर्हन्ति, किन्तु वेदाचार्य्यो दयानन्द इति वक्तुं न समर्थो वेदविरुद्धत्वात्। उक्तञ्च ऋचि—

अष्टौ पुत्रासो अदितेर्ये जाताः तन्व स्परि। ८।७२।१०म

तत्र सायणभाष्यम्—अष्टौ पुत्रासः पुत्रा मित्रादयः अदितेर्भवन्ति, ये अदिते स्तन्वः परि शरीरात् जाताः उत्पन्नाः। अदितेरष्टौ पुत्रा अध्वर्यु-ब्राह्मणे परिगणिताः। तथाहि—तान् अनुक्रमिष्यामः—मित्रश्च वरुणश्च धाता च अर्य्यमा च अंशश्च भगश्च, विवस्वान् आदित्यश्च।

कोऽयमादित्यः? स एव सूर्य्यापरनामा, यस्य तनयः सावर्णिमनुरिति। आदित्यास्तु द्वादशसंख्यकाः, तत् कथमत्र केवलमष्टानां नाम गृहीतं? यदा अदितेरष्ट पुत्राः प्रसूतास्तदनन्तरमेव इयम् ऋक् विरचिता। ब्राह्मणस्तु तस्या एव ऋचो व्याख्याच्छलेन अष्टपुत्राणां नामनिर्देशं कृतवान् इति। द्वादश पुत्रा एकदैव न प्रसूता इति। उक्तञ्च—

मारीचात् कश्यपात् जातास्ते ऽदित्या दक्षकन्यया। १३०
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि।
अर्यमा चैव धाता च त्वष्टा पूषा तथैव च॥ १३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

विवस्वान् सविता चैव मित्रो वरुण एव च।
अंशोभगश्चादितिजा आदित्या द्वादश स्मृताः॥ १३२
१५अ—१ अंश विष्णुपुराणम्।

एवं रामायणमहाभारतादिष्वपि इन्द्रवरुणादीनामादित्यानां जन्मविवृतिरस्त्येव। अहो इत्थं बहुषु प्रमाणेषु सत्स्वपि वृथावाग्जालविस्तारपटुना दयानन्देन परप्रत्ययनेयबुद्धिना रमेशचन्द्रेण च किं न विप्रलपित मिति। वरुणः कश्चित् देवराजः, तत्तु ऋग्वेदाथर्ववेदयोरपि वर्त्तते, ग्रीकयवना अपि एकं वरुणं (मातृमनुनन्दनं) "Uranas" इति नाम्ना निर्द्दिशन्ति, तथापि "अयं मित्रः प्राणवायुः, अयं वरुणः अपानश्च" इत्थं वृथा व्याख्या दयानन्देन कृता!! श्रीमदुवटोऽपि मित्रं सोमम् इति निर्द्दिश्य प्रमादं गतः खलु।

७। प्रकृतार्थवाहिनी—अहं यजमानः इति शेषः, पूतदक्षं पूतबलं यादृशे बले सति न कोऽपि खलु दुर्बलं जनम् उत्पीड़यितुं प्रवृत्तो भवति। एवम्भूतं बलशालिनं मित्रं मित्रनामानम् एकतममदितिनन्दनं तथा रिशादसं रिशानां रिशकारिणां हिंसाकारिणाम् आदसम् सम्यक् उत्क्षेपकं (तसु दसु उत्क्षेपणे इति आपूर्वकात् दस् धातोः अच्) हिंसकविनाशकं देवं वरुणञ्च अदितिनन्दनविशेषं च (मातृमनुनन्दनविशेषं वा) हुवे आह्वयामि। तौ कीदृशौ? इत्याह—घृताचीं धियं साधन्ता।

घृतं तुषारः (वरफ—Ice इति भाषा), घृतसमुद्रः—वरफमय समुद्रः, संहतं कठिनीभूतं जलं घृतं, "तयोरित् घृतवत् पयोविप्रारिहन्ति धीतिभिः। १४। २२। १म", तस्मिन् घृते अचो गमनं घृताचः। घृते घृतोपरि अची गमनविषया या धीः बुद्धिः कौशलं सा तां घृताचीं वरफोपरिगमनोपायं साधन्ता साधयन्तौ सम्पादयन्तौ उद्भावयन्तौ इति। हिमप्रधानदेशवासिनौ मित्रावरुणौ उभौ भ्रातरौ वरफोपरिगमनाद्युपायं आविश्चक्रतुरिति भावः। ७

অনুবাদ।—আমি পূতবল মিত্র ও শত্রুসংহারকারী বরুণদেবকে আহ্বান করি, যাঁহারা বরফের উপর দিয়া গমনাগমনের বুদ্ধি বা কৌশল উদ্ভাবিত করিয়াছিলেন। ৭

I invite the inventors of the conveyance through glacial regions,—the mighty Mitra, who misuses not his noble power, and Baruna, who spares not his enemie3 but destroys them.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri Funding: MII

ऋतेन मित्रावरुणा ऋतावृधा ऋतस्पृशा।

क्रतुं बृहन्तमाशाथे। ८

१। सायणः—हे मित्रावरुणौ युवां क्रतुं प्रवर्त्तमानमिमं सोमयागम् आशाथे आनशाथे व्याप्तवन्तौ। केन निमित्तेन? ऋतेन अवश्यम्भावितया सत्येन फलेन, अस्मभ्यं फलं दातुमित्यर्थः। कीदृशौ युवां? ऋतावृधौ ऋतमित्युदकनाम सत्यं वा यज्ञं वा इति यास्कः (निरु ४।१८) उदकादीनामन्यतमस्य वर्द्धयितारौ अतएव ऋतस्पृशा उदकादीन् स्पृशन्तौ। कीदृशं क्रतुं? बृहन्तं, अङ्गैरुपाङ्गैश्च अतिप्रौढ़म्॥ ८

२। दयानन्दः—ऋतेन सत्यस्वरूपेण ब्रह्मणा ऋतमिति सत्यनामसु पठितं (निघ, ३।१०) अनेन ईश्वरस्य ग्रहणं ऋतमित्युदक-नामसु च निघ, १।१२ मित्रावरुणौ पूर्व्वोक्तौ (देवताद्वन्द्वे च अ ं ६।३।२६ अनेन आनङादेशः) ऋतावृधौ ऋतं ब्रह्म, तेन वर्द्धयितारौ ज्ञापकौ जलाकर्षणवृष्टिनिमित्ते वा। ऋतस्पृशा ऋतस्य ब्रह्मणो वेदस्य स्पर्शयितारौ प्रापकौ जलस्य च। क्रतुं सर्वं सङ्गतं संसाराख्यं यज्ञम्। बृहन्तं महान्तं। आशाथे व्याप्नुतः। ८

३। रमानाथः—हे ऋतावृधौ सत्यधर्म्मस्य पालकौ ऋतस्पृशा ऋत-स्पृशौ सत्यधर्म्मनिरतौ मित्रावरुणौ युवां बृहन्तं अङ्गैरुपाङ्गैश्च अतिप्रौढ़ं क्रतुं यज्ञम् ऋतेन सत्येन अवश्यम्भावितेन फलेन आशाथे आनशाथे व्याप्तवन्तौ। ८

४। रमेशचन्द्र—हे यज्ञवर्द्धयिता यज्ञस्पर्शी मित्र वरुण! तोमरा यज्ञफल-दानार्थ एइ वृहत् यज्ञ व्यापिया आछ। ८

५। प्रकृतार्थवाहिनी—हे ऋतावृधौ ऋतस्य सत्यस्य यज्ञस्य वा आवृधा सम्यक् वर्द्धयितारौ ऋतस्पृशा ऋतस्पृशौ सत्यस्य यज्ञस्य वा स्पृशौ स्पर्शकारिणौ नियतसत्यपरायणौ नियतयज्ञपरायणौ वा मित्रावरुणौ द्वौ भ्रातरौ देवौ ऋतेन सत्येन उपलक्षितं बृहन्तं महान्तं क्रतुं यज्ञं आशाथे आनशाथे आकाङ्क्षाथः। ८

अनुवाद।—হে মিত্র ও বরুণদেব! তোমরা সত্যপরায়ণ ও সত্যবর্দ্ধনকারী। তোমরা আমাদিগের নিকট একটী মহাযজ্ঞের অনুষ্ঠান আকাঙ্ক্ষা করিতেছ। ৮

Oh! Mitra and Baruna! you are truthful and the promoters of truthfulness. You are expecting us to perform a grand ceremony of religious worship (Jagna).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

कवी नो मित्रावरुणा तुविजाता उरुक्षया।
दक्षं दधाते अपसम्॥ ९

१। सायणः—मित्रावरुणौ एतौ देवौ नः अस्माकं दक्षं बलं अपसं कर्म्म च दधाते पोषयतः। कीदृशौ? कवी मेधाविनौ तुविजातौ बहूनामुपकारकतया समुत्पन्नौ उरुक्षया बहुनिवासौ। ९

२। दयानन्दः—कवी क्रान्तदर्शनौ सर्वव्यवहारदर्शनहेतू, (कविः क्रान्तदर्शनो भवति कवतेर्वा (निरु १२।१३, एतन्निरुक्ताभिप्रायेण कविशब्देन सुखसाधकौ मित्रावरुणौ गृह्येते)। नः अस्माकं मित्रावरुणौ पूर्व्वोक्तौ तुविजातौ बहुभ्यः कारणेभ्यः बहुषु वा उत्पन्नौ प्रसिद्धौ। (तुवीति बहुनामसु पठितं निघ ३।१)। उरुक्षया बहुषु जगत्पदार्थेषु क्षयो निवासो ययोस्तौ। दक्षं बलं दधाते धरतः अपसं कर्म्म। (अप इति कर्म्मनामसु पठितं निघ २।१)। व्यत्ययो बहुलमिति लिङ्गव्यत्ययः। इदमपि सायणाचार्य्येण न बुद्धम्। ९

३। रमानाथः—कवी मेधाविनौ तुविजाता तुविजातौ बहूनामुपकारकतया उत्पन्नौ जन्मतो बलवन्तौ उरुक्षयौ बहुनिवासौ विस्तीर्णस्थलवासिनौ मित्रावरुणौ नः अस्मभ्यं अपसं कर्म्म दक्षं बलञ्च दधाते पोषयतः दत्त इत्यर्थः। केचित्तु अपसं दक्षं कुशलबुद्धिमिति व्याचख्युः। ९

४। रमेशचन्द्र—मित्र ओ वरुण मेधासम्पन्न, बहु लोकेर हितार्थे जात ओ लोकेर आश्रयभूत, ताँहारा आमादिगेर बल ओ कर्म्म पोषण करेन। ९

स्वाभिमतम्—तुवि इति शब्दस्तु निघण्टौ बहुनामसु पठितं ३।१ एवं "अपः" कर्म्म इति च तत्र धृतं। एतौ अतीव प्राचीनवैदिकशब्दौ, अतएव एतयो र्निरुक्तं न सहजगम्यमिति। तुविशब्दस्तु पुनः कस्यापि मूलशब्दस्य कपोलचलो न वा, तदपि परिचिन्तनीयमिति। अपः कर्म्म इति च निघण्टुनिर्देशः प्रमादगर्भ इति।

५। प्रकृतार्थवादिनी—मित्रावरुणा मित्रावरुणौ द्वौ अदिति-नन्दनौ कवी कवितारचनाकुशलौ। उक्तञ्च—ब्रह्म कृणोति वरुणः। १५। १०५। १ म। कविः अजीजनत् सविता उक्थ्यं। २।५३। ४ म। ब्रह्मकृतो अमृता विश्ववेदसः। ५। ६६। १० म।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वस्तुतस्तु सर्वे देवा एव मन्त्रप्रणेतार आसन्, अतएव मित्रावरुणौ कवी इति। तुविजाता तुविजातौ तुवीनां बहूनामुपकारार्थं जातौ प्रादुर्भूतौ। उक्तञ्च—

परोपकाराय सतां हि जीवनम्, अतएव तौ परोपकारपरायणाविति। तथा उरुक्षया उरुक्षयौ उरुर्विशालः क्षयो भवनं वासस्थानं वा ययोस्तौ, नः अस्मभ्यं अपसं (न—पस्+क्विप्, तं) अपीड़नीयं अदाभ्यं दक्षं बलं दधाते पोषयतः दत्त इत्यर्थः। तौ मित्रावरुणौ अस्मान् अजेयान् कुरुतम् इति भावः। ८

মিত্র ও বরুণদেব কবি, তাঁহারা মহাজনপদ স্বর্গবাসী ও বহুলোকের হিতৈষী। তাঁহারা আমাদিগকে অপরাজেয় বলে বলীয়ান্ করুন্। ৯

The gods Mitra and Baruna are poets. They are the inhabitants of the great Paradise and they are well wishers of many people. May they favour us with unconquerable strength and power.

तृतीयं सूक्तम्।

ऋषिश्छन्दसी पूर्ववत्। देवता (१—३) अश्विनौ (४—६) इन्द्रः; (७—८) विश्वेदेवाः; (१०—१२) सरस्वती।

अश्विना यज्वरी रिषो द्रवत्पाणी शुभस्पती।
पुरुभुजा चनस्यतम्॥ १

१। सायणः—हे अश्विना अश्विनौ युवां इषो हविर्लक्षणानि अन्नानि चनस्यतम् इच्छतं भुञ्जाथामित्यर्थः। यद्यपि चनः शब्दः अन्नवाची, तथापि इष इत्यनेन सह नास्ति पुनरुक्तिदोषः। इच्छामुपलक्षयितुं प्रयुक्तत्वात्। वक्तञ्च मुवाच—समूलकाषं कषति इत्यादौ यथा पुनरुक्त्यभावः, तद्वत्। कीदृशीः इषः? यज्वरीः यागनिष्पादिकाः, कीदृशौ अश्विनौ? द्रवत्पाणी हविर्ग्रहणाय द्रवद्भ्यां पाणिभ्यामुपेतौ, शुभस्पती शोभनस्य कर्मणः पालकौ, पुरुभुजा विस्तीर्णभुजौ बहुभोजिनौ वा। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

२। दयानन्दः—अश्विना जलाग्नी; या सुरथा रथीतमा उभा देवा दिविस्पृशा। अश्विना ता हवामहे ॥ १। न हि वामस्ति दूरके यत्रा रथेन गच्छथः ॥ ४। ऋ॰ १।२२। २—४। वयं यौ सुरथौ शोभना रथा याभ्यां तौ रथीतमा भूयांसो रथा विद्यन्ते ययोस्तौ रथौ अतिशयेन रथी रथीतमौ देवौ शिल्पविद्यायां दिव्यगुणप्रकाशकौ दिविस्पृशा विमानादियानैः सूर्य्यप्रकाशयुक्तो अन्तरिक्षे मनुष्यादीन् स्पर्शयन्तौ, उभा उभौ, ता तौ, हवामहे गृह्णीमः। १। यत्र मनुष्याः वां तयोरश्विनोः साधितयोश्चालितयोः (?) सम्बन्धयुक्तेन हि यतो गच्छन्ति तत्र गृहं विद्याधिकरणं दूरं नैव भवतीति यावत्।

अथातो द्युस्थाना देवताः तासामश्विनौ प्रथमागामिनौ भवतः। अश्विनौ यत् व्यश्नुवाते सर्वं रसेन, अन्यो ज्योतिषा अन्यः अश्वैः अश्विनौ और्णवाभः तत् कौ अश्विनौ ? द्यावापृथिव्यौ इत्येके, अहोरात्रौ इत्येके सूर्य्याचन्द्रमसौ इत्येके हि मध्यमो ज्योतिर्भाग आदित्यः। निरु १२। १। तथा अश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारौ इत्यर्थः तुर्फरी तूहन्तारौ, तयोः कालः ऊर्द्ध्वमर्द्धरात्रात् प्रकाशी भावस्य अनुविष्टंभमनुतमो भागो। निरु १२।१। अथातो अत्र द्युस्थानोक्तत्वात् प्रकाशस्थाः प्रकाशयुक्ताः सूर्य्याग्निविद्युदादयो गृह्यन्ते, तत्र यौ अश्विनौ द्वौ द्वौ संप्रयुज्येते, यौ च सर्वेषां पदार्थानां मध्ये गमनशीलौ भवतः, तयोर्मध्यात् अस्मिन् मन्त्रे अश्विशब्देन अग्निजले गृह्येते। कुतः ? यदि अस्मात् जलमश्वैः स्वकीयवेगादि गुणैः रसेन सर्वं जगत् व्यश्नुते, व्याप्तवत् अस्ति। तथा अन्यः अग्निः स्वकीयैः प्रकाशवेगादिभिः अश्वैः सर्वं जगत् व्यश्नुते तस्मात् अग्निजलयोः अश्विसंज्ञा जायते। तथैव स्वकीय स्वकीयगुणैः द्यावापृथिव्यादीनां द्वन्द्वानामपि अश्विसंज्ञा भवतीति विज्ञेयम्। शिल्पविद्याव्यवहारे यानादिषु युक्त्या योजितौ सर्वकलायन्त्रयानधारकौ यन्त्रकलाभिस्ताड़ितौ चेत् तदा हननेन गमयितारौ च तुर्फरीशब्देन यानेषु शीघ्रं वेगादिगुणप्रापयितारौ भवतः। अश्विनौ इति पदनामसु पठितं निघ ५।६ अनेनापि गमनप्राप्तिनिमित्तं अश्विनौ गृह्येते। यज्वरीः शिल्पविद्यासम्पादनहेतून् इषः विद्यासिद्धये, या इष्यन्ते ताः क्रियाः। द्रवत्पाणी द्रवच्छीघ्रवेगनिमित्ते पाणी पदार्थविद्याव्यवहारा ययोस्तौ। शुभस्पती शुभस्य शिल्पकार्य्यप्रकाशस्य पालकौ शुभशुभदीप्ती एतस्य रूपमिदं। पुरुभुजा पुरूणि बहूनि भुञ्जि भोक्तव्यानि वस्तूनि याभ्यां तौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

चनस्यतं अन्नवत् एतो सेश्चेतां चायतिरन्ने ह्रस्वश्च उ० ४ २०७। अनेन असुन् प्रत्ययान्ताच्च नञ् शब्दात् क्यच् प्रत्ययान्तो नामधातोर्लोटि मध्यमस्य द्विवचने अयं प्रयोगः। १

३। रमानाथः—हे द्रवत्पाणी हविर्ग्रहणाय द्रवद्भ्यां पाणिभ्यां हस्ताभ्याम् उपेतौ शुभस्पती शोभनस्य कर्मणः पालकौ पुरुभुजा पुरुभुजौ बहुभोजिनौ प्रचुर-परिमाणदातारौ वा अश्विना अश्विनीकुमारौ युवां इमा यज्वरीर्यागनिष्पादिका इषो हविर्लक्षणानि अन्नानि चनस्यतं (चनः अन्नं इच्छति चनस्यति इति चनस्+क्यच्, सनाद्यन्तेन धातुत्वात् चनस्य लोट् तम्) इच्छतं भुञ्जाथा-मित्यर्थः। १

४। रमेशचन्द्र—हे चिप्रपाणि शुभकर्मपालक-विस्तीर्णभुजविशिष्ट अश्वि-द्वय! तोमरा यज्ञेर अन्नकामना कर। १

स्वाभिमतम्—कथमस्य मन्त्रस्य व्याख्यायां दयानन्देन विदुषा ४।२—२२ सू १म मन्त्रद्वयस्य प्रसङ्ग उपस्थापितः, तन्न वयं जानीमहे। केवलं वृथावाग्जाल-विस्तारेण तेन स्वीयभाष्यस्य पौनरुक्त्यं सम्पादितमिति। अश्विनौ किं? तत्तु केनापि निरुक्तकारेण न बुद्धं, दयानन्देनापि न तत् स्थिरीकर्त्तुं शक्यम्।

५। प्रकृतार्थवाहिनो—हे शुभस्पती शुभस्य मङ्गलस्य पती स्वामिनौ (सकारागमः छान्दसः, यद्वा असुप्रत्ययान्तः कश्चित् शुभः शब्दोऽयमिति) मङ्गल विधातारौ पुरुभुजौ पुरवो विशाला भुजा बाहवो ययोस्तौ विशालबाहू अश्विना अश्विनौ देवभिषजौ देवाना मध्वर्य्यू वा युवां द्रवत्पाणी द्रवन्तः चिप्रकराः पाणयो ययोः चिप्रहस्तौ सन्तौ यज्वरीः (यज्धातोर्ङ्वनिप् ततः ङीप्) यागनिष्पा-दिकाः इषः इट् अन्नं तानि अन्नानि यज्ञे निवेदितं नैवेद्यभोगादिकं चनस्यतम् इच्छतं भुञ्जाथामित्यर्थः। १

অনুবাদ।—হে অশ্বিনীকুমারদ্বয়! তোমরা বিশালবাহু ও অনুগতগণের মঙ্গলকারী, আমাদিগের যজ্ঞে অন্নব্যঞ্জনাদি প্রদত্ত হইয়াছে, তোমরা আসিয়া তাহা ক্ষিপ্রহস্তে গ্রহণ কর। ১

Oh! The two Sons of Asvini! You are large armed and you do good to those who depend upon you. Food has been offered unto you in the Jajna, be pleased to come and accept them with quickness.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

अश्विना पुरुदंससा नरा शवीरया धिया।
धिष्ण्या वनतं गिरः ॥ २

१। सायणः—अश्विना हे अश्विनौ युवां गिरः अस्मदीयाः स्तुतीः धिया आदरयुक्तया बुद्ध्या वनतं भजतं स्वीकुरुतं। कीदृशौ अश्विनौ? पुरुदंससा बहु कर्म्माणौ (षड्विंशतिसंख्यकेषु कर्म्मनामसु दंस इति पठितं) नरा नेतारौ। धिष्ण्या धार्ष्ट्ययुक्तौ बुद्धिमन्तौ वा, कीदृश्या धिया? शवीरया गतियुक्तया अप्रतिहतप्रसरया इत्यर्थः। २

२। दयानन्दः—अश्विना अग्निजले पुरुदंससा पुरुणि बहूनि दंसांसि शिल्पविद्यार्थानि कर्म्माणि याभ्यां तौ, नरा शिल्पविद्याफलप्रापकौ धिष्ण्या यौ यानेषु वेगादीनां तीव्रतासंपादने (संगमने?) कर्त्तव्ये धृष्टौ शवीरया वेगवत्या शवगतौ इत्यस्मात् धातोरन् प्रत्यये टापिच् शवीरा इति सिद्धं। धिया क्रियया प्रज्ञया वा। धीरिति कर्म्मप्रज्ञयोर्नामसु "वायविन्द्रश्च" इत्यत्र उक्तं। वनतं यौ सम्यग्वाणीसेविनौ स्तः। अत्र व्यत्ययः। गिरो वाचः। २

३। रमानाथः—हे पुरुदंससा पुरुदंससौ बहुकर्म्माणौ आश्चर्य्यकारकौ नरा नरौ वीरौ धिष्ण्या धिष्ण्यौ बुद्धिमन्तौ अश्विना अश्विनौ युवां शवीरया (शुगतौ+ईरन्) गतियुक्तया अप्रतिहतप्रसरया धिया आदरयुक्तबुद्ध्या गिरः अस्माकं स्तुतीर्वनतं सम्भजतं स्वीकुरुतम्। २

४। रमेशचन्द्र—हे बहुकर्म्मा नेता विक्रमशाली अश्विद्वय! तोमरा अप्रतिहत बुद्धिर सहित आमादिगेर स्तुति ग्रहण कर। २

५। प्रकृतार्थवाहिनी—हे पुरुदंससा पुरु बहु प्रचुरं दंसः कर्म्म (निघण्टु) ययो स्तौ पुरुदंससौ बहुकर्म्माणौ धिष्ण्या धिष्ण्यौ बुद्धिमन्तौ नरा नरवंशप्रभवौ अश्विनौ देवभिषजौ युवां शवीरया गतियुक्तया अप्रतिहतप्रसरया धिया बुद्ध्या गिरः अस्माकं स्तुतिवाक्यानि वनतं संभजेथां स्वीकुरुतम् इत्यर्थः। वन सम्भक्तौ।२

অনুবাদ।—হে বহুকর্ম্মা বুদ্ধিশালী নরকুলপ্রভব দেবভিষক্ অশ্বিনীকুমারদ্বয়। তোমরা দ্রুতগতি আসিয়া আমাদিগের স্তুতি স্বীকার কর। ২

Oh, the intelligent men, the physicians of the gods—the two sons of Asvini, who have performed many deeds, be pleased to come quickly and accept from praises us.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः।

आयातं रुद्रवर्त्तनी ॥ ३

१। उवटः—दस्रा युवाकवः द्वयोरश्विनो रेकस्य दस्र इति नाम अपरस्य नासत्य इति, तत्र अयं विभक्त्यर्थे आकारो विरूपैकशेषे वर्त्तते। गुणो यङ्लुको रिति च पाणिनिर्दर्शयति।

हे दस्रौ दर्शनीयौ हे नासत्यौ न असत्यौ सत्याविव न भ्रासपात इति प्रकृति भावः। युवाकवः युवां कामयमानः अहमह मेकया मां पिवतं मां पिवतम् इति। सुता अभिषुताः, वृक्तबर्हिषः प्रस्तीर्णबर्हिषः। यतः अतो ब्रवीमि। आयातम् आगच्छतम्। हे रुद्रवर्त्तनी रुद्रस्य इव वर्त्तनिर्ययो स्तौ तयोक्तौ रुद्रपन्थानौ तं प्रलथायं वेन इति प्रतीकोक्तौ। ५८क—२३ अ शुक्लयजुः।

२। सायणः—अत्र "अश्विना" इत्यनुवर्त्तते। हे अश्विनौ आयातम् अस्मिन् कर्म्मणि आगच्छतं, किमर्थम्? इति तदुच्यते। सुताः युष्मदर्थं सोमा अभिषुताः तान् स्वोकर्त्तुमिति शेषः। कीदृशौ अश्विनौ? दस्रा शत्रूणामुपक्षपयितारौ यद्वा देववैद्यत्वेन रोगाणामुपक्षपयितारौ, "अश्विनौ देवानां भिषजौ" इति श्रुतिः। नासत्या असत्यम् अनृतभाषणं तद्रहितौ। अत्र यास्कः—

सत्याविव नासत्यौ इत्यौर्णवाभः, सत्यस्य प्रणेतारौ इत्याग्रायण इति। रुद्रवर्त्तनी रुद्रशब्दस्य रोदनं—प्रवृत्तिनिमित्तं यदरोदीत् तत् रुद्रस्य रुद्रत्वं इति तैत्तिरीयाः। तत् यत् रोदयन्ति तस्मात् रुद्रा इति वाजसनेयिनः। रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्त्तनिर्मार्गौ धाटीरूपो ययोः तौ द्रुवर्त्तनी। यथा शूरा धाटीमुखेन शत्रून् रोदयन्ति। तद्वत् एतौ इत्यर्थः। "युवाकवः" इति अभिषुतसोमानां विशेषणम्। वसतीवरीभिरेकधनाभिश्च अद्भिर्मिश्रिता इत्यर्थः, वृक्तानि मूलैर्वर्ज्जितानि बर्हींषि आस्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः, यद्वा भरता इत्यादिषु अष्टसु ऋत्विङ्नामसु वृक्तबर्हिष इति। तदानीं तृतीयार्थे प्रथमा ऋत्विग्भिरभिषुता इत्यन्वयः। ३

३। महीधरः—आश्विनौ द्वयोरेकस्य दस्र इति नाम—अपरस्य नासत्य इति। हे दस्रौ! दर्शनीयौ हे नासत्या नासत्यौ न असत्यौ सत्यवादिनौ इत्यर्थः। युवाम् आयातम् आगच्छतं यतः सुताः अभिषुताः सोमा इति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

कीदृशाः सोमाः ? युवाकवः युवां कामयन्ते ते युवाकवः। मां पिवतम् इतीच्छन्तः। यद्वा युवन्ति अग्नौ मिश्रीभवन्ति युवाकवः, (कटिकुषिभ्यां काकुरिति उणा ३।७६ बहुलग्रहणात् काकुप्रत्ययः) वृक्तबर्हिषः वृक्तं बर्हिर्यत्र ते कीदृशौ युवां ? रुद्रवर्त्तनी रुद्रस्य इव वर्त्तनिः पन्था ययो स्तौ रुद्रवद्गमनशीलौ तं प्रत्नथा (७।११) अयं वेन (७। १६) एते द्वे प्रतीकोक्ते। ५८—२२ अ।

४। दयानन्दः—दस्रा दुःखानाम् उपचयकर्त्तारौ (दसु उपत्तयेषु इत्यस्मात् औणादिको रक् प्रत्ययः)। युवाकवः सम्पादितमिश्रितामिश्रितक्रियाः। (यु मिश्रणे अमिश्रणे च इत्यस्मात् धातोरौणादिक आकुः प्रत्ययः)। सुता आभिमुख्यतया पदार्थविद्यासारनिष्पादिनः। (अत्र बाहुलकात् कर्त्तृकारक औणादिकः क्त प्रत्ययः)। नासत्या न विद्यते असत्यं कर्म्म गुणो वा ययो स्तौ (न भ्राण् नपान्नवेदा ६। ३। ७५) नासत्यौ च अश्विनौ सत्यौ एव नासत्यौ इति और्णवाभः। सत्यस्य प्रणेतारौ इति आग्रायणः। (निरु ६।१३) वृक्तबर्हिषः शिल्पफलनिष्पादिनः ऋत्विजः ("वृक्त-बर्हिषः" इति ऋत्विङ्नामसु पठितं, निघ ३। १८) आ समन्तात् यातं गच्छतो गमयतः। (अत्र व्यत्ययः अन्तर्गतो ण्यर्थश्च) रुद्रवर्त्तनी रुद्रस्य प्राणस्य वर्त्तनिर्मार्गौ ययो स्तौ। ३

५। रमानाथः—हे दस्रा दस्रौ रिपूणां नाशकौ नासत्या नासत्यौ सत्यस्य प्रणेतारौ सत्यभाषिणौ वा अश्विनौ वृक्तानि मूलरहितानि बर्हींषि आस्तरणरूपाणि दर्भाणि येषां सोमानां ते वृक्तबर्हिषः मूलरहितकुशोपरिस्थिताः सुताः संस्कृताः सोमाः युवन्ति सुस्वादवृद्धार्थं वसतीवरीप्रभृतिभिः अपणद्रव्यैः मिश्रीभवन्ति ये ते युवाकवः मिश्रिताः सन्ति। हे रुद्रवर्त्तनी ! रुद्राणां शत्रुरोदनकारिणां शूराणां वर्त्तनिर्मार्गौ यशो स्तौ वीरश्रेष्ठौ इत्यर्थः आयातम् आगच्छतम् अस्मिन् यज्ञे इति शेषः। ३

६। रमेशचन्द्रः—हे दस्रद्वय ! हे नासत्यद्वय ! हे रुद्रवर्त्मन् अश्विद्वय ! मिश्रित सोमरस अभिषुत हइयाछे, छिन्नकुशे स्थापित हइयाछे, तोमरा आइस।३

स्वाभिमतम्—महीधरस्तु उवटसायणानुकारी, रमानाथोऽपि सायणानुगामी दयानन्दस्तु स्वाधीनचेताः, परन्तु स एव खलु वृथावाग्जालविस्तारकारी। एतेषां कस्यापि भाष्यं हृदयग्राहि न। निघण्टुकोषकारोऽपि नितरां असारवान्। तस्य अभिधानं अतीव अकर्म्मण्यम्। सोऽपि युवाकुशब्दस्य अर्थपरिग्रहे पश्चात्पदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

बभूव। यथा सर्वदेशीया भाष्यकाराः कठिनविषये अन्धा भवन्ति, तथानिघण्टु-रपि दुर्बोधशब्दानां प्रकृतार्थप्रकटने अन्ध आसीत्। एते भाष्यकारा अपि स्वयं न किमपि बुबुधिरे, अतस्ते अन्यानपि बोधयितुं न समर्था अभवन्। कथं वा ते रुद्रदस्रनासत्यानां नामनिरुक्तिनिर्वचनविधौ इत्थं वृथा कालक्षेपं कृतवन्तः? किं नामधारिणः सर्वे मानवा अन्वर्थनामानः?

नासत्यौ अश्विनौ दस्रौ आश्विनेयौ च तौ उभौ। इत्यमरोक्तिरेव अत्र पर्य्याप्ता। एतयोरेको नासत्यः, अन्यो दस्रः इति केचित् मन्यन्ते। यथा—

एते वयं वृत्ररिपुस्तथैतौ नासत्यदस्रौ वरुणस्तथैव। वायुपुराणम्—

पक्षान्तरे मार्कण्डेयस्तु मन्यते दस्रनासत्यौ इति नामद्वयं अश्विनीकुमार द्वयस्यैव साधारणं—

नासत्यश्चैव दस्रश्च स्मृतौ द्वौ नासतोऽश्विनौ।

वयमपि वैदिकप्रयोगप्रमाणात् इदमेव मतं साधीयो मन्यामहे। अत्र भूरिप्रयोगाश्च दृश्यन्ते। "वृक्तबर्हिषः" पदमेतत् निघण्टुकारेण ऋत्विङ्नामसु गृहीतं। यदि तत् अमूलकं न स्यात्, तर्हि तदेव सोमसवनक्रियायाः (सुताः) कर्त्तृपदं भवितुमर्हति (व्यत्ययेन)। "युवाकवः" किं? तन्न वयं बुध्यामहे। यास्कादयश्च वावदूका अपि अत्र मौनं गताः, सायणादयश्च अहृद्यं यत् किमपि अवदन्। दयानन्दस्तु तत्र प्रभूतं वृथावागाड़म्बरं कृतवान्। वस्तुतस्तु "युवाकवः" इति पदं सुतसोमानां विशेषणमिति अनुमीयते। ये पुनः सद्यः प्रसूताः (टाटका) तएव युवाकवः; रुद्रवर्त्तनी किं? रुद्रः शिव आदिभिषक् आसीत्। यथा—

दिवो वराहम् अरुषं कपर्द्दिनं त्वेषं रूपं नमसा नि ह्वयामहे।
हस्ते बिभ्रत् भेषजा वार्य्याणि शर्म्म वर्म्मच्छर्दि रस्मभ्यं यंसत्॥ १।११४।१ म

अश्विनौ तस्मादेव रुद्रात् लब्धविद्यौ, अतएव उक्तं "रुद्रवर्त्तनी अश्विनौ" इति। रुद्रस्य शिवस्य वर्त्तनिः पन्थाः चिकित्साप्रणाली ययोः स्तौ इति।

७। प्रकृतार्थवाहिनी—हे रुद्रवर्त्तनी (रुद्रस्य शिवस्य वर्त्तनिः वर्त्म चिकित्साप्रणाली ययो स्तौ) दस्रा दस्रौ रुजां क्षयकारिणौ नासत्या नासत्यौ अश्विनौ। वृक्तबर्हिषः वृक्तबर्हिभिः (वृक्तानि मूलरहितानि बर्हींषि दर्भाणि यैः) ऋत्विग्भिः अस्माभिः युवाकवः सद्यः प्रसूताः सोमा इति शेषः सुताः संस्कृताः, युवां तत्पानार्थम् आगतम् आगच्छतम्। ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

অনুবাদ।—হে রুদ্রপথবর্ত্তী দেবভিষক্ দস্রদ্বয়! আমরা সদ্যঃ সোমরস প্রস্তুত করিয়াছি, তোমরা তৎপানার্থ এখানে আইস। ৩

Oh! the two Dasras, the physicians of the devas following Siva's method of treatment, we have prepared fresh wine. (Som-juice). Be pleased to come and drink it! 3

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः।

अण्वीभि स्तना पूतासः॥ ४

१। उवटः—हे इन्द्र! आयाहि आगच्छ। हे चित्रभानो चित्रदीप्ते! किं कारणं? सुता अभिषुता इमे सोमाः त्वायवः त्वां कामयमानाः (सुप आत्मनः क्यच् च्छन्दसि इति दीर्घः) त्वायव इति सिद्धम्। न च अभिषुता एव केवलं, किं तर्हि? अण्वीभि स्तना पूतासः। अण्व इत्यङ्गुलि नाम, अङ्गुलीभिः तना च धनदानेन च पूताः पवित्रीकृताः, यद्वा तनाशब्देन दशापवित्रमभिधाय अङ्गुलीभिः दशापवित्रेण च पूता इत्यर्थः। ८७।२० अ

२। सायणः—चित्रभानो चित्रदीप्ते हे इन्द्र अस्मिन् कर्म्मणि आयाहि आगच्छ। सुता अभिषुता इमे सोमाः त्वायवः त्वां कामयमाना वर्त्तन्ते। अण्वीभिः ऋत्विजाम् अङ्गुलीभिः सुता इत्यन्वयः। किञ्च एते सोमाः तना नित्यं पूतासः पूताः शुद्धाः दशापवित्रेण शोधितत्वात्।

इन्द्रशब्दं यास्को बहुधा निर्वक्ति—इन्द्र इरां दृणाति इति वा, इरां ददाति इति वा, इरां दधाति इति वा, इरां दारयति इति वा, इरां धारयति इति वा। इन्दवे द्रवति इति वा, इन्दौ रमते इति वा, इन्धे भूतानि इति वा, तत् यदेनं प्राणैः समैन्धन् तदिन्द्रस्य इन्द्रत्वमिति। विज्ञायते इदं करणात् इति आग्रायणः। इदं दर्शनात् इति औपमन्यवः। इन्दतेर्वा ऐश्वर्य्यकर्म्मणः इन् शत्रूणां दारयिता वा, द्रावयिता दरयिता वा च यज्वनामिति।

अस्यायमर्थः—दॄ विदारणे इति धातुः इरामन्नं उद्दिश्य तन्निष्पादकजलसिद्ध्यर्थं दृणाति मेघं विदीर्णं करोतीति इन्द्रः। डु दाञ् दाने इति धातुः इरामन्नं वृष्टिनिष्पादनेन ददाति इति इन्द्रः। धाञ् पोषणार्थः इरामन्नं तृप्तिकारणं शस्यं दधाति जलप्रदानेन पुष्णाति इति इन्द्रः इरामुत्पादयितुं कर्षक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

मुखेन भूमिं विदारयति इति इन्द्रः। पूर्व्वोक्त पोषणमुखेन इरां धारयति विनाश-राहित्येन स्थापयति इति इन्द्रः। इन्दुः सोमो वल्लीरसः तदर्थं यागभूमौ द्रवति धावति इति इन्द्रः। इन्दौ यथोक्ते सोमे रमते क्रीड़ति इति इन्द्रः। ञि इन्धी दीप्तौ इति धातुः। भूतानि प्राणिदेहान् इन्धे जीवचैतन्यरूपेण अन्तःप्रविश्य दीपयति इति इन्द्रः। एतदेव अभिप्रेत्य वाजसनेयिनः आमनन्ति—

इन्धो ह वै नाम एष योऽयं दक्षिणेऽक्षन् पुरुषः तं वै एतं इन्धं सन्तम् इन्द्र इत्याचक्षते। परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इति। तत् यदित्यादिकं ब्राह्मणान्तरवाक्यम्—

तत् तत्र इन्द्रविषये निर्वचनमुच्यते इति शेषः। यत् यस्मात् कारणात् एनं परमात्मरूपम् इन्द्रं देवं प्राणैर्वाक् चक्षुरादीन्द्रियैः प्राणापानादिवायुभिश्च सहितं समैन्धन् उपासका ध्यानेन सम्यक् प्रकाशितवन्तः। तत् तस्मात् कारणात् इन्द्र नाम सम्पन्नं अस्मिन् पक्षे इध्यते दीप्यते इति कर्म्मणि व्युत्पत्तिः।

आग्रायणनामको मुनिः इदं करणात् इन्द्र इति निर्वचनं मन्यते। इन्द्रो हि परमात्मरूपेण इदं जगत् करोति। औपमन्यवनामको मुनिः इदं दर्शनात् इन्द्र इति निर्वचनमाह। इदमित्यापरोक्ष्यम् उच्यते विवेकेन हि परमात्मानम् आपरोक्ष्येण पश्यति। एतदेव अभिप्रेत्य आरण्यकाण्डे समाम्नायते

स एतमेव पुरुषं ब्रह्म ततमपश्यत् इदमदर्शमिति। ३

तस्मात् इन्द्रो नाम इन्द्रो ह वै नाम तमिन्द्रं सन्तम् इन्द्र इत्याचक्षते। परोक्षेण परोक्षप्रिया इव हि देवाः इति। इदि परमैश्वर्य्ये इति धातुः स्वमायया जगद्रूपत्वं परमैश्वर्य्यं तद्योगात् इन्द्रः। अनेन अभिप्रायेण श्रूयन्ते—

"इन्द्रो मायाभिः पुरुरूपः" इति।

इनशब्दस्य ईश्वरवाचकस्य अकारलोपे सति नकारान्तम् इन् इति पदं भवति। दॄ भये इति धातुः, स च परमेश्वरः शत्रूणां दारयिता भीषयिता इति इन्द्रः। द्रुगतौ इति धातुः शत्रूणां द्रावयिता पलायनं प्रापयिता इति इन्द्रः यज्वनां यागानुष्ठायिनाम् आदरयिता भयस्य परिहर्त्ता एवमेतानि निर्वचनानि द्रष्टव्यानीति।

३। महीधरः—मधुच्छन्दोदृष्टाः इन्द्रदेवत्याः तिस्रो गायत्र्यः। चित्रा नानाविधा भानवो दीप्तयो यस्य स चित्रभानुः। हे चित्रभानो! इन्द्र! त्वम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

आयाहि आगच्छ। किमिति? इमे सोमाः सुताः अभिषुताः, कीदृशा इमे? त्वायवः त्वां कामयन्ते त्वायवः सुपः आत्मनः क्यच् (पा ३।१।८) क्याच् छन्दसीति (पा ३।२।१७०) उप्रत्ययः।

तथा अण्वीभिः अङ्गुलीभिः तना दशापवित्रेण च पूतासः पूताः शोधिताः, तनशब्दो दशापवित्रवाचो तृतीयैकवचनस्य पूर्वसवर्णः। शोधिताः सुताः सोमाः इन्द्रः अस्मान् पिवतु इति कामयन्ते अतः अत्र आयाहि इत्यर्थः।

४। दयानन्दः—इन्द्र परमेश्वर सूर्य्यो वा। अत्र आह यास्काचार्य्य + + इन्द्राय साम गायत न इन्द्राद्दते पवते धाम किञ्चन। इन्द्रस्य नु वीर्य्याणि प्रवोचम् इन्द्रे कामा अयंसत। निरु ७।२।

इराशब्देन अन्नं पृथिव्यादिकम् उच्यते। तद्दारणात् तद्दानात् तद्धारणात् चन्द्रलोकस्य प्रकाशाय द्रवणात् तत्र रमणात् इत्यर्थे इन्द्रशब्दात् सूर्य्यलोको गृह्यते। तथा सर्वेषां भूतानां प्रकाशनात् प्राणः जीवस्य उपकरणात् अस्य सर्वस्य जगतः उत्पादनात् दर्शनहेतोश्च सर्वैश्वर्य्ययोगात् दुष्टानाम् शत्रूणां विनाशकात् दूरे गमकत्वात् यज्वनां रक्षकत्वात् च, इत्यर्थात् इन्द्रशब्देन ईश्वरस्य ग्रहणम्। एवं परमेश्वरात् विना किञ्चिदपि वस्तु न पवते तथा सूर्य्याकर्षणेन विना कश्चिदपि लोको नैव चलति तिष्ठति वा

प्र तुविद्युम्नस्य स्थविरस्य घृष्वे र्दिवो ररप्शे महिमा पृथिव्याः।
नास्य शत्रुर्न प्रतिमान मस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥ १२—१८—६ म।

यस्य अयं महाप्रकाशस्य वृद्धस्य सर्वपदार्थानां जगदुत्पत्तौ संवर्षकर्त्तुः सहनशीलस्य बहुपदार्थनिर्मातुरिन्द्रस्य परमैश्वर्य्यवतः परमेश्वरस्य सूर्य्यलोकस्य सृष्टेर्मध्ये महिमा प्रकाशते तस्य अस्य न कश्चित् शत्रुः। न किञ्चित् परिमाणसाधनमर्थात् उपमानं नैकत्राधिकरणं चास्ति। इत्यनेन उभौ अर्थौ गृह्येते।

आयाहि—समन्तात् प्राप्तोभव भवति वा चित्रभानो चित्रा आश्चर्य्यभूता भानवो दीप्तयो यस्य सः। सुताः उत्पन्नाः मूर्त्तिमन्तः पदार्थाः इमे विद्यमानाः त्वायवः त्वां तं वा उपेताः। (छन्दसीणः उ०—१।२ इत्यौणादिके उन्प्रत्यये कृते आयुरिति सिध्यति। त्वत् इत्यत्र छान्दसो वर्णलोपो वा इत्यनेन तकार लोपः)। अण्वीभिः कारणप्रकाशावयवैः किरणैरङ्गुलीभिर्वा। तना विस्तृतधन प्रदाः तनेति धननामसु पठितम्। पूतासः शुद्धाः शोधिताश्च। ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

५। रमानाथः—हे चित्रभानो विचित्रदीप्तिविशिष्ट इन्द्र! आयाहि आगच्छ। अण्वीभिः ऋत्विजामङ्गुलिभिः तना नित्यं पूतासः पूताः शोधिताः इमे सुताः सोमाः त्वाम् इच्छन्तीति त्वायवः (युष्मत् स्थाने त्वा+क्यच्+उः) भवदर्थं प्रस्तुताः सन्ति। ४

६। रमेशचन्द्र—हे विचित्रदीप्तिविशिष्ट इन्द्र! अङ्गुलिद्वारा अभिषुत नित्यशुद्ध ए (सोमरस) तोमाके कामना करितेछे, तुमि आइस। ४

स्वाभिमतम्—इन्द्रशब्दस्य व्युत्पत्तिनिर्देशविधौ यास्क दयानन्द सायणप्रिथा याष्टक् वेदविरुद्धं विप्रलापं कृतवन्तः, तन्न क्षमार्हमिति। अनेनैव वृथा वावदूकत्वेन सर्वे भारतीया भाष्यकारा उपहास्यत्वं गताः। चेत् वेदाः परमेश्वर वाक्यानि, चेत् इन्द्रः स्वयं परमेश्वरः, तत्कथं मुण्डकरूपी परमेश्वरः तस्य इन्द्रादे रीश्वरत्वं न स्वीचकार? कथं वा ऋग्वेदवक्ता स्वयं स परमेश्वर इन्द्रः, आत्मनः अस्तित्वे सन्देहं प्रकटितवान्—

प्र सु स्तोमं भरत वाजयन्तः इन्द्राय सत्यं यदि सत्यमस्ति।
नेन्द्रो अस्तीति नेम उत्व आह क ईं ददर्श कमभिष्टवामः॥ ३।८८।८ म

वस्तुतस्तु इन्द्रः अदितिनन्दनविशेषः सुरज्येष्ठो ब्रह्मा तस्य ज्येष्ठभ्राता, विष्णुपूषप्रतयोऽपि तस्य भ्रातर इति। तस्य शत्रवस्तु वृत्रप्रभृतयः असुराः, तस्य शत्रुर्नास्ति इति तु अतिवाद एव। यदुक्तं वेदमन्त्रे निरुक्ते च—शत्रुभ्यो अभवः शत्रुरिन्द्र। १६।८५। ८म

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ ४१८ पृ निरु

यदि इन्द्रस्य शत्रुर्न स्यात् यदि स्वयमिन्द्रश्च अन्येषां केषाञ्चित् शत्रुर्न भवेत् तर्हि कथमेतत् आप्तवाक्यं चरति? इन्द्रश्चेत् स्वयं परमेश्वरः तर्हि कथमित्थं मन्त्रो दृश्यते वेदेषु—

येन वै इदं स्वः मरुत्वता जितमिन्द्रेण। ४—६५—८ म।

मरुतः आफगानसैनिकाः, इन्द्रः तेषां साहाय्येन स्वर्गस्य पुनरधिकारं कृतवान्। अयमिन्द्रः परमेश्वरः, अयमेव इन्द्रः सूर्य्यः, स एव इन्द्रः अहल्याजार इति। अहो को व्यामोहः खलु भारतीयभाष्यकाराणां सायणदयानन्दादीनामिह। को वा पदार्थः पुनस्तेषां सायणशङ्करादीनां भक्ताश्चातुष्पाठिका ननु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

यद्यपि अस्मिन् मन्त्रे इन्द्रः "चित्रभानु"रिति विशेषणेन विशेषितो बभूव तथापि इदं न अवधार्य्यं यत् भानुरत्र किरणो मयूखो वा। वस्तुतस्तु भानुरत्र प्रतिभा इति। चित्रा भानवः नानाविषयिण्यः प्रतिभा यस्य स चित्रभानुः। इन्द्र वर्षणकर्त्ता, मेघवाहनः, शस्यसम्पादकश्च एतत् सर्वं कथं बुद्धिमतां वेदज्ञानां मुखात् निःसरति, तद् वयं न जानीमहे। वस्तुतस्तु इन्द्रः खलु वाहुबलेन असुरगणाधिकृतं पानीयं जलं पुनरधिकृत्य जलस्रोतः प्रवाहितवान् इति।

तना—"नित्यं सनातनं", तना—"धनदानेन (उव), तना—"विस्तृतधनप्रदाः" एतत् सर्वं व्याख्यानं नितरां प्रमादभूयिष्ठमिति। वस्तुतस्तु ऋषयः पुरा ग्रावखण्डेन सोमलतां कुट्टयित्वा पश्चात् वस्त्रखण्डेन (तनाद्वारा) शोकयित्वा (छाँकिया) अंशून् पृथक्कृत्य निर्य्यासं सोमरसं जगृहुः। अतएव इदं तनापदं "तन्तुना" पदस्य अपभ्रंश इति प्रतीयते। अस्मादेव भाषायां "तेना" शब्दः समागत इति।

७। प्रकृतार्थवाहिनी—हे चित्रभानो इन्द्र! इमे त्वायवः त्वां कामयमानाः सोमाः अण्वीभिः अस्माकमङ्गुलीभिः तना तन्तुना वस्त्रखण्डेन च पूतासः पूताः संशोधिताः। अतएव सुताः अभिषुताः, तत्पानार्थं प्रस्तुताः, त्वम् आयाहि आगच्छ। अत्रागत्य सोमं पिव। ४

অনুবাদ—হে প্রতিভাশালী ইন্দ্র! আমরা অঙ্গুলী ও তেনার সাহায্যে সোমরস প্রস্তুত করিয়া ছাঁকিয়া পবিত্র করিয়া রাখিয়াছি। এই সোমরস তোমাকে কামনা করিতেছে, তুমি তৎপানার্থ এখানে আগমন কর। ৪

Oh talented Indra! We have prepared the sacred liquor (somrash) with the help of our finger and have purified it by sieving it through rugs. This liquor wishes to receive you. Be pleased to come and drink it. (4).

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः।
उप ब्रह्माणि वाघतः॥ ५

१। उवटः—हे इन्द्र आगच्छ धिया स्वकीयया बुद्ध्या इषितः प्रेषितः अनन्य प्रेषितः इत्यभिप्रायः। विप्रजूतः जूतिर्गतिः प्रीतिर्वा मेधाव्यनुगतः सुतावतः अभिषुतवतो यजमानस्य यज्ञम्। किमिति आगन्तव्यमिति चेत्, उप समीपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

ब्रह्माणि हवींषि वर्त्तन्ते। उप पुरोडाशान् ऋत्विजो वर्त्तन्ते इत्यर्थः। वाघत इति ऋत्विङ् नामसु पठितम्। ८८ क २०अ, यजुः।

२। सायणः—हे इन्द्र त्वमायाहि अस्मिन् कर्म्मणि आगच्छ। किमर्थं? वाघत ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राणि उपैतुम्। कीदृशस्त्वं? धिया अस्मदीयया प्रज्ञया इषितः प्राप्तः अस्मद्भक्त्या प्रेरितः इत्यर्थः। विप्रजूतः—यथा यजमानभक्त्या प्रेरितः तथा अन्यैरपि विप्रैर्मेधाविभिः प्रेरितः। कीदृशस्य? वाघतः सुतावतः अभिषुतसोमयुक्तस्य। ।विप्रैर्जूतः प्राप्तः। जूरिति सौत्रो धातुः-गत्यर्थः।

३। महीधरः—हे इन्द्र धिया स्वबुद्धा इषितः प्रेरितः सन् आयाहि अनन्य प्रेरित आगच्छ इत्यर्थः। कीदृशस्त्वं? विप्रजूतः जुगतौ विप्रैर्मेधाविभिरनुगतः सेवितः। किमिति आगन्तव्यमिति चेत् सुतावतः (छान्दसो दीर्घः) सुतवतः सोममभिषुतवतो यजमानस्य ब्रह्माणि हवींषि उप हविषां समीपे वाघतः ऋत्विजो वर्त्तन्ते इति शेषः। ऋत्विजो हविरादाय स्थिताः वर्त्तन्ते इत्यायाहि इत्यर्थः।

४। दयानन्दः—इन्द्र परमेश्वर आयाहि प्राप्तो भव धिया प्रकृष्टज्ञानयुक्तया बुद्धा उत्तमकर्म्मणा वा इषितः प्रापयितव्यः विप्रजूतः विप्रैर्मेधाविभिर्विद्वद्भिर्ज्ञातः। सुतावतः प्राप्तपदार्थविद्यान् (?) उप सामीप्ये ब्रह्माणि विज्ञातवेदार्थान् ब्राह्मणान्। ब्रह्म वै ब्राह्मणः। शं (१३।१।५।३) वाघतः यज्ञविद्यानुष्ठानेन सुखसम्पादिन ऋत्विजः।

५। रमानाथः—हे इन्द्र त्वं धिया अस्मद्भक्त्या इषितः प्रेरितः विप्रैर्मेधाविभिः ऋत्विग्भिर्जूतः प्रेरितश्च सन् सुतावतः ऋत्विजो ब्रह्माणि वेदमन्त्ररूपाणि स्तोत्राणि उप उपैतुम् अस्मिन् यज्ञे आयाहि आगच्छ।

६। रमेशचन्द्र—हे इन्द्र आमादिगेर भक्तिद्वारा आकृष्ट हइया मेधावीदिगेर द्वारा आहूत हइया अभिषवकारी ऋत्विकेर स्तोत्र ग्रहण करिते आइस।

७। प्रकृतार्थवाहिनी—हे इन्द्र! त्वम् धिया अस्मत्कृतया भक्त्या इषितः प्रणोदितः तथा विप्रजूतः विप्रैः कर्त्तृभिः जूतः हूतः (भाषाविकारात् हकारस्य जकारत्वम्, (यथा—बाहु = बाजु, अहम् = अजेम् इति जेन्द) आहूतश्च सन् सुतावतः सुतवतः अभिषुतसोमस्य वाघतः (कपोलचलमेतत् वाचं हतः गतः =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

वाग्हत: वाग्मी तस्य) वाग्हतस्य वाग्घतस्य ऋत्विज: पुरोहितस्य ब्रह्माणि स्तोत्राणि श्रोतुमिति शेष: उपायाहि अस्माकं समीपे आगच्छ। विप्रजूत: विप्रै: प्रेरित: इति सायण:, तन्न हृद्यम् (८।११८। १म पश्य)। ५

অনুবাদ—হে ইন্দ্র! আমরা তোমাকে ভক্তিভরে ডাকিতেছি, ঋত্বিগ্‌গণও তোমাকে আহ্বান করিতেছেন। সোমরস প্রস্তুত করিয়া ঋষিরা তোমার স্তুতি করিতেছেন, তুমি তাহা শুনিবার জন্য আগমন কর। ৫

Oh Indra! We are inviting your presence with respect; the priests are inviting, too. The sages are praising you and they have prepared the sacred wine(Som). Be pleased to come and accept them. (5)

इन्द्रायाहि (इन्द्र आयाहि) तूतुजान उप ब्रह्माणि हरिव:।
सुते दधिष्व नश्चन: ॥ ६ ।

१। उवट:—हे इन्द्र! आगच्छ, तूतुजान: तूतुजान इति क्षिप्रनाम, क्षिप्रं त्वरमाण:, कुत्र आगच्छ इति। उप ब्रह्माणि हवींषि, हे हरिव: हरी अश्वौ तद्वन् इन्द्र! एत्य च सुते अभिषुते सोमे दधिष्व उदरेण धारयस्व, न: अस्माकं स्वभूतं चन: अन्नलक्षणम्। ८८ क—२० अ।

२। सायण:—हरिशब्द: इन्द्रसम्बन्धिनोरश्वयोर्नामधेयम्। हरी इन्द्रस्य रोहितोऽग्नेरिति, तदीयाश्वनामत्वेन पठितत्वात्। हे हरिव:! अश्वयुक्तेन्द्र! त्वं ब्रह्माणि उपेतुमायाहि। कीदृशस्त्वं? तूतुजान: त्वरमाण:। आगत्य च अस्मिन् सुते सोमाभिषवयुक्ते कर्म्मणि न: अस्मदीयं चन: अन्नं हविर्लक्षणं दधिष्व धारय स्वीकुरु इत्यर्थ:। तूतुजान:—तुजेर्लिटि लिट: कानज्वेति कानजा देश: तुजादीनां दीर्घ: अभ्यासस्य, इत्यभ्यासस्य दीर्घत्वम्। ६

३। महीधर:—हरी अश्वौ विद्येते यस्य स हरिवान् (मतुवसो रु: सम्बुद्धौ छन्दसीति पा ८।३।१ रुत्वम्) हे हरिव:! अश्ववन् इन्द्र तूतुजान: त्वरमाण: सन् त्वं ब्रह्माणि हवींषि उप हवींषि प्रति आयाहि। आगत्य च सुते सोमे अभिषुते सति न: अस्माकं चन: अन्नं सोमरूपं हवि: दधिष्व उदरे धारय।

४। दयानन्द:—इन्द्र अयं वायु: विश्वेभि: सोम्यं मध्वग्ने इन्द्रेण वायुना। ऋक् १।१४।१० अनेन प्रमाणेन इन्द्रशब्देन वायुर्गृह्यते। आ समन्तात् याहि याति समन्तात् प्रापयति। तूतुजान: त्वरमाण: उप सामीप्यं ब्रह्माणि वेदस्थानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

स्तोत्राणि, हरिवः! वेगाद्यश्ववान्, हरयो हरणनिमित्ता प्रशस्ताः किरणा विद्यन्ते यस्य सः। आभिमुख्यतया उत्पन्नौ वाग्व्यवहारौ दधिष्व दधते। नः अस्मभ्यं अस्माकं वा चनः अन्नभोजनादिव्यवहारम्। ६

५। रमानाथः—हे हरयः अस्यास्तीति हरिवः हरिनामकाश्वयुक्तेन्द्र! त्वं तूतुजानः त्वरमाणः सन् ब्रह्माणि अस्माकं स्तोत्राणि उपयाहि। नः अस्माकं सुते सोमाभिषवयुक्ते कर्म्मणि चनो हविर्लक्षणमन्नं दधिष्व धारय स्वीकुरु। ६

६। रमेशचन्द्र—हे अश्वयुक्त इन्द्र! त्वरान्वित हइया स्तोत्र ग्रहण करिते आइस। एइ सोमाभिषवयुक्त यज्ञे आमादिगेर अन्न धारण कर।

७। प्रकृतार्थ—हे हरिवः हरिवन् अश्ववन् इन्द्र! त्वं तूतुजानः त्वरमाणः सन् ब्रह्माणि अस्मत्कृतानि स्तोत्राणि उपयाहि अत्रागत्य शृणु तच्छ्रवणार्थमत्रागच्छ। तथा नः अस्माकं सुते सुतं सोमं चनः हविर्लक्षणमन्नं चरुपुरोडाशादिकं च दधिष्व (छान्दसं) धत्स्व धारय गृहाणेति यावत्।

हरिर्घोटकः अस्यास्तीति मतुप् हरिमत्। ततः "छन्दसीरः" (८।२।१५) इति सूत्रेण इवर्णान्तात् परस्य मतोर्मस्य वत्वम्। हरिवत् ततः सम्बोधने हरिवन् (सम्बुद्धौ उगिदचामिति नुम्) ततः "मतुवसो रुः सम्बुद्धौ ८।३।१ इति सूत्रेण नकारस्य रुत्वम्।

तूतुजानः तुज् धातोर्लिटि लिटः कानज् वा (३।२।१०६) तुतुजान इति। ततः तुजादीनां दीर्घः अभ्यासस्य (६।१।७) इत्यनेन "तूतुजान" शब्दः साधितः। "चनः" इति पदस्य देवराजयज्वना या व्युत्पत्तिः कृता सा न खलु प्रशस्या। निरुक्तिरस्य चिन्तनीया (किं चणकादपभ्रष्टोऽयं?—चानावत्)। ६

अनुवाद।—हे अश्ववन् इन्द्र! तुमि अति शीघ्र आमादिगेर स्तोत्रश्रवणेर जन्य एखाने आगमन कर, आसिया आमादिगेर सुत सोम ओ चरुपुरोडाशादि ग्रहण कर। ६

Oh Indra, who owns horses! Be pleased to come here quickly to hear praises offered by us and accept the sacred wine, cakes (Luchi and Parota) and frumenty offered by us. 6

ओमासश्चर्षणीधृतो विश्वे देवास आगत।
दाश्वांसो दाशुषः सुतम्॥ ७

१। यास्कः—अवितारो वा अवनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

दत्तवन्तो दत्तवतः सुतमिति। तदेतत् एकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चित् बहुदैवतं तत् वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्ग मिति शाकपूणिः। अनत्यन्तगतस्तु एष उद्देशो भवति बभ्रुरेक इति दश द्विपदा अलिङ्गाः भूतांशः काश्यपः, आश्विनमेकलिङ्गमभितष्टीयं सूक्तमेकलिङ्गं साध्या देवाः साधनात् तेषामेषा भवति। ४०१ पृ। २य भागः।

२। उवटः—वैश्वदेवं गृह्णाति। ओमासो वैश्वदेवी गायत्री। हे ओमासः! अवितारः तर्पयितारः तर्पणीया वा चर्षणीधृतः चर्षणयो मनुष्याः तान् धारयन्ति। तैर्वा ध्रियन्ते चर्षणीधृतः। विश्वे देवासः आगत, हे विश्वे देवाः ये यूयं ओमासः अवितारो रक्षितारः चर्षणीनां मनुष्याणां, तेन उपकारेण अवनीया वा तर्पणार्हा धारयितारश्च संवित्तिकर्त्तारः ते यूयं दाश्वांसः चेतसा दत्तवन्तः कृतसङ्कल्पाः भूत्वा इदं नाम अस्माभिरस्मै देयमिति ततोऽस्य दाशुषः दत्तवतो यजमानस्य एतम् अभिषुतं सोमं पातुमागच्छत इत्येवमाशास्महे। ३३क—७अ।

३। सायणः—हे विश्वदेवासः एतन्नामका देवविशेषाः दाशुषो हविर्दत्त-वतो यजमानस्य सुतमभिषुतं सोमं प्रति आगत आगच्छत। ते च देवाः ओमासो रक्षकाः चर्षणीधृतो मनुष्याणां धारकाः दाश्वांसः फलस्य दातारः। ७

४। महीधरः—वैश्वदेवं गृह्णाति शुक्रपात्रेण द्रोणकलशात् अन्वारब्धे वौमास इति। अध्वर्य्यौ यज्वना स्पृष्टे अस्पृष्टे वा सति द्रोणकलशात् शुक्रपात्रेण वैश्वदेवं ग्रहं गृह्णीयात्। वैश्वदेवी गायत्री मधुच्छन्दो दृष्टा—

हे विश्वे देवासः विश्वे देवाः यूयमागत आगच्छत, किम्भूता यूयं ? ओमासः ओमाः अवन्ति इति ओमाः, रक्षितारः अवितारो वा अवनीयाः तर्पयितारः तर्पणीया वा (अवतेर्मक् प्रत्ययः। सम्प्रसारणञ्च)। तथा चर्षणीधृतः। चर्षणयो मनुष्याः तान् धरन्ति पुष्णन्ति, तैर्वा ध्रियन्ते ते चर्षणीधृतः। (चर्षणिशब्दस्य संहितायां दीर्घः) अनिष्टनिरसनं रक्षणं इष्टप्रापणं पोषणमित्यवनधरणयोर्भेदः। तथा सुतमभिषुतं सोमं दाशुषो दत्तवतो यजमानस्य दाश्वांसः फलं दत्तवन्तः कामान् पूरयन्त इत्यर्थः। यद्वा सुतं सोमं पातुमिति शेषः। ३३। ७अ

५। दयानन्दः—ओमासो रक्षका ज्ञानिनो विद्याकामा उपदेशप्रीतयो विज्ञानतृप्तयो याथातथ्यावगमाः शुभगुणप्रवेशाः सर्वविद्याश्राविणः परमेश्वरप्राप्तौ व्यवहारे च पुरुषार्थिनः शुभविद्यागुणयाचिनः क्रियावन्तः सर्वोपकारमिच्छुका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

विज्ञाने प्रशस्ता आप्ताः सर्वशुभगुणालिङ्गिनो दुष्टगुणहिंसका शुभगुणदातारः सौभाग्यवन्तो ज्ञानवृद्धाः। अवरक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थ-याचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। ओमास इति पद नामसु पठितं चर्षणीधृतः सत्योपदेशेन मनुष्येभ्यः सुखस्य धर्त्तारः। विश्वे-देवासः, देवा दीव्यन्ति विश्वे सर्वे च ते देवा विद्वांसश्च ते। आगत समन्तात् गमयत इत्यत्र गमधातोर्ज्ञानार्थप्रयोगः। दाश्वांसः सर्वस्य अभयदातारः। दाशुषः दातुः सुतं यत् सोमादिकं ग्रहीतुं विज्ञानं प्रकाशयितुं च अभीष्टं वस्तु। अत्र रक्षाकर्त्तारः सर्वे रक्षणीयाश्च सर्वे विद्वांसः सन्ति, ते च सर्वेभ्यो विद्याविज्ञानं दत्तवन्तो भवन्तु इति। ७

६। रमा—हे ओमासः ओमाः (अव+मन्) अवन्ति रक्षन्ति ये ते ओमा रक्षकाः चर्षणीधृतो मनुष्याणां धारकाः विश्वेदेवासः विश्वे देवाः, दाश्वांसो यज्ञफलस्य दातारो यूयं दाशुषो यजमानस्य सुतमभिषुतं सोमं आगत आगच्छत। ७

७। रमेश—हे विश्वदेवगण ! तोमरा रक्षक, मनुष्यगणेर पालक, तोमरा हव्यदाता यजमानेर अभिषुत सोम ग्रहण करिते आइस। तोमरा यज्ञेर फलदाता।

स्वाभिमतम्—अत्र "विश्वेदेवाः" इत्यनेन सर्वे देवा अथवा दक्षकन्याविश्वा-गर्भप्रभवाः दश धर्म्मपुत्रा वा बोद्धव्याः इति। उक्तञ्च—

वसुमत्यौ क्रतुदक्षौ कामकालौ धृतिः कुरुः।
पुरूरवा माद्रवाश्च विश्वे देवाः प्रकीर्त्तिताः॥

"ओमासः" पदमेतत् कस्यापि मूलशब्दस्य अपभ्रष्टमिति प्रतीयते। श्रीमता देवराजयज्वना तु "अवतेः पालनार्थस्य तर्पणार्थस्य वा कर्त्तरि कर्म्मणि वा मन् प्रत्यये उमास इति प्राप्ते व्यत्ययेन गुणः जस्, रक्षितारः" इति व्याचख्ये। सायणादयोऽपि तदनुसृतवन्तः।

चर्षणीशब्दः कर्षणिशब्दस्य विकारेण (ककारस्य चकारत्वप्राप्त्या) समुत्पन्नः। कर्षति भूमिमिति कर्षणिः कृषकः। दीर्घत्वमार्षम्। दाशृ दाने इत्यस्मात् क्वसुन् भूम्नि दाश्वांसः। दाशुषः षष्ठ्या एकवचनम्।

८। प्रकृतार्थ—हे ओमास ओमा रक्षितारो रक्षकाः चर्षणीधृतः चर्षणीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

कृषकाणां धृतो धारकाः (धृ—क्विप्—धृत्, पुंभूम्नि धृतः) दाश्वांसः फलदान-समर्था विश्वेदेवा इन्द्रादयः सर्वे देवाः विश्वागर्भप्रसवा धर्मपुत्रा वा। यूयं दाशुषः हविर्दत्तवतो यजमानस्य सुतम् अभिषुतसोमं पातुमिति शेषः आगत आगच्छत। ७

अनुवाद—कृषकनरगणेर रक्षाकर्त्ता देवगण (वा विश्वेदेव सकल) तोमरा हविर्दानकारी यजमानेर सोमपानार्थ आगमन कर। ७

Oh gods! who protect the cultivating people (or oh sons of Viswa) be pleased to come to drink the sacred wine offered by the person, who performs the Jagna, and offers pure ghee unto you. 7

विश्वे देवासो अप्तुरः सुतमागन्त तूर्णयः।
उस्रा इव स्वसराणि॥ ८

१। सा—विश्वे देवासः एतन्नामका गणरूपा देवविशेषाः सुतं सोमम् आगन्त आगच्छन्त आगच्छन्तु। कीदृशाः? अप्तुरः तत्तत्काले वृष्टिप्रदाः इत्यर्थः। तूर्णयः त्वरायुक्ताः यजमानमनुग्रहीतुम् आलस्यरहिता इत्यर्थः। विश्वेषां देवानां सोमं प्रति आगमने उस्रा इत्यादिदृष्टान्तः—उस्राः सूर्य्यरश्मयः स्वसराणि अहानि प्रति आलस्यरहिताः यथा समागच्छन्ति, तद्वत्। अप्—तुर+क्विप्। ८

२। दया—विश्वे समस्ता देवासः विद्यावन्तः। अप्तुरः मनुष्याणाम् अपः प्राणान् तुतुरति विद्यादिवलानि प्राप्नुवन्ति प्रापयन्ति च ते। अयं शीघ्रार्थस्य तुरेः क्विबन्तः प्रयोगः। सुतम् अन्तःकरणाभिगतं विज्ञानं कर्त्तुं आगत आगच्छत। अयं गमेर्लोटो मध्यमबहुवचने प्रयोगः। तूर्णयः, सर्वत्र विद्यां प्रकाशयितुं त्वरमाणाः। त्रि त्वरा संभ्रमे इत्यस्मात् वहि श्रि श्रु यु द्रु ग्लाहा त्वरिभ्यो नित्। उं ४।५।२ अत्र नेरनुवर्त्तनात् तूर्णिरिति सिद्धम्। उस्रा इव सूर्य्यकिरणा इव स्वसराणि अहानि। ८

३। रमा—विश्वेदेवासो विश्वेदेवाः तूर्णयस्त्वरायुक्ता यजमानस्य अनुग्रहार्थमिति शेषः। अप्तुरः (अप्—तुर+क्विप्) वृष्टिप्रदाः यूयमस्माकं सुतं सोमं उस्रा (वस्+रक्) गावः स्वसराणि स्वगृहाणीव यथा गावः, स्वगृहान् आगच्छन्ति, तद्वत् आगन्तु आगच्छन्तु। ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

४। रश्मिश्र—येरूप सूर्य्यरश्मि दिवसे आइसे, वृष्टिदाता विश्वे देवगण त्वरान्वित हइया सेइरूप अभिषुत सोमरसे आगमन करुन। ८

स्वाभिमतम्—अस्मिन् मन्त्रे स्थितस्य "अप्तुरः" इति पदस्य सायणेन विदुषा "तत्तत्काले वृष्टिप्रदाः" इति व्याख्या कृता, घोषो रमानाथोऽपि सायणमार्गमनुसृतवान्। परं न वयं तत् साधु मन्यामहे। तत्तकालशब्देन के के कालाः संसूचिता के वा अत्र वृष्टिप्रदाः? वस्तुतस्तु "अप्तुरः—वृष्टिप्रदाः" इति न। "अपः प्राणान् तुतुरति प्रापयन्ति" इत्यपि न। अपि तु अनेनैव सायणेन मन्त्रान्तरप्रयुक्तस्य अस्य "अप्तुरः" इति पदस्य या व्याख्या कृता, तया सह एतस्य विरोधः समजनि।

१। ये अप्तुरो दिव्यासो न गृध्राः ४-११८ सू १म। तत्र सायणभाष्यम्—अप्तुरः आप इव त्वरोपिताः।

२। यज्ञेन गातुमप्तुरः। ५-२१ सू २म। तत्र सायणभाष्यम्—अपां प्रेरकाः अप्तुरः।

वयं मन्यामहे "अप्तुरः" आप इव त्वरोपिताः एतदेव सायणव्याख्यानं समीचीनं, न पुनरन्यानि। वस्तुतस्तु "तुरः" इति पदात् "वेगवन्तः" इत्येव अर्थ आयाति न पुनर्वृष्टिप्रदानत्वादिकमिति। दृश्यते च—

शूरं रथतुरं वातमिव ध्रजन्तम्। ३-३८ सू ४म।

इत्यत्रापि सायणेन—रथतुरं रथेन गच्छन्तमिति यत् व्याख्यातं, तद्धेयम्; परं रथतुरं रथवत् द्रुतरयं वातमिव ध्रजन्तं शीघ्रगं शूरम् इत्येव व्याख्या साधीयसीति। रथतुरपदात् चेत् रथवत् द्रुतगामी इत्यर्थ आयाति, तर्हि किं अप्तुरः इति पदेन अब्वत् वेगवन्तः, इत्येव अर्थो न ध्रुवमायात्येव। अथ सायणो वदति —उस्राः सूर्य्यरश्मयः स्वसराणि अहानि प्रति गच्छन्ति। परन्तु वयमेतदपि व्याख्यानं न साधु मन्यामहे। उस्र शब्देन यथा रश्मयः अवबोधिताः तथा गावोऽपि अवबोधिताः स्युरेव।

माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी॥ अमरः

अपि च स्वसराणि शब्देन अहः अवबोधितं स्यात् इति यत् निघण्टुकारेण उक्तं (तेन स्वसराणि पदम् अहर्नामसु पठितं) तदपि न समीचीनम् मन्यामहे निगमाभावात्। ८

५। प्रकृतार्थ—हे विश्वे देवासः सर्वे इन्द्रादयो देवाः विश्वापुत्रा वा भवन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

तूर्णयः कपोलचलः (Colloquial) अयं शब्दः, त्वरमाणा उस्रा गावः स्वसराणि स्वगृहानिव स्वां स्वां गोशालामिव अप्तुरः आपो जलं, तद्वत् तुरोद्रुततरयाः सन्तः सुतम् अस्माभिरभिषुतं प्रस्तुतीकृतं सोमरसं सोमरसपानार्थम् आगन्त आगच्छन्तु।

तुर्लि वेगे ततः क्विप् भूम्नि तुरः। सरन्ति गच्छन्ति एषु इति सरा गृहाः स्वाः स्वकीयाः सराः स्वसराः तान् स्वसरान्, मूले नपुंसकत्वमार्षम्।

অনুবাদ।—হে ইন্দ্রাদি দেবগণ, অথবা বিশ্বেদেব সকল, যে প্রকার গো সকল সায়ংকালে আপন আপন গোশালাতে সবেগে প্রবেশ করে, তদ্রূপ তোমরাও জলবৎ দ্রুতবেগে আমাদিগের অভিষুত সোমপানার্থ আগমন কর। ৮

Oh Indra and other gods! (or the sons of Viswa) be pleased to come here with quickness, like the flow of water, and drink this sacred wine as swiftly as the c.ttl: enter into their sheds in the evening. 8

विश्वे देवासो अस्निध एहि मायासो अद्रुहः।

मेधं जुषन्त वह्नयः॥ ९

१। सायणः—विश्वे देवास एतन्नामका देवविशेषाः मेधं हविः यज्ञसम्बन्धि जुषन्त सेवन्तां। कीदृशाः? अस्निधः क्षयरहिताः शोषरहिता वा। एहिमायासः सर्वतो व्याप्तप्रज्ञाः। यद्वा सौचीकम् अग्निम् अप्सु प्रविष्टम् एहिमायासोरिति यत् अवोचन् तदनुकरणहेतुकोऽयं विश्वेषां देवानां व्यपदेशः—एहिमायास इति। अद्रुहो द्रोहरहिताः वह्नयो वोढ़ारः धनानां प्रापयितारः। स्निधः क्षयार्थस्य शोषणार्थस्य वा सम्पदादिभ्यो भावे क्विपि नञा बहुव्रीहिः। ९

२। दया—विश्वे समस्ता देवासः वेदपारगाः अस्निधः अक्षयविज्ञानवन्तः क्षयार्थस्य नञ्पूर्वकस्य स्निधेः क्विबन्तस्य रूपम्। एहिमायासः आसमन्तात् चेष्टायां प्रज्ञा येषां ते। चेष्टार्थस्य आङ्पूर्वस्य ईहधातोः सर्वधातुभ्य इन् (उ— ४।११९) इति इन् प्रत्ययान्तं रूपम्। मायेति प्रज्ञानामसु प्रठितं, अद्रुहो द्रोहरहिताः मेधं ज्ञानक्रियामयं शुद्धं यज्ञं, सर्वैर्विद्वद्भिः शुभैर्गुणैः कर्म्मभिर्वा सह सङ्गमम्। मेध इति यज्ञनामसु पठितम्। जुषन्त प्रीत्या सेवध्वं। वह्नयः सुखस्य वोढ़ारः। वह्नयो वोढ़ारः निरु (८।३)। ९

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

३। रमा—अस्त्रिधः क्षयरहिता हिंसारहिता वा। एहिः (आ—ईह+इन्) माया प्रज्ञा येषां ते सर्वतो व्याप्तप्रज्ञाः सर्वज्ञाः इति यावत् अद्रुहो वैर-रहिताः कल्याणप्रदाः वह्नयो धनानां वाहकाः धनप्रदाः विश्वे देवाः मेध मस्माभिरर्पितं हविः जुषन्त अजुषन्त (लोडर्थे लङ्) सेवन्ताम्। ८.

४। रमेश—विश्वे देवगण क्षयरहित, श्रो सदा वर्त्तमान। ताँहारा अकल्याणरहित श्रो धनवाहक। येन ताँहारा एइ यज्ञ सेवन करेन।

५। प्रकृतार्थ—हे अस्त्रिधः (स्त्रिध् क्षये ततो भावे क्विप् स्त्रिध् क्षयः, नास्ति क्षयो येषां ते) अस्त्रिधः अमराः, मायासः माया कापट्यं, तत् अस्यन्ति क्षिपन्ति परित्यजन्तीति मायासः ते अमायिकाः सरला इति यावत्. तथा अद्रुहः द्रोहरहिताः छद्मवधरहिता अहिंसका इति यावत् विश्वे देवासः यज्ञं एहि (एकवचनं छान्दसम्) एत आगच्छत। आगत्य च वह्नयः यज्ञाग्नय इव मेधं यज्ञं अर्थात् यज्ञीयं हविरन्नम् अस्मन्निवेदितं जुषन्त जुषध्वं सेवध्वं भुङ्ग्ध्वम्।

अत्र सायणेन वास्कलेरनुरोधात्। "एहिमायासः" इति पदमेकपदं मत्वा "सर्वतो व्याप्तप्रज्ञाः" इत्यादि व्याचख्ये, तन्न समीचीनम् बभूव। ८

অনুবাদ।—হে কাপট্যরহিত দ্রোহশূন্য অমর দেবগণ তোমরা আমাদিগের এই যজ্ঞে আগমন করিয়া বহ্নির ন্যায় পবিত্র হবিঃ ভক্ষণ কর। ৯

Oh undeceitful and unspiteful immortal gods! will it please you to come to our present Jagna and feed yourselves on the pure clarified butter like the sacred fire of the Jagna. 9

पावका नः सरस्वती वाजेभिर्वाजिनीवती।
यज्ञं वष्टु धियावसुः॥ १०

१। यास्कः—पावका नः सरस्वती अन्नै रन्नवती, यज्ञं वष्टु धियावसुः कर्म्म वसुस्तस्या एषा परा भवति। ३२६ पृ २य भाग।

(क) दुर्गाचार्य्यः—मधुच्छन्दस आर्षं, प्रउगे विनियोगः सारस्वते च हविषि। पावका प्रचारयन्ति उदकेन का पुनरसौ? इति सरस्वती माध्यमिका वाक्। वाजेभिर्वाजिनीवती अन्नेन हविषो उदकेन वा तद्वती। यज्ञम् एतम् अस्माकं वाजेभिः अन्नैः युक्तं वष्टु कामयताम्। अथवा ऋगादिभावमापन्ना देवान् प्रति वहतु। वक्ष्यति हि तां विश्वरूपाः पशवो वदन्ति इति। धियावसुः कर्म्मधना। ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

२। उवटः—पावयित्री सरस्वती वाजेभिरन्नैः वाजिनीवती अन्नवती, सा नः अस्माकं यज्ञं वष्टु कामयताम्। यो हि यदिच्छति, स तत् प्रति गच्छति। धियावसुः धिया वसु धनं यस्याः सा धियावसुः। ८४ क २०अ यजुः।

३। सा—सरस्वती देवी वाजेभिः हविर्लक्षणैरन्नैर्निमित्तभूतैः, यद्वा यजमानेभ्यो दातव्यै रन्नैर्निमित्तभूतैः, नः अस्मदीयं यज्ञं वष्टु कामयताम्। कामयित्वा च निर्वहतु इत्यर्थः। तथाच आरण्यकाण्डे श्रुत्यैव व्याख्यातम्—

यज्ञं वष्टु इति यदाह यज्ञं वहतु इत्येव तदाहेति। कीदृशी सरस्वती? पावका शोधयित्री, वाजिनीवती, अन्नवत् क्रियावती, धियावसुः कर्म्म प्राप्य धननिमित्तभूता वाग्देवतायाः तथाविधं धननिमित्तत्वम् आरण्यककाण्डे श्रुत्या व्याख्यातम्—यज्ञं वष्टु धियावसुः इति वाग् वै धियावसुरिति। १०

४। मही—मधुच्छन्दोदृष्टाः सरस्वतीदेवत्याः तिस्रो गायत्र्यः। सरस्वती नः अस्माकं यज्ञं वष्टु कामयतां। वश कान्तौ, यो यत् इच्छति स तत् प्रति गच्छति, अस्मद्यज्ञं प्रत्यागच्छतु इत्यर्थः। कीदृशी सरस्वती? पावका पावयित्री पवनं पावः शोधनं घञ्, पावं कायति कथयति पावका "आतोऽनुपसर्गे कः। (पा—३।२।३) वाजेभिर्वाजैः अन्नैः वाजिनीवती वाजा अन्नानि विद्यन्ते यस्यां सा वाजिनी यज्ञक्रिया, वाजिनी विद्यते यस्याः सा वाजिनीवती यज्ञक्रियाधिष्ठात्री। धियावसुः धिया कर्म्मणा वसु धनं यस्याः सा धियावसुः छान्दसस्तृतीयाया अलुक्। ८४क—२०अ यजुः।

५। दया—पावका पावं पवित्रकारकं व्यवहारं काशयति शब्दयति या सा। पूञ पवने इत्यस्मात् भावार्थे घञ्। तस्मिन् सति कै शब्दे इत्यस्मात् "आतोऽनुपसर्गे कः"। नः अस्माकं सरस्वती सरसः प्रशंसिता ज्ञानादयो गुणा विद्यन्ते यस्यां, सा सर्वविद्याप्रापिका वाक्। सरन्ति प्राप्नुवन्ति सर्वविद्या येन तत् सरः। अस्मात् प्रशंसायां मतुप्। वाजेभिः सर्वविद्याप्राप्तिनिमित्तैरन्नादिभिः सह। वाजिनीवती सर्वविद्यासिद्धक्रियायुक्ता। वाजिनः क्रियाप्राप्तेर्हेतवो व्यवहाराः तद्वती। वाजिन इति पदनामसु पठितं (निघ—५।६) अनेन वाजिनीति गमनार्था प्राप्त्यर्था च क्रिया गृह्यते। यज्ञं शिल्पविद्यामहिमानं कर्म्म च। यज्ञो वै महिमा। शत—६।२।१८। यज्ञो वै कर्म्म, शत १।१।२।१, वष्टु कामसिद्धिप्रकाशिका भवतु। धियावसुः शुद्धकर्म्मणा सह वासप्रापिका तत्पुरुषे कृति बहुलम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

अ' ६।२।१४ अनेन तृतीयातत्पुरुषे विभक्त्यलुक्। सायणाचार्य्यस्तु बहुव्रीहिसमासमङ्गीकृत्य छान्दसोऽलुगिति प्रतिज्ञातवान् अतएव एतद् भ्रान्त्या व्याख्यातवान्। १०

६। रमा—पावं शुद्धिं कायतीति, यद्वा पुनातीति पावका शोधयित्री, वाजिनीवती अन्नवतीति यास्कः। धिया कर्म्मणा यत्सकाशात् वसु धनं लभ्यते। सा धियावसुः कर्म्म प्राप्य धननिमित्तभूता सरस्वती देवी वाजेभिर्वाजैरन्नैर्धनैर्वा। नः अस्माकं यज्ञं वष्टु कामयतां कामयित्वा सम्पादयतु। १०

७। रमेश—पवित्रा अन्नयुक्त यज्ञविशिष्टा ओ यज्ञफलरूपधनदात्री सरस्वती आमादिगेर अन्नविशिष्ट यज्ञ कामना करुन। १०

८। प्रकृतार्थ—पुनातीति पावका इत्यार्षं पाविका पूतकारिणी वाजिनीवती अश्वोमती अश्वारूढ़ा सरस्वती परमेष्ठिब्रह्मणः कन्या वाग्देवी धीः बुद्धिः ता धिया धियो वसु धनं यस्याः सा धियावसुः (अलुक्समासः) बुद्धिसम्पच्छालिनी वाजेभिः वाजैरन्नैरुपलक्षितं नः अस्माकं यज्ञं वष्टु कामयताम्॥ १०

अनुवाद।—পতিতপাবনী বুদ্ধিমতী সরস্বতী দেবী আমাদিগের এই যজ্ঞে অশ্বারোহিণে অতি দ্রুত আসিয়া যজ্ঞীয়ান্ন গ্রহণ করুন। ১০

Oh intelligent goddess Sarasvati, who purifieth the fallen! will you be pleased to ride quickly down to this Jajna on horseback, and accept the foods offered in this Jajna. (10)

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्।
यज्ञं दधे सरस्वती॥ ११

१। उ—चोदयित्री प्रेरयित्री सूनृतानां शोभनानां ऋतानां वचसां त्रयीलक्षणस्य वाग्विशेषस्य चोदयित्री इत्यर्थः। चेतन्ती चेतयमाना सुमतीनां शोभनमतीनां यज्ञं दधे धारयति सरस्वती। ८५—२० अ।

२। सा—या सरस्वती सा इयम्, इमं यज्ञं दधे धारितवती। कीदृशी? सूनृतानां प्रियाणां सत्यवाक्यानां चोदयित्री प्रेरयित्री, सुमतीनां शोभनबुद्धियुक्तानाम् अनुष्ठातॄणां चेतन्ती तदीयम् अनुष्ठेयं ज्ञापयन्ती। ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३। मही—सरस्वती यज्ञं दधे धारयति। कीदृशी ? सूनृतानां प्रियं सत्यं सूनृतं, प्रियसत्यवचनानां वेदलयोशब्दानां चोदयित्री प्रेरयित्री, चुद प्रेरणे णिजन्तात् तृच् ततो ङीप्. सुमतीनां शोभनानां बुद्धीनां चेतन्ती चेतयन्ती प्रकटयन्ती सुमतिदात्री इत्यर्थः। छन्दसि उभयथा (पा ३।४।११७) शपोऽप्यार्द्धधातुकत्वात् णिचो लोपः। ८५—२० अ।

४। दया—चोदयित्री शुभगुणग्रहणप्रेरिका सूनृतानां सुतराम् जनयति अनृतं यत् कर्म्म, तत् सून्, तद्दृतं यथार्थं सत्यं येषां ते सूनृताः तेषाम्। अत्र जनपरिहारे। अस्मात् क्विप् च इति क्विप्। चेतन्ती सम्पादयन्ती सती, सुमतीनां शोभना मतिर्बुद्धिर्येषां ते सुमतयः तेषां विदुषां यज्ञं पूर्वोक्तं दधे दधाति। छन्दसि लुङ् लङ् लिटः। अः—३।४।६ अनेन वर्त्तमाने लिट्। ११

५। रमा—सूनृतानां प्रसादानां चोदयित्री प्रेरयित्री प्रदात्री, सुमतीनाम् अनुग्रहार्णां सुबुद्धीनां वा चेतन्ती ज्ञापयन्ती, यद्वा शोभनबुद्धिशालिनाम् अनुष्ठातॄणां तदीयमनुष्ठानं ज्ञापयन्ती सरस्वती यज्ञं दधे धत्ते सम्पादयति। ११

६। रमेश—सूनृत वाक्येर उत्पादयित्री सरस्वती, आमादिगेर यज्ञ ग्रहण करियाछेन। ११

७। प्रकृतार्थ—सूनृतानां सत्यप्रियवाक्यानां चोदयित्री प्रेरणकर्त्री, तदानीन्तना जनाः सरस्वत्या उपदेशादेव सत्यभाषिणः प्रियभाषिणश्च अभवन् इति भावः। तथा सुमतीनां शोभनबुद्धीनां चेतन्ती चेतयन्ती ज्ञापयन्ती सुबुद्धिप्रदात्री सरस्वती वाग्देवी यज्ञं दधे धत्ते सम्पादयति। सरस्वतीयं च सुरज्येष्ठब्रह्मणः कन्या। ११

অনুবাদ।—সূনৃত বাক্যের প্রেরয়িত্রী, সুমতির বিধানকারিণী, দেবী সরস্বতী, আমাদিগের এই অনুষ্ঠীয়মান যজ্ঞ সম্পাদন করুন। ১১

May the goddess Sarasvati, who sends unto us truthful words, that bring pleasure along with them, and who deals unto us all good senses, come and confer suceess to this Jajna, which is now being performed. (11)

महो अर्णः सरस्वती प्रचेतयति केतुना।
धियो विश्वा विराजति॥ १२

१। यास्कः—महत् अर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्म्मणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रज्ञया वेमानि च सर्वाणि प्रज्ञानानि अभि विराजति वागर्थेषु विधीयते तस्मात् माध्यमिकां वाचं मन्यन्ते। वाक् व्याख्याता तस्या एषा भवति। ११अ—२७। ३२७ पृ २य खण्ड।

२। उ—या महत् अर्णः महान्तं (महत्?) उदकमित्यर्थः। सरस्वती प्रचेतयति प्रज्ञापयति केन हेतुना? केतुना कर्म्मणा प्रज्ञया वा। मध्यस्थाना नदी वा। धियो बुद्धीः, विश्वाः सर्वाः सर्वप्राणिषु अवस्थिताः, विराजति राजतिः दीप्त्यर्थः। अन्तर्भावितण्यर्थश्च द्रष्टव्यः। विविधं दीपयति प्रकाशयति। तां वयं स्तुमः इति शेषः। ८६—२० अ—यजुः।

३। सा—द्विविधा हि सरस्वती, विग्रहवद्देवता नदीरूपा च। तत्र पूर्वाभ्याम् ऋग्भ्यां विग्रहवती प्रतिपादिता, अनया तु नदीरूपा प्रतिपाद्यते। तादृशी सरस्वती केतुना कर्म्मणा प्रवाहरूपेण महो अर्णः प्रभूतमुदकं प्रचेतयति प्रकर्षेण ज्ञापयति। किञ्च स्वकीयेन देवतारूपेण विश्वा धियः सर्वाणि अनुष्ठातृ प्रज्ञानानि विराजति विशेषेण दीपयति। अनुष्ठानविषया बुद्धीः सर्वदा उत्पादयति इत्यर्थः। सरस्वत्या द्विरूपत्वं यास्को दर्शयति—तत्र सरस्वती इत्येतस्य नदीवद्देवतावच्च निगमा भवन्तीति। (निरु २।२३)। १२

४। महो—सरस्वती केतुना कर्म्मणा प्रज्ञया वा महो महत् अर्णः उदकं प्रचेतयति प्रज्ञापयति प्रेरयति। सर्वस्यां भूमौ वृष्टिं कारयति इत्यर्थः। किञ्च विश्वाः सर्वा धियः सर्वप्राणिस्था बुद्धीः विराजति विराजयति दीपयति सर्वजन्तुबुद्धीः प्रकाशयति तां स्तुमः। ८६—२० अ—यजुः।

५। दया—महः महत्, अत्र सर्वधातुभ्यः असुन्। इत्यसुन् प्रत्ययः। अर्णः जलार्णवमिव शब्दसमुद्रम्। सरस्वती वाणी प्र प्रकृष्टार्थे चेतयति सम्यङ् ज्ञापयति। केतुना शोभनकर्म्मणा प्रज्ञया वा केतुरिति प्रज्ञानामसु पठितम्। धियः मनुष्याणां धारणावतीर्बुद्धीः। विश्वाः सर्वाः वि विशेषार्थे राजति प्रकाशयति। अत्र अन्तर्भावितो ण्यर्थः।

६। रमा—सरस्वत्या द्विरूपत्वमत्र वर्ण्यते नदीरूपा सरस्वती केतुना स्तोतृानुष्ठितयागादिकर्म्मणा महः महत् प्रभूतमर्णः जलं प्रचेतयति, जनान् प्रज्ञापयति। देवीरूपा सरस्वती विश्वा धियः अनुष्ठातॄणां सर्वाणि प्रज्ञानानि विराजति विशेषेण प्रकाशयति अनुष्ठानविषया बुद्धीरुत्पादयति इत्यर्थः। १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

७। रमेश—सरस्वती प्रवाहित हइया प्रभूत जल सृजन करियाछेन, एवं सकल ज्ञान उद्दीपन करियाछेन।

स्वाभिमतम्—नदी सरस्वती पश्चात् वाग्देवी अभवत् मतमेतत् मुइर-प्रभृतीनां भित्तिहीनमिति। वस्तुतस्तु एका सरस्वती सलिलमयी जड़नदी भारत-प्रसिद्धा, द्वितीया सरस्वती सुरज्येष्ठब्रह्मणः कन्या विष्णुरस्टहिणी। सैव विद्यावत्तया "वाक्" इति उपाधिं लब्धवती। सा पितृधर्षणात् कियत्कालम् अपोगस्थानवासिनी आसीत्। सैव विद्याया अधिष्ठात्री देवता इति कल्पयित्वा आराधिता। अत्र सरस्वती नदीतीरे यागकारी कश्चित् ऋषिः तयोः पार्थक्यं प्रदर्शयितुमिदमाह।

८। प्रकृतार्थं—इयं सरस्वती भारतवर्षीयनदीविशेषो, ब्रह्मणः कन्याविशेषश्च। सरस्वती नदीयं ब्रह्मावर्त्तदेशप्रान्तवाहिनी केतुना प्रवाहरूपेण चिह्नेन महः अर्णः प्रभूतं जलं प्रचेतयति ज्ञापयति सरस्वत्यां नद्यां यादृक् उत्तालतरङ्गो वेगवान् प्रवाहश्च तेन चिह्नेन एतत् प्रतीयते यत् सरस्वती प्रभूतजलशालिनी एव। तथा असौ पूर्वोक्ता सरस्वती वाग्देवी च केतुना प्रज्ञया विश्वा धियः सर्वा बुद्धीर्विराजति प्रकाशयति। १२

অনুবাদ।—সরস্বতী নদী উর্ম্মিমালাবিস্তার ও প্রবল প্রবাহদ্বারা জানাইতেছে যে উহা প্রভূত জলশালিনী এবং দেবী সরস্বতীও আপনার মহীয়সী প্রজ্ঞাদ্বারা জগতে নানাপ্রকার মনীষা প্রকাশ করিতেছেন। ১২

The river Sarasvati with her swarming waves and her strong current relates that she has an enormous volume of water, so the goddess Sarasvati through her illustrious intelligence introduces a variety of acts of merit to this world. (12)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

चतुर्थं सूक्तम् ।

मधुच्छन्दा ऋषिः, इन्द्रो देवता, गायत्रीच्छन्दः ।

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यविद्यवि ॥ १

१। सा—सुरूपकृत्नुं शोभनरूपोपेतस्य कर्म्मणः कर्त्तारम् इन्द्रम् ऊतये अस्मद्रक्षार्थं द्यवि द्यवि प्रतिदिनं जुहूमसि आह्वयामः। आह्वाने दृष्टान्तः— गोदुहे गोधुगर्थं सुदुघामिव सुष्ठु दोग्ध्रीं गामिव। यथा लोके गोर्यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गाम् आह्वयति तद्वत्। १

२। दया—सुरूपकृत्नुं य इन्द्रः सूर्य्यः सर्व्वान् पदार्थान् स्वप्रकाशेन सुरूपान् करोतीति तम्। इन्द्रो दिवः, इन्द्र ईशे पृथिव्याः। न इन्द्रादृते पवते धाम किञ्चन। निरु ७।२। अहमिन्द्रः परमेश्वरः सूर्य्यं पृथिवीञ्च ईशे रचितवान् अस्मि। इति तेन उपदिश्यते। तस्मात् इन्द्रात् विना किञ्चिदपि धाम न पवते न पवित्रं भवति। ऊतये विद्याप्राप्तये। अवधातोः प्रयोगः सुदुघामिव—यथा कश्चित् मनुष्यः बहु दुग्धदात्र्याः गोः पयो दुग्ध्वा स्वाभीष्टं प्रपूरयति, तथा। गोदुहे— गोर्दोग्ध्रे दुग्धादिकमिच्छवे मनुष्याय। जुहूमसि स्तुमः। बहुलं छन्दसि अ २।४।७६ अनेन शपः स्थाने श्लुः अभ्यस्तस्य सम्प्रसारणम्। द्यवि द्यवि दिने दिने।१

३। रमा—गोदुहे गोदोहनाय सुदुघां (सु—दुह+कप् घश्च) सुष्ठु दोग्ध्रीं गामिव। वयम् अस्माकम् ऊतये रक्षणाय द्यवि द्यवि प्रतिदिनं सुरूपस्य शोभनयज्ञादि सत्कर्म्मणः कृत्नुं कर्त्तारं पालयितारमिन्द्रं जुहूमसि आह्वयामः प्रार्थयामहे। १

४। रमेश—येरूप दोहक दोहनहेतु प्रदुग्धवती गाभीके आह्वान करे, आमराओ सेइरूप रक्षार्थ दिने दिने शोभनकर्म्मा इन्द्रके आह्वान करि।

स्वाभिमतम्—दयानन्दस्तु अत्र अकाण्डे वृथा वाग्जालविस्तारं कृतवान्। इन्द्रः सूर्य्यः, स च ईश्वरः मन्त्रेऽस्मिन् इत्थं किमपि नास्त्येव।

यथा लोका गोदुहे गोदोहनार्थं सुदुघां सुदोग्ध्रीमक्लेशदोहनीयां गामिव आह्वयन्ति, तथा वयमपि ऊतये अस्मद्रक्षार्थं सुरूपकृत्नुं शोभनकर्म्मकर्त्तारम् इन्द्रं देवराजं द्यवि द्यवि दिवा दिवा प्रतिदिनं जुहूमसि आह्वयामः। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

অনুবাদ।—যে প্রকার লোক সকল গোদোহনকালে সুখদোহনীয় গাভীকে আহ্বান করে, তদ্রূপ আমরাও আমাদিগের রক্ষার নিমিত্ত প্রতিদিন শোভনকর্ম্মা ইন্দ্রকে আহ্বান করিব। ১

As people invite a cow, that can be milked with ease, at the time of milking, so would we invite Indra, the Doer of splendid deeds, everyday, for our protection. (1)

उप नः सवना [आ] गहि, सोमस्य सोमपाः पिब।
गोदा [:] इत् रेवतो मदः॥ २

१। सा—हे सोमपाः सोमस्य पातः इन्द्र सोमं पातुं नः अस्मदीयानि सवना त्रीणि सवनानि प्रति उप समीपे आगहि आगच्छ। आगत्य च सोमस्य सोमं पिब। रेवतो धनवतस्तव मदो हर्षो गोदा इत् गोप्रद एव। त्वयि हृष्टे सति, अस्माभिर्गावो लभ्यन्ते इत्यर्थः। २

२। दया—उप सामीप्ये नः अस्माकं सवना ऐश्वर्य्ययुक्तानि वस्तूनि प्रकाशयितुं आगहि—आगच्छति। शपो लुकि सति वा छन्दसीति हेरपित्वात् अनुदात्तोपपदेशं ६।४।३७। इत्यनुनासिकलोपः। लङर्थे लोट् च। सोमस्य उत्पन्नस्य कार्य्यभूतस्य जगतो मध्ये सोमपाः सर्वपदार्थरच्चकः सन् पिब पिबति। अत्र व्यत्ययः लङर्थे लोट् च। गोदाः चक्षुरिन्द्रियव्यवहारप्रदः। जीवो येन रूपं जानाति तस्मात् चक्षुर्गौः। इत् एव। रेवतः पदार्थप्राप्तिमतो जीवस्य। छन्दसीर इति। मदः—हर्षकरः। २

३। रमा—हे सोमपाः सोमपानशील इन्द्र त्वं नः (सूयते सोम एषु) सवनानि तानि आगहि सोमाभिषवयुक्तान् प्रातर्माध्यन्दिनतृतीयाभिधान् त्रीन् यागान् आगच्छ। सोमस्य सोमं पिब च। रयिर्धनमस्यास्तीति रेवान् (रयि—मतुप्) तस्य रेवतो धनवतस्तव मदः सोमपानजनितो हर्षो गोदा गोप्रद इत् एव भवति। त्वयि सोमेन प्रीते अस्माभिर्गावो लभ्यन्ते इत्यर्थः। २

४। रमेश—हे सोमपायी इन्द्र आमादिगेर अभिषवेर निकटे आसिया सोमपान कर, तुमि धनवान्, तुमि हृष्टमने गाभो दान कर। २

स्वाभिमतम्—अत्रापि दयानन्देन वृथा भ्रान्तिभङ्गः कृतः। आगहि इत्यादि पदकदम्बकं कपोलचलं प्राथमिकञ्च। अर्थश्च अस्य आगच्छ इति। अस्मादेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वङ्गभाषायां आगुयाओ आगुयाओ, एगोय इत्यादि कपोलचलपदं प्रसूतमिति। दयानन्दोऽपि परवर्त्तिनि मन्त्रे आगहि "आगच्छ" इति प्रकृतां व्याख्यां चक्रे।

५। प्रकृतार्थ—हे सोमपाः (सोमं पिबतीति पा धातोः क्विप् ततः सुः) सोमपानकारिन् इन्द्र! नः अस्माकं सवना त्रिसवनानि (प्रातःसवनं माध्यन्दिनसवनं सायं सवनञ्च) उप उपस्थितानि त्रैकालिकयज्ञाः समारब्धाः त्वम् आगहि आगच्छ। आगत्य च सोमस्य (विभक्तिव्यत्ययः) सोमं पिब। सोमपानं कुरु। इत् इति चेत् रेवतः रयिवतः रैवतो वा (रयिः रैश्च धनमिति निघण्टुः) धनशालिनस्तव मदः सोमपानजो हर्षो भवेत् तर्हि हृष्टश्च त्वं गोदाश्च स्याः अस्मभ्यं गोदानं धनदानञ्च करिष्यसि। २

অনুবাদ।—হে সোমপানকারী ইন্দ্র! আমরা ত্রৈকালিক যজ্ঞ আরম্ভ করিয়াছি। তুমি আসিয়া সোমপানে হৃষ্ট হইয়া আমাদিগকে ধন ও গো দান কর। ২

Oh som-drinking Indra! we have started a Jajna, that will last throughout the morning, noon and evening. Be pleased to come and be so satisfied by drinking the offered sacred wine as to confer riches and cattle unto us. (2)

अथा ते अन्तमानां विद्याम सुमतीनाम्।
मा नो अति ख्य [:] आगहि॥ ३

१। सा—अथ सोमपानानन्तरं हे इन्द्र ते तव अन्तमानां अन्तिकतमानां अतिशयेन समीपवर्त्तिनां सुमतीनां शोभनमतियुक्तानां पुरुषाणां मध्ये स्थित्वा विद्याम वयं त्वां जानीयाम। यद्वा सुमतीनां शोभनबुद्धीनां कर्म्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः। बुद्धिलाभाय त्वां स्मरेम इत्यर्थः। त्वमपि नः अति मा ख्यः अस्मान् अतिक्रम्य अन्येषां त्वत्स्वरूपं मा कथय। किन्तु आगहि अस्मानेव आगच्छ। ३

२। दया—अथ अनन्तरार्थे। निपातस्य च इति दीर्घः। ते तव अन्तमानां अन्तः सामीप्य मेषामस्ति ते अन्तिका अतिशयेन अन्तिकाः अन्तमा तत्समागमेन। अत्र अन्तिकशब्दात् तमपि कृते पृषोदरादित्वात् तिक लोपः। "अन्तमानाम्" इत्यन्तिकनामसु पठितम्। निघ २।१६। विद्याम जानीयाम सुमतीनां वेदादिशास्त्रे परोपकारे धर्म्माचरणे च श्रेष्ठा मतिर्येषां मनुष्याणाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

मतय इति मनुष्यनामसु पठितम्। निघ २।३। मा निषेधार्थे नः अस्मान् अतिख्यः उपदेशोल्लङ्घनं मा कुर्य्याः आगहि आगच्छ। ३

३। रमा—अथा अथ वयं ते तव अन्तमानाम् अन्तःस्थानां उत्तमानां सुमतीनां अनुग्रहाणां विद्याम जानीयाम। तवानुग्रहान् लभेमहि इत्यर्थः। नः अस्मान् अति अतिक्रम्य मा ख्यः अख्यः (ख्या+लुङ् सिप्) स्वानुग्रहं न प्रकथय न प्रकाशय। आगहि अस्मत्समीपमागच्छ। ३

४। रमेश—आमरा येन तोमार समीपवर्त्ती सुमतिदिगेर मध्ये थाकिया तोमाके जानिते पारि, आमादिगके अतिक्रम करिया (अन्येर मध्ये आपनाके) प्रकाश करिओ ना। (आमादिगेर निकट) आइस। ३

५। प्रकृतार्थं—हे इन्द्र! अथ अनन्तरं चेत् सोमपानेन तव हर्षो जायते तर्हि वयं ते तव अन्तमानां सुमतीनाम् अन्तिकतमाः अन्तःस्थाः सुमतीः तव शुभबुद्धीः आ विद्याम सम्यक् लभेमहि। त्वं नः अस्मान् अति अतिक्रम्य मा ख्यः (ख्या—लुङ्+सिप्) अन्यत्र मा ख्यातो भव त्वम् आगहि आगच्छ। ३

অনুবাদ।—হে ইন্দ্র! আমরা যেন তোমার শুভ বুদ্ধি সকল লাভ করি। তুমি আমাদিগকে ছাড়িয়া অন্যের নিকট যাইয়া খ্যাত হইও না। তুমি আমাদিগের নিকট আগমন কর। ৩

Oh Indra! may we own all the good senses you have. Please do not leave us and get yourself known to others. Be pleased to come to us. (3)

परेहि (परा-इहि) विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्।
यस्ते सखिभ्य आ वरम्॥ ४

१। सा—अत्र यजमानं प्रति होता ब्रूते। हे यजमान! त्वम् इन्द्रं परेहि इन्द्रस्य समीपे गच्छ। गत्वा च विपश्चितं मेधाविनं होतारं मां पृच्छ। असौ होता सम्यक् स्तुतवान् न वा इति एवं प्रश्नं कुरु। य इन्द्रस्ते तव यजमानस्य सखिभ्यः ऋत्विग्भ्यः वरं श्रेष्ठं धनपुत्रादिकं आसमन्तात् प्रयच्छति इति शेषः। तादृशमिन्द्रमिति पूर्वत्रान्वयः। पुनरपि कीदृशं? विग्रं मेधाविनं अस्तृतं अहिंसितम्। ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

२। दया—परा पृथक्, इहि भव, विग्रं मेधाविनं वेर्ग्रो वक्तव्य इति वेः परस्य अनासिकायाः स्थाने ग्रः समासान्तादेशः। उपसर्गाच्च ५।४।११९। इति सूत्रस्य उपरि वार्त्तिकम्। अस्तृतं अहिंसकम् इन्द्रं विद्यया परमैश्वर्य्ययुक्तं मनुष्यं पृच्छ। सन्देहान् दृष्ट्वा उत्तराणि गृहाण। विपश्चितं विद्वांसं य आप्तः सन् उपदिशति। पुनरुक्त्या आप्तत्वादिगुणवत्त्वं गृह्यते। ते तुभ्यं सखिभ्यः मित्रस्वभावेभ्यः आ समन्तात् वरं परमोत्तमं विज्ञानधनम्। ४

३। रमा—हे यजमान! य इन्द्रः ते सखिभ्यः आ सम्यक् वरं श्रेष्ठो भवति, तं विग्रं मेधाविनं अस्तृतं हिंसारहितं विपश्चितं सर्वज्ञमिन्द्रं परेहि उपसर्प, उपसर्पणानन्तरं पृच्छा पृच्छ इन्द्रं त्वामनुग्रहीतुं निवेदय। शिष्टं सायणस्य।

४। रमेश - अजेय ओ मेधावी इन्द्रेर समीपे याओ। एइ मेधावीर कथा जिज्ञासा कर। सेइ इन्द्र तोमार बन्धुदिगके श्रेष्ठ धन दान करेन।

५। प्रकृतार्थ—अत्र यजमानं प्रति कश्चित् होता ब्रूते—हे यजमान! य इन्द्रस्ते तव सखिभ्यः सर्वेभ्यो बन्धुभ्यः आवरम् आ सम्यक् वरम् अपिच्छान्दतोत्-कृष्टः (वरमव्ययम्) सम्यक् श्रेष्ठः त्वं तमेव विग्रं (विग्रो मेधावीति निघण्टुः) मेधाविनं तथा अस्तृतं केनापि अरचितं यः स्वयमेव आत्मनोरक्षणसमर्थस्तं (न स्तृतः तं स्तृणोति जीवयति रक्षति इति स्तृ धातोः क्तः) विपश्चितं पण्डितमिन्द्रं परेहि इन्द्रस्य समीपं गच्छ तमेव पृच्छ। ४

অনুবাদ।—হে যজমান! পৃথিবীর সকল বন্ধু অপেক্ষা ইন্দ্রই তোমার শ্রেষ্ঠ বন্ধু। তোমার কোন বিষয় জানিতে হইলে তুমি সেই মেধাবী আত্মরক্ষণসমর্থ পণ্ডিত ইন্দ্রের নিকট যাইয়া জিজ্ঞাসা কর ও তাঁহারই শরণ লও। ৪

Oh Yajmana! of all your worldly friends, Indra is the worthiest. If you want to know anything, go and take refuge and inquire of that wise, intelligent and invincible Indra. (4)

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत।
दधाना इन्द्र (इन्द्रे) इद्दुवः॥ ५

१ सा—नः अस्माकं सम्बन्धिनः ऋत्विज इति शेषः। ते ब्रुवन्तु इन्द्रं स्तुवन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

उत अपि च हे निदः निन्दितारः पुरुषाः निरारत इतोदेशात् निर्गच्छत अन्यतश्चित् अन्यस्मादपि देशात् निर्गच्छत। कीदृशाः ऋत्विजः? इन्द्रे दुवः परिचर्य्यां दधानाः कुर्वाणाः इच्छन्दः अवधारणे। सर्वदा परिचर्य्यां कुर्वन्तः एव तिष्ठन्तु इत्यर्थः। निन्दन्ति इति निदः। निदि कुत्सायां क्विप्। नुमभाव श्छान्दसः। ५

२। दया—उत अप्येव ब्रुवन्तु सर्वा विद्या उपदिशन्तु नः अस्मभ्यं निदः निन्दितारः, निदि कुत्सायाम् अस्मात् क्विप्। छान्दसो वर्णलोपो वेति नलोपः। निः नितराम् अन्यतः देशात् चित् अन्ये आरत गच्छन्तु। व्यवहिताश्च इत्युपसर्गव्यवधानम् अत्र व्यत्ययः। दधानाः धारयितारः इन्द्रे परमैश्वर्य्ययुक्ते परमेश्वरे इत् इतः इयते प्राप्यते सः अयम् इत् देशः। अत्र कर्म्मणि क्विप्। ततः सुपां सुलुक् इति ङसेर्लुक्। दुवः परिचर्य्यायाम्। ५

३। रमा—उतापि च निन्दन्तीति निदः, निन्दितारः पुरुषाः नः अस्मान् ब्रुवन्तु, किं ब्रुवन्तु? इत्यपेक्षायामाह—निरिति इन्द्र इत् इन्द्रे एव केवलं दुवो दधानाः परिचर्य्यां कुर्वाणाः यूयम् अन्यतश्चित् अन्येभ्यो देवेभ्यो निरारत, (निः—ऋ+लुङ् त) निर्गताः तेषां पूजां न चक्र इति भावः। शिष्टं सायणमतम्। ५

४। रमेश—आमादिगेर (ऋत्विकेरा) इन्द्रेर परिचर्य्या करिया ताँहाके स्तुति करुन। हे निन्दुकगण! (एइ देश हइते) एवं अन्य देश हइतेओ दूर हइया याओ। ५

स्वाभिमतम्—दयानन्दमतं व्याहतं रमानाथमतं युक्तियुक्तं सायणादपि इति प्रतीयते।

५। प्रकृतार्थ—उत अपि च नः अस्माकं निदः निन्दाकारिणो जना आर्य्यीभूता असुरीभूताश्च देवा वृत्रादयः ब्रुवन्तु कथयन्तु निन्दन्तु तेषां देवद्वेषिणां निन्दया मनसि नो न कापि ग्लानिर्भवति। ते किमुक्ता निन्दन्ति? त इत्याह—"यूयं अन्यतः अन्यान् देवान् निरारत। (निः—आ—ऋ+लुङ् त) परिहृतवन्तः केवलमिन्द्रे देवराजे दुवः (दुवस्यति परिचरति) परिचर्य्यां दधाना इत् इति उक्ता निन्दन्ति। ५

অনুবাদ।—হে ইন্দ্র! আমরা অন্যান্য দেবগণকে পরিত্যাগ করিয়া কেবল তোমারই

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

সেবা করিয়া থাকি, একারণ নিন্দক অসুরগণ আমাদের নিন্দা করিয়া বেড়াইতেছে। তাহারা নিন্দা করুক, আমরা সে নিন্দা গ্রাহ্য করিব না। ৫

Oh Indra! we discarding other gods, worship you alone and for this the blasphemous Asuras are blaming us. Let them do so we will turn a deaf ear to those infamies. (5)

उत नः सुभगाँ (सुभगान्) अरिर्वोचेयुर्दस्म कृष्टयः।
स्यामेत् इन्द्रस्य शर्म्मणि ॥ ६

१। सा—हे दस्म शत्रुणामुपक्षयितः इन्द्र! त्वदनुग्रहात् अरिः उत शत्रवोऽपि नः अस्मान् सुभगान् शोभनधनोपेतान् वोचेयुः उच्यासुः, कृष्टयो मनुष्याः, अस्मन्मित्रभूताः वदन्ति इति किमु वक्तव्यम् इति शेषः। ततो धनसम्पन्ना वयम् इन्द्रस्य शर्म्मणि इन्द्रप्रसादलब्धे सुखे स्याम इत् भवेम एव। ६

२। दया—उत अपि नः अस्मान् सुभगान् शोभनो भगो विद्यैश्वर्य्ययोगो येषां तान्, भग इति धननामसु पठितम्। निघ २।१० अरिः शत्रुः वोचेयुः सम्प्रीत्या सर्वा विद्याः सर्वान् प्रति उपदिश्यासुः। वचेराशिषि लिङि प्रथमस्य बहुवचने। दस्म दुष्टस्वभावोपक्षेतः, दसु उपक्षये मक् प्रत्ययः। कृष्टयो मनुष्याः कृष्टय इति मनुष्यनामसु पठितम्। निघ २।३ स्याम भवेम। इत् एव इन्द्रस्य परमेश्वरस्य शर्म्मणि नित्यसुखे। ६

३। रमा—हे दस्म शत्रुक्षयकारिन् इन्द्र! उत अपि च अरिः अरयः शत्रवः कृष्टयो मनुष्याः नः अस्मान् सुभगान् सौभाग्यशालिनो वोचेयुः (वच् आशीर्लिङ्) उच्यासुः इन्द्रस्य इत् एव शर्म्मणि शरणे इन्द्रप्रसादलब्धे सुखे वा स्याम वर्त्तेमहि। ६

४। रमेश—हे शत्रुक्षयकारक! शत्रुरा येन आमादिगके सौभाग्यशाली कहे। (आमादिगेर मित्रपक्षीय) मनुष्येरा (त बलिबेन)। येन आमरा इन्द्रेर प्रसादलब्ध सुखे वास करि। ६

५। प्रकृतार्थ—हे दस्म शत्रुक्षयकारिन् (तसु दसु उत्क्षेपणे इत्यस्मात् दस् धातोर्मः, तत्सम्बुद्धौ) इन्द्र! उत अपि वा अरिः अरयः (वचनव्यत्ययः) कृष्टयो मनुष्याः कृषकाः असुरा इति यावत् नः अस्मान् सुभगान् सौभाग्यशालिनो वा वोचेयुः (वच् धातोराशीर्लिङ्) वयं तेषां स्तुतिनिन्दाभ्यां न संक्षुब्धा भवामः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अपितु वयम् इन्द्रस्य तवैव शर्म्मणि गृहे आश्रये इति यावत् स्याम (अस् धातोर्लोट् याम) तिष्ठाम।

অনুবাদ।—হে শত্রুক্ষয়কারী ইন্দ্র! অথবা ভূমিকর্ষণকারী সাধারণ লোক অসুরেরা আমাদিগকে সৌভাগ্যবান্ বলুক, আমরা উহাদের নিন্দা বা স্তুতিতে বিচলিত হইবার নহি। আমরা একমাত্র তোমারই আশ্রয়ে থাকিব। ৬

Oh Indra! Destroyer of enemies, let the cultivating Asuras speak of us as fortunate, we shall not be moved by their praise or infamy. We shall remain only under your protection. (6)

एमाशु (आ—ईम्—आशुम्) माशवे भर यज्ञश्रियं नृमादनम्। पतयन्मन्दयत्सखम् ॥ ७

१। सा—ईम् इति निपातः, इदं शब्दार्थे वर्त्तते। हे यजमान! आशवे कृत्स्न सोमयागव्याप्ताय इन्द्राय ईम् आभर इमं सोमम् आहर। कीदृशं सोमं? आशुं सवनत्रयव्याप्तं यज्ञश्रियं यज्ञस्य सम्पद्रूपं नृमादनं नृणाम् ऋत्विग्यजमानानां हर्षहेतुं पतयत् पतयन्तं कर्म्मणि प्राप्नुवन्तं मन्दयत्सखं य इन्द्रो मन्दयति यजमानान् हर्षयति तस्मिन् इन्द्रे सखिभूतः अयं सोमः तत्प्रीतिहेतुत्वात् तृप्तिहेतुत्वात् वा। ७

२। दया—आ अभितः ईं जलं पृथिवीं च ईमिति जलनामसु पठितं निघ १।१२ पदनामसु च। निघ ४।२। आशुं वेगादिगुणवन्तम् अग्निवाय्वादिपदार्थसमूहम्। आशु इति अश्वनामसु पठितम्। निघ १।१४। आशवे यानेषु सर्व्वानन्दस्य वेगादिगुणानां च व्याप्तये भर सम्यक् धारय प्रदेहि। यज्ञश्रियं चक्रवर्त्तिराज्यादेर्महिम्नः। श्रीर्लक्ष्मीः शोभा। राष्ट्रं वा अश्वमेधः। शं १३।१। ६।३ अनेन यज्ञशब्दात् राष्ट्रं गृह्यते। यज्ञो वै महिमा। शं ६।२।३।१८। नृमादनं माद्यन्ते हर्षन्ते अनेन तत् मादनं नृणां मादनं नृमादनं पतयत् यत् पतिं करोतीति पतित्वसम्पादकं तत्, तत्करोति तदाचष्टे इति पतिशब्दात् णिच्। मन्दयत्सखं मन्दयन्तो विद्याज्ञापकाः सखायो यस्मिन् तत्। ७

३। रमा—यज्ञस्य श्रियं सम्पद्रूपं नॄन् मादयति इति नृमादनं नराणां हर्षजनकं पतयन्तं कर्म्मणि प्राप्नुवन्तं व्यवहार्य्यमिति यावत्, मन्दयतो धनदाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIL

दिना यजमानान् हर्षयतः इन्द्रस्य सखा मन्दयत्सखः तं इन्द्रस्य सखिवत् प्रियमिति यावत्। ईमितं ईमिति अव्ययम् इदं शब्दार्थे वर्त्तते। आशुं सवनत्रयव्याप्तं सवनेषु प्रयुक्तमिति यावत्। यद्वा त्वरया संस्कृतं सोममाशवे कृत्स्नसोमयागव्याप्ताय शीघ्रगामिने वा इन्द्राय आभर आहर। ७

४। रमेश—ए सोमरस व्यापनशील ओ यज्ञेर सम्पद्रूप। इहा मनुष्यके हृष्ट करे, कार्य्यसाधन करे, एवं हर्षदाता इन्द्रेर सखा; यज्ञव्यापी इन्द्रके इहा दान कर। ७

५। प्रकृतार्थ—हे यजमान त्वम् आशुम् आशु शीघ्रं यथा स्यात् तथा ईम् (कपोलचलभितत् पदं) इमं पुरोवर्त्तिनं यज्ञश्रियं यज्ञस्य लक्ष्मीस्वरूपं नृमादनं नृणां नराणां मत्तताजनकं पतयन्मन्दयत्सखं पतयन्तः पतन्तः मन्दयन्तः मन्दीभूताश्च सखायो येन स तं यत्पानेन जना मत्ततया भूमौ निपतिता भवन्ति मन्दा जड़ीभूताश्च भवन्ति अतएव पतयन्मन्दयत्सखं यः आसवः सखीन् पातयति मन्दयति जड़ीकरोति च एवम्भूतम् आशवे आसवम् (शकारमध्यत्वमार्षं) मद्यं सोमरसं आभर आहर आनय प्रस्तुतीकुरु। मन्त्रस्यास्य सायणादिभाष्यं न खलु समीचीनम्। ७

অনুবাদ।– হে যজমান! সোমরস বা মদিরা যজ্ঞের লক্ষ্মীস্বরূপ। তুমি যজ্ঞে এরূপ আসব বা মদ্যের আহরণ কর, যাহা পান করিয়া বন্ধুবান্ধবেরা মত্ত হইয়া পড়িয়া যায় ও কর্ম্ম করিতে অসমর্থ হয়। ৭

Oh Yajamana, Somarasa or wine is the glory of the Yajna; bring such liquor or wine. drinking which the friends may become drunk, fall down and be unable to work. (7)

अस्य पीत्वा शतक्रतो घनो वृत्राणा मभवः।
प्रावो वाजेषु वाजिनम्॥ ८

१। सा—हे शतक्रतो! बहुकर्म्मयुक्त इन्द्र! त्वम् अस्य सोमस्य सम्बन्धिनम् अंशं पीत्वा वृत्राणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोऽभवः हन्ता अभूः। ततो वाजेषु संग्रामेषु वाजिनं संग्रामवन्तं स्वभक्तं प्रावः प्रकर्षेण रक्षितवान् असि। ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२। द—अस्य समस्यासमस्तस्य सर्वस्य जगतो जलरसस्य वा पीत्वा पानं कृत्वा शतक्रतो शतानि असंख्याताः क्रतवः कर्म्माणि यस्य शूरवीरस्य सूर्य्यलोकस्य वा सः। घनो दृढ़ः काठिन्येन मूर्त्तिं प्रापितो वा, मूर्त्तौ घनः। वृत्राणां वृत्रप्रत्सुखावरकाणां शत्रूणां मेघानां वा। अभवः भूयाः भवति वा। अत्रापि पूर्ववत्। वाजेषु युद्धेषु। वाजिनं धार्म्मिकं शूरवीरं मनुष्यं प्राप्तिनिमित्तं सूर्य्यलोकं वा। अनेन युद्धेषु प्राप्तवेगहर्षाः शूराः सूर्य्यलोका वा रक्ष्यन्ते। ८

३। रमा—हे शतक्रतो इन्द्र! अस्य सोमस्य इममस्माभिराहृतं सोमं पीत्वा वृत्राणां रिपूणां घनो हन्ता त्वमभवः। त्वं हि वाजेषु च संग्रामेषु च वाजिनं संग्रामवन्तं जनं प्रावः (प्र—अव—लङ्) प्रकर्षेण रक्षितवान् असि। ८

४। रमेश—हे शतक्रतु! एइ सोम पान करिया तुमि वृत्रप्रभृति शत्रुदिगके हनन करियाछिले। युद्धे तोमार भक्त योद्धादिगके रक्षा करियाछिले।८

५। प्रकृतार्थ—हे शतक्रतो इन्द्र! (इन्द्रो विष्णुना सह भारतवर्षमागत्य कुरुक्षेत्रे शतयज्ञं कृत्वा शतक्रतुरिति संज्ञां प्राप इत्यैतिह्यं, पाश्चात्यास्तु शतक्रतुशब्देन महाबलशालीति अर्थान्तरं व्याचख्युः तन्न साधीयः)। त्वं सोमस्य सोमं (विभक्तिव्यत्ययः) पीत्वा वृत्राणां वृत्रबलप्रभृतीनामसुराणां घनो (हन्—अप् =घन। मूर्त्तौ घनः। ३।३।७७ मूर्त्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप् स्यात् घनादेशश्च) हन्ता अभवः अभूः। अतो वाजेषु संग्रामेषु वाजिनं संग्रामवन्तं युद्धकारिणं स्वभटं प्रावः (प्र—अव्—लङ् सिप्)। प्रकर्षेण रक्षितवान् असि। ८

অনুবাদ।—হে শতক্রতো! তুমি সোমপানেই বৃত্রাদি অসুরবধে সামর্থ্য লাভ করিয়াছ। এবং সেই সামর্থ্যনিবন্ধনই আত্মপক্ষীয় যোদ্ধৃগণকে রক্ষা করিতে সমর্থ হইয়াছ। ৮

Oh, Satakratu! you have acquired the power to destroy Britra and other Asuras by virtue of the Soma you have drunk and with that strength you are able to protect the fighters on your side. (৪)

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो।
धनानामिन्द्र सातये॥ ९

१। सा—हे शतक्रतो बहुकर्म्मयुक्त यद्वा बहुप्रज्ञानयुक्त इन्द्र! धनानां सातये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

सम्भजनार्थं वाजेषु युद्धेषु वाजिनं बलवन्तं तं त्वा पूर्वमन्त्रोक्तगुणयुक्तं त्वां वाजयामः अन्नवन्तं कुर्म्मः। ८

२। दया—तम् इन्द्रं परमेश्वरं त्वा त्वां वाजेषु युद्धेषु वाजिनं विजयप्रापकं वाजिन इति पदनामसु पठितत्वात् प्राप्त्यर्थः अत्र गृह्यते ? वाजयामः विज्ञापयामः। वज गतौ इत्यन्तर्गतण्यर्थेन ज्ञापनार्थः अत्र गृह्यते शतक्रतो। शतेषु असंख्यातेषु वस्तुषु क्रतुः प्रज्ञा यस्य तत्सम्बुद्धौ। क्रतुरिति प्रज्ञानामसु पठितं निघ—३।८ धनानां पूर्णविद्याराज्यादिसाध्यपदार्थानां इन्द्र परमैश्वर्य्यवन् सातये सुखार्थं सम्यक् सेवनाय। ८

३। रमा—हे शतक्रतो इन्द्र तं वाजिनं बलवन्तं त्वा त्वां वाजेषु युद्धेषु युद्धकाले धनानां सातये सम्भजनाय लाभाय वाजयामः वयम् अन्नवन्तं कुर्म्मः तुभ्यं हविः अर्पयाम इति भावः। ८

४। रमेश—हे शतक्रतु! तुमि युद्धे सेइ योद्धा। हे इन्द्र धनलाभार्थ तोमाके अन्नवान् करि।

५। प्रकृतार्थ—हे शतक्रतो शतमख इन्द्र! वयं धनानां सातये (सो+क्तिन् सातिर्नाशः, हरणं तस्यै शत्रुधनहरणाय वाजेषु संग्रामेषु वाजिनं योद्धारं तं त्वा त्वां वाजयामः प्रेरयामः वज गतौ णिच्—ततो लट् मस्। अत्र सायणादयः वाजयामः अन्नवन्तं कुर्म्म इति यत् व्याचख्युस्तन्न साधीयः। ८

अनुवाद।—হে শতক্রতু ইন্দ্র! শত্রুগণের ধনহরণের নিমিত্ত যোদ্ধা তোমাকে আমরা রণক্ষেত্রে যাইতে প্রবর্ত্তিত করিব। ৯

Oh Satakratu Indra, we will send you, who are a warrior, to the battle field for the capture of the wealth of the enemies. (9)

यो रायोऽवनिर्महान्त् सुपारः सुन्वतः सखा।
तस्मै इन्द्राय गायत ॥ १०

१। सा—य इन्द्रः रायो धनस्य अवनिः रक्षकः स्वामी वा। तस्मै इन्द्राय गायत। हे ऋत्विजः तत्प्रीत्यर्थं स्तुतिं कुरुत। कीदृश इन्द्रः ? महान् गुणैरधिकः। सुपारः सुष्ठु कर्म्मणः पूरयिता सुन्वतो यजमानस्य सखा सखिवत् प्रियः।

२। दया—यः परमेश्वरः करुणामयः रायः विद्यासुवर्णादिधनस्य अवनिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

केषाञ्चित् विदुषाम्—काचित् पत्रिका।

Jaipur—Tehwildar Lane,

2·12-17 .

My dear Sir,

I have no words to express the amount of gratefulness that I owe you for the receipt of a copy of the प्रथम भाग of ऋग्वेदसंहिता & your valuable letter of the 18. 11. 17.

I have gone through the greater portion of this introduction sent to the world by you as the result of your long-standing researches and investigation. There is no other man on the surface of this wide world at this moment than you who could so candidly and fearlessly assert such hidden and rare truths and historical facts, culled and churned out from the vast stores of the most ancient literature of this earth,—the Vedas and alien works. Who could realize and perceive sincerely the magnanimity of the sustained efforts and use of energy towards such unbiassed and intrepid search after truth, but only a few heads probably who themselves, like Akbar the Great, could have the moral courage to break the fast fetters of eternal effects of customary and hereditary ideas of old that bind human mind, enervating it to such low and down-cast status as to render it unfit for lofty soaring and bursting out in the glorious light of eternal truths, as we have had this illustrious prophetic instance in your own worthy-self who could have not the least fear of calumny or public hatred in laying out before the thoughtful brethern of yours the truths which you could arrive at after life-long studies of our ancient lore.

Chance has not thrown me to live and work with you, otherwise I would have benefitted myself with the unbounded ocean of knowledge with which God has blessed you.

May you live long and may your schemes be fulfilled. I shall deem it an honour if you will be good enough to send me any publication of yours when it is out,—of course by V. P. post. Had I been a millionare or Prince I would have immortalized my name by associating it with your name, helping you on in your grand work with money and other requisites.

Still I shall be serving you so far as my means permit me in due time. With best regards and veneration to you.

I beg to remain, Your most obedient devotee,
Purohit Hari Narayan B. A. Vidyabhooshan.

P.S. Kindly send me your auto-biography.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

ॐ तत्सत् ।

विज्ञापनम् ।

भगवत्कृपया तथा रायश्रीयुक्तवैकुण्ठनाथसेनशर्म्ममहोदयस्य ब्रह्मपुरवास्तव्यस्य (बहरमपुरप्रवासिन:) व्यवहारोपजीविनो भूम्यधिकारिणश्च औदार्य्यवत: करुणया प्रकाशितोऽयं द्वितीयोभाग: ऋग्वेदस्य इति ।

अस्मिन् खण्डे प्रथममण्डलस्य प्रथमसूक्तचतुष्टयं सर्व्वव्याख्यासमेतं सानुवादञ्च प्रकाशितम् । द्विसप्ततिवर्षवयस्कस्य स्थविरस्य मे स्वतएव दृष्टिशक्तिर्मन्दीभूताऽभूत् । तदुपरि शिरोघूर्णनरोग: सततमेव चिन्तनशक्तिं स्थैर्य्यञ्च मे मन्दीकरोति । तेन हेतुना ऋग्वेदस्य उपोद्घातप्रकरणे तथा अस्मिन्नपि द्वितीये भागे बहव: प्रमादा: अशुद्धयश्च सञ्जाता: । साधवस्तु क्षमाप्रसादधवला: तत्सर्व्वं कृपया परिहृत्य नूतनपद्धतिरियं मे साधीयसी न वा तदेव स्थिरीकुर्व्वन्तु इति । अथ सानुनयमाशास्महे यत् विद्यानुरागिण: सर्वे सामाजिका मयि कृपालवो भवेयुरिति ।

वेदा एते न केवलं भारतवर्षीयाणां, परन्तु जगतां सर्वेषामेव आदि-पैतृकी सम्पदिति । यदि इयम् ऋग्वेदसंहिता सर्व्वभाष्यव्याख्यासमेता तूर्णं समाप्तिमगमिष्यत्, तदा किं न कल्याणमभविष्यत् जिज्ञासूनामिति अहो । बहुधनसाध्यं हि मुद्रणकार्य्यमेतेषां विपुलवपुषा मृग्वेदानां, वयमपि च नितरां धनलवरहिता दुर्गता: । अतो याचे नतकन्धरं कृपाभिमुख्यं द्रविणवतां चेतस्वतां सज्जनानामीति ।

इयं व्याख्यास्माकं स्खलनबहुला, सायणकृता
असाध्वी वा साध्वी, तदपि सुविचार्य्यं तुलनया ।
इमे ह्यर्वाचीना, वयमुवटयास्कादय इमे
सुवर्षिष्ठा विद्योदधिरिति च नैवाभिगणयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

३३२२

ऋग्वेदसंहिता

तृतीयसंख्या ।

ब्राह्मण-यास्कौवट-सायण-शङ्कर-महीधर-दयानन्द-रमानाथघोषसरस्वती-
रमेशचन्द्रदत्तादीनां व्याख्यया अनुवादेन च समलङ्कृता

तथा—

श्रीउमेशचन्द्रविद्यारत्नकृतया

प्रकृतार्थवाहिन्या टीकया तत्कृतानुवादेन च सहिता ।

(Both Bengali and English)

मयमनसिंह-वाणियाकाजी-ग्रामवास्तव्यायाः ललनाकुलललामभूतायाः

तदीयज्येष्ठकन्यायाः स्वर्गतायाः शर्म्मिष्ठादेव्याः

व्ययेन च मुद्रितेयं तृतीया संख्या ।

आस्ते चेद् भुवि पार्थिवं किमपि भो रत्नं निरभ्रं हि सा
शर्म्मिष्ठाऽग्रज-कन्यका भगवती साक्षात् जगन्मातृका ।
नैर्म्मल्ये शशिसन्निभा सहृदया दाक्षिण्यभाक् सा सदा
तन्नाम्ना धवलीकृता श्रुतिमती संख्या तृतीया त्वियम् ॥

कलिकाता-राजधान्याम् ३२ शिमुलिया-वीथिका-संस्थात्

सारस्वत-गेहात्

श्रीआशुतोषदासेन प्रकाशिता ।

सर्वं स्वत्वं संरक्षितम् । मूल्यं १) एका मुद्रा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

জবাকুসুম-তৈল

শিরোরোগের মহৌষধ।

গুণে অদ্বিতীয়! গন্ধে অতুলনীয়!!

জবাকুসুম তৈল ব্যবহার করিলে মাথা ঠাণ্ডা থাকে, অকালে চুল পাকে না, মাথায় টাক পড়ে না। যাঁহাদের বেশী রকম মাথা খাটাইতে হয়, তাঁহাদের পক্ষে জবাকুসুম তৈল নিত্যব্যবহার্য্য বস্তু। ভারতের স্বাধীন মহারাজাধিরাজ হইতে সামান্য কুটীরবাসী পর্য্যন্ত সকলেই জবাকুসুম তৈল ব্যবহার করেন এবং সকলেই জবাকুসুম তৈলের গুণে মুগ্ধ। জবাকুসুম তৈলে মাথার চুল বড়, নরম ও কুঞ্চিত হয় বলিয়া রাজরাণী হইতে সামান্য মহিলারা পর্য্যন্ত অতি আদরের সহিত জবাকুসুম তৈল ব্যবহার করেন। এক শিশির মূল্য ১৲ এক টাকা। ডাক মাশুল ।০ চারি আনা। ভিঃ পিঃতে ১।৵০ এক টাকা পাঁচ আনা। ডজন (১২ শিশি) ৮৶০ আনা!

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ।

সুরবল্লী কষায় সেবনে শরীরের দূষিত শোণিত বিশোধিত হয়। চুলকানি ঘা, ফোড়া বাতরক্ত, আমবাত, পারদজনিত ক্ষত প্রভৃতি কষ্টদায়ক রোগ শীঘ্রই দূরীভূত হয়। এই মহা-তেজস্কর দেশীয় সালসা সেবনে পুরুষত্ব ও শরীরের-কান্তি বর্দ্ধিত হইয়া থাকে। ইহার প্রত্যেক মাত্রাই শরীরে নূতন জীবনীশক্তির সঞ্চার করে। মূল্য এক শিশি ১।৹ দেড় টাকা, ভিঃ পিঃতে লইলে ২৵৹ আনা। মফঃস্বলস্থ রোগিগণ নিজ নিজ রোগের বিবরণ লিখিলে বিনামূল্যে ব্যবস্থা প্রেরণ করা হয়।

সি, কে, সেন এণ্ড কোং লিমিটেড।

ব্যবস্থাপক—

শ্রীউপেন্দ্রনাথ সেন কবিরাজ।

২৯ নং কলুটোলা ষ্ট্রীট, কলিকাতা।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

ऋग्वेदसंहिता

तृतीयसंख्या।

ब्राह्मण-यास्कोवट-सायण-शङ्कर-महीधर-
दयानन्द-रमानाथघोषसरस्वती-
रमेशचन्द्रदत्तादीनां व्याख्यया
अनुवादेन च समलङ्कृता
तथा—

श्रीउमेशचन्द्रविद्यारत्नकृतया

प्रकृतार्थवाहिन्या टीकया तत्कृतानुवादेन च
सहिता
(Both Bengali and English)

मयमनसिंह-बाणियाकाजी-ग्रामवास्तव्यायाः
ललनाकुलललामभूतायाः
तदीयज्येष्ठकन्यायाः स्वर्गतायाः शर्म्मिष्ठादेव्याः
व्ययेन च मुद्रितेयं तृतीया संख्या।

आस्ते चेद् भुवि पार्थिवं किमपि भो रत्नं निरन्ध्रं हि सा
शर्म्मिष्ठाऽग्रज-कन्यका भगवती साक्षात् जगन्मातृका।
नैर्म्मल्ये शशिसन्निभा सहृदया दाक्षिण्यभाक् सा सदा
तन्नाम्ना धवलीकृता श्रुतिमतो संख्या तृतीया त्वियम्॥

कलिकाता-राजधान्याम्
६७ शिमुलिया-वीथिका-संस्थात्
सारस्वत-गेहात्
श्रीआशुतोषदाशेन प्रकाशिता।

सर्वं स्वत्वं संरक्षितम्।

मूल्यं ॥/) द्वादशानकानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रिण्टार—श्रीजितेन्द्रनाथ सेन, बी, ए,

विद्योदय प्रेस्

८।२ काशी घोष लेन्, विडन-स्कोयार, कलिकाता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

रक्षक: प्रापको दाता, महान् सर्वेभ्यो महत्तम:, सुपार: सर्वकामानां सुष्ठु पूर्त्तिकर: सुन्वत: अभिगतधर्म्मविद्यस्य मनुष्यस्य सखा सौहार्द्देन सुखप्रद:। तस्मै तमीश्वरम् इन्द्राय परमैश्वर्य्यवन्तं गायत नित्यम् अर्चत। १०

३। रमानाथ:—य इन्द्रो रायो धनस्य महान् अवनि: (अव्+अनि) रक्षक:, यद्वा आकर:, सुन्वत: (सु+शतृ), सोमाभिषवं कुर्वतो यजमानस्य सुपार: (सु—पृ+अच्) शोभनकर्म्मण: पालक: सखा मित्रं भवति तस्मा तस्मै इन्द्राय गायत स्तुत, यूयमिति शेष:। १०

४। रमेश—यिनि धनेर रक्षक एवं महान्, यिनि कर्म्मेर पूरयिता एवं अभिषवकारीर सखा, सेइ इन्द्रेर उद्देशे गाओ। १०

५। प्रकृतार्थवाहिनी—य: इन्द्रो रायो धनस्य महान् अवनि: (अव+अनि), रक्षक:, तथा सुन्वत: सोमाभिषवं कुर्वतो यजमानस्य सुपार: नितरां पूरणकर्त्ता अभीष्टदाता, सखा समप्राणो बन्धुश्च। उक्तञ्च—

अत्यागसहनो बन्धु: सदैवानुमत: सुहृत्।
एकक्रियं भवेन्मित्रं समप्राण: सखा मत:॥

तस्मै इन्द्राय एवम्भूतं सदोपकारिणम् इन्द्रमुद्दिश्य गायत स्तुतिं कुरुत। १०

हे ऋत्विग्गण! यिनि सोमाभिषवकारी आमादिगेर धनेर महान् रक्षा कर्त्ता, सकल अभीष्टदाता सखा, सेइ इन्द्रेर उद्देशे स्तुति गान कर। १०

O ye priests, sing the praise of Indra who is the mighty preserver of our wealth when we prepare the Soma for him, who is our friend, and who gives us what we desire. 10.

Acc 3332

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

पञ्चमं सूक्तम् ।

ऋषिच्छन्दोदेवता: पूर्ववत्

आ त्वेता (आ, तु, आ, इत) निषीदतेन्द्र मभि प्रगायत ।
सखाय: स्तोमवाहस: ॥ १

१। सायण:...तु शब्द: क्षिप्रार्थ: निपात:। द्वाभ्याम् आङ्भ्याम् अन्वेतुम् इतशब्द: अभ्यसनीय:। हे सखाय ऋत्विज: क्षिप्रम् अस्मिन् कर्म्मणि इत इत आगच्छत आगच्छत, आदरार्थ: अभ्यास:। आगत्य च निषीदत उपविशत उपविश्य च इन्द्रम् अभि प्रगायत। सर्वत: प्रकर्षेण स्तुत। कीदृशा: सखाय: ? स्तोमवाहस:—त्रिवृत्पञ्चदशैकविंशादिस्तोमान् अस्मिन् कर्म्मणि वहन्ति प्रापयन्ति। १

२। दयानन्द:...आ समन्तात्, तु पुनरर्थे, आ अभ्यर्थे इत प्राप्नुत। द्व्यचोऽतस्तिङ इति दीर्घ:। निषीदत शिल्पविद्यायां नितरां तिष्ठत। इन्द्रं परमेश्वरं विद्युदादियुक्तं वायुं वा। विद्याजीवनप्रापकत्वात् इन्द्रशब्देनात्र परमात्मा वायुश्च गृह्यते। विश्वेभि: सोम्यं मध्वग्न इन्द्रेण वायुना। ऋक्—१म १४।१०। इन्द्रेण वायुना इति वायोरिन्द्रसंज्ञा। अभिप्रगायत—आभिमुख्येन प्रकृष्टतया विद्यासिद्ध्यर्थं तद्गुणान् उपदिशत शृणुत च। सखाय:—परस्परं सुहृदो भूत्वा स्तोमवाहस: स्तोम: स्तुतिसमूह: वाह: प्रापव्य:, प्रापयितव्यो येषां ते। १

३। रमानाथ:...हे स्तोमान् त्रिवृत्पञ्चदशादीन् वहन्ति अस्मिन् कर्म्मणि प्रापयन्तीति स्तोमवाहस: स्तुतिकारका: सखाय:, इन्द्रस्य सखिभूता ऋत्विज: यूयम् आ तु आ इत आ इत शीघ्र मागच्छत। आदरार्थ मभ्यास:। आगत्य च निषीदत उपविशत उपविश्य च इन्द्रमभि प्रगायत सर्वत: प्रकर्षेण स्तुत। १।

४। रमेश......हे स्तुतिवादक सखागण! शीघ्र आइस, उपवेशन कर, इन्द्रके लक्ष्य करिया गाओ।

स्वाभिमतम्......इन्द्रस्य वायोश्च अभिन्नत्वप्रदर्शनार्थं श्रीमता दयानन्देन प्रकारणम् १०।१४।१म ऋक् अध्याहृता। अत्र उभयो: स्वातन्त्र्यमेव विद्यते न पुन:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

अभिन्नत्व मिति। अन्यत्रापि इन्द्रो वायुरिति च न। इन्द्रः त्वष्टुर्भ्राता, वायुस्तु त्वष्टुर्जामाता इति दृश्यते। त्वष्टुर्जामातरं वायुं। २२।२६ सू। ८म। तथाहि—

भयादिन्द्रश्च वायुश्च

इति मुण्डकेन उक्तत्वात्। तथा च ब्राह्मणम्—तं देवा इन्द्रमब्रुवन्, इमं नो वाचं व्याकुरु इति। सोऽब्रवीत्—वरं वृणे। मह्यं च एव एष वायवे च सह गृह्यातौ इति। तथाहि—

इन्द्रवायू इमे सुताः। ४

वायो इन्द्रश्च।५।६।२ सू। १म

इन्द्रावायू बृहस्पतिं।३३ अ—४५। यजुः

एवं बहुषु मन्त्रेषु इन्द्रवाय्वोः पार्थक्यं दृश्यते, अतएव दयानन्द मतमेतत् हेयं, वेदविरुद्धत्वात्।

५। प्रकृतार्थवाहिनी....हे स्तोमवाहसः स्तोमानां मन्त्राणां वाहाः वहनकर्त्तारः स्तुतिकारका इति यावत् सखाय ऋत्विजः यूयम् एत आ सम्यक् इत आगच्छत निषीदत उपविशत, उपविश्य च इन्द्रम् अभिप्रगायत इन्द्रमुद्दिश्य स्तुतिं कुरुत इन्द्रं स्तुत। १।

হে স্তুতিকারক ঋত্বিগ্‌গণ, তোমরা এখানে আসিয়া উপবেশনপূর্ব্বক ইন্দ্রের উদ্দেশে স্তুতি গান কর। ১

1. O worshipping priests! Come here and sit down, and sing in praise of Indra.

पुरूतमं पुरूणामीशानं वार्य्याणाम्।
इन्द्रं सोमे सचा सुते॥ २

१। सा......"सखायः अभिप्रगायत" इति पदद्वयम् अत्र अनुवर्त्तते। हे सखाय ऋत्विजः यूयं सचा सर्वैः सह, यद्वा सचा परस्परसमवायेन सुते अभिषुते सोमे प्रवृत्ते सति, इन्द्रम् अभिप्रगायत, कीदृशम् इन्द्रम्? पुरुतमं पुरून् बहून् शत्रून् तमयति ग्लापयति इति पुरुतमः। पुरूणां बहूनां वार्य्याणां वरणीयानाम् ईशानं स्वामिनम्।

२। दया...पुरूतमं पुरून् बहून् दुष्टस्वभावान् जीवान् पापकर्म्मफलदानेन तमयति ग्लापयति तं परमेश्वरं तत्फलभोगहेतुं वायुं वा। पुरुरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

बहुनामसु पठितं। पुरूणां बहूनाम् आकाशादिपृथिव्यन्तानां पदार्थानाम् ईशानं रचने समर्थं परमेश्वरं तन्मध्यस्थविद्यासाधकं वायुं वा। वार्याणां वराणां वरणीयानाम् अत्यन्तोत्तमानां मध्ये स्वीकर्त्तुमर्हम्।

वार्य्यं वृणोते रथापि वरतमं तद्वार्य्यं वृणीमहे वरिष्ठं गोपयति अयं तद्वार्य्यं वृणीमहे वर्षिष्ठं गोपायितव्यम्। निरु ५।१

इन्द्रं सकलैश्वर्य्यप्रदं परमेश्वरम्—आत्मनः सर्वभोगहेतुं वायुं वा। सोमे सोतव्ये सर्वस्मिन् पदार्थे विमानादियाने वा। सचा ये समवेताः पदार्थाः सन्ति। सचा इति पदनामसु पठितं। सुते उत्पन्ने अभिषवविद्यया अभिप्राप्ते। २

३। रमा......सोमे सुते सोमरसे प्रस्तुते सति पुरून् बहून् शत्रून् तमयति नाशयति इति पुरुतमम् अनेकरिपुघातकं पुरूणां बहूनां वार्य्याणां वरणीयानां धनानाम् ईशानं स्वामिनमिन्द्रं सचा (सच समवाये+क्विप्) परस्पर-समवायेन अभि प्रगायत इति शेषः। युग्मकम्। २

४। रमेश......एइ सोमरस अभिषुत हइले सकले एकत्र हइया बहु शत्रुर दमनकारी बहुवरणीय धनेर स्वामी इन्द्रके लक्ष्य करिया गाओ। २

५। प्रकृतार्थवाहिनी...हे सखाय ऋत्विजः यूयं सोमे सोमरसे सुते अभिषुते प्रस्तुतीकृते सति पुरुतमं पुरुषश्रेष्ठं कपोलचलभाषायां पुरुषशब्दः "पुरु" "पिरि" प्रभृतीन् विकारान् भजति (कति·पुरुषाः कत पिरि) तथा पुरूणां बहूनां वै आर्य्याणाम् ईशानं प्रभुं नेतारमिति यावत्, इन्द्रो न तु सर्वेषा मार्य्याणाम् प्रभुरासीत्, तद्विरुद्धा असुरा अपि आर्य्या आसन् इति स्मरणात्। सचा परस्पर-समवायेन सर्वे मिलित्वा इन्द्रं प्रगायत स्तुत। २।

হে ঋত্বিগ্‌গণ! তোমরা সকলে মিলিত হইয়া পুরুষশ্রেষ্ঠ ও বহুআর্য্যগণের প্রভু ইন্দ্রের স্তুতি গান কর। ২

টীপ্পনী—আর্য্যগণের মধ্যে অসুরেরা ইন্দ্রের বিরোধী ছিলেন, এই জন্য বহুআর্য্য বলা হইয়াছে। ইন্দ্র সকল আর্য্যের প্রভু ছিলেন না।

2. O priests! worship together that Indra who is great and lord of many Aryans.

N. B. Amongst the Aryans, the Asuras were against Indra and therefore the expression 'many Aryans' has been used. Indra was not the lord of all Aryans.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

स घा नो योग आ भुवत् स राये स पुरन्ध्याम्।

गमद्‌ वाजेभि रा स नः॥ ३

१। सा——घशब्दः अवधारणार्थो निपातः। सर्वैः तच्छब्दैः संबध्यते। स घ स एव इन्द्रः पूर्वोक्तगुणविशिष्टः, नः अस्माकं योगे पूर्वम् अप्राप्तस्य पुरुषार्थस्य सम्बन्धे आभुवत् आभवतु, पुरुषार्थं साधयतु इत्यर्थः। स एव राये धनार्थम् आभुवत् आभवतु, स एव पुरन्ध्यां योषिति आभुवत्। यद्वा बहुविधायां बुद्धौ आभुवत्। पुरन्धिर्बहुधी रिति यास्कः। स एव वाजेभिः देयै रत्नैः सह नः अस्मान् आगमत् आगच्छतु। ३

२। दया——स इन्द्रः ईश्वरो वायुर्वा घ एवार्थो निपातः, ऋचि तुनुघ। अं। ६।३। १३३ अनेन दीर्घादेशः। नः अस्माकं योगे सर्वसुखसाधनप्राप्ति-साधके आभुवत् समन्तात् भूयात्। भूधातोराशिषि लिङि प्रथमैकवचने। स उक्तः अर्थः राये परमोत्तमधनलाभाय स पूर्वोक्तः अर्थः पुरन्ध्यां बहु-शास्त्रविद्यायुक्तायां बुद्ध्यां गमत् आज्ञाप्यात्, गमयति वा। वाजेभिः उत्तमैरन्नैः विमानादियानैः सह वा। आ सर्वतः सः अतीतार्थे, नः अस्मान्। ३

३। रमा——स घा घ एव इन्द्रो नः अस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य सम्बन्धे आभुवत् (आशीर्लिङ्छान्दसः) आभवतु पुरुषार्थं साधयतु इत्यर्थः। स इन्द्रो राये धनाय आ भवतु धनं ददातु। स पुरन्ध्यां बहुविधायां बुद्धौ आभवतु बुद्धिं ददातु। स एव नः अस्मान् वाजेभिर्वाजरत्नैः सह आगमत् आगच्छतु अन्नं ददातु इत्यर्थः। ३

४। रमेश——तिनि आमादिगेर उद्देश्य साधन करुन, तिनि धन प्रदान करुन। तिनि स्त्री प्रदान करुन। तिनि अन्न लइया आमादिगेर समीपे आगमन करुन। ३

५। प्रकृतार्थवाहिनी—स घ स एव इन्द्रो नः अस्माकं योगे अलब्धवस्तुनो लाभविषये "योगोऽपूर्वार्थसंप्राप्तौ" इति मेदिनी, आ भुवत् आभवतु पुरुषार्थं साधयतु। स इन्द्रो नः अस्माकं राये रैर्धनं तल्लाभाय अस्माकं धनागमविधौ तथा पुरन्ध्यां पुरन्धिः बहुविधा बुद्धिः तस्यां च, तथा स एव इन्द्रो नः अस्माकं वाजेभिः वाजैः वाजेषु युद्धेषु च नः अस्माभिः सह आगमत् आगच्छतु॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

आभुवत् आभवतु प्रार्थनायां लोट् आर्षत्वात् आभुवदिति अपभ्रष्टरूपम्। आगमत् आगच्छतु अत्रापि तदेव अपभ्रष्टत्वं छान्दसम्।

সেই মহান্ ইন্দ্র আমাদিগের অলব্ধ-বস্তুর লাভ, আমাদিগের ধনাগম, আমাদিগের নানাবিধ বুদ্ধি ও যুদ্ধে সহায় হউন। ৩

3. Let that great Indra be our helper in the acquisition of unrealised things and wealth, in wars and in many intellectual works.

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः।
तस्मै इन्द्राय गायत॥ ४

१। सा——समत्सु युद्धेषु यस्य इन्द्रस्य संस्थे रथे युक्तौ हरी द्वौ अश्वौ शत्रवो न वृण्वते न संभजन्ते। रथमश्वौ च दृष्ट्वा पलायन्ते इत्यर्थः, तस्मै इन्द्राय तत्सन्तोषार्थं हे ऋत्विजो गायत स्तुतिं कुरुत। संस्थे सम्यक् तिष्ठतीति संस्थो रथः। ४

२। दया——यस्य परमेश्वरस्य सूर्य्यलोकस्य वा संस्थे सम्यक् तिष्ठन्ति यस्मिन् तस्मिन् जगति। न निषेधार्थे, वृण्वते—संभजन्ते हरी हरणशीलौ बलपराक्रमौ, प्रकाशाकर्षणाख्यौ च। समत्सु युद्धेषु। शत्रवः अमित्राः, तस्मै एतद्गुणविशिष्टम् इन्द्राय परमेश्वरं सूर्य्यं वा। गायत गुणस्तवन-श्रवणाभ्यां विजानीत। ४

३। रमा——समत्सु युद्धेषु शत्रवो यस्य इन्द्रस्य, सम्यक् तिष्ठतीति संस्थो रथः तस्मिन् युक्तौ हरतो रथमिति हरी अश्वौ न वृण्वते न संभजन्ते रथमश्वौ च दृष्ट्वा पलायन्ते इत्यर्थः। तस्मै इन्द्राय तादृशमिन्द्रं प्रीणयितुं गायत हे ऋत्विजो यूयं स्तुत।

४। रमेश——युद्धे शत्रुरा याँहार रथयुक्त अश्वद्वयेर सम्मुखीन हइते पारे ना, सेइ इन्द्रके लक्ष्य करिया गाओ। ४

५। प्रकृतार्थवाहिनी——हे ऋत्विजः! यस्य यस्मिन् इन्द्रे समत्सु संग्रामेषु संस्थे स्थिते सति शत्रवः अरातयः असुरा इति यावत् यस्य हरी रथवाहि-घोटकद्वयं न वृण्वते न संभजन्ते इन्द्ररथघोटकौ दृष्ट्वैव ते पलायन्ते, तस्मै प्रभाव-शालिने इन्द्राय तमिन्द्रमुद्दिश्य गायत स्तुत॥ ४

হে ঋত্বিগ্‌গণ! ইন্দ্র রণক্ষেত্রে উপস্থিত থাকিলে শত্রুগণ যাঁহার রথ-ঘোটক দেখিয়াই পলায়ন করে, সেই প্রভাবশালী ইন্দ্রের স্তুতি গান কর। ৪

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

O priests! worship that powerful Indra at whose presence in the battlefield and at the sight of whose horses the enemy flies away. 4.

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये।
सोमासो दध्याशिरः ॥ ५।८

१। सा......इमे सोमासः अस्मिन् कर्म्मणि सम्पादिताः सोमाः, सुतपाव्ने अभिषुतस्य सोमस्य पानकर्त्रे, (षष्ठ्यर्थे चतुर्थी)। तस्य पातुर्वीतये भक्षणार्थं यन्ति तमेव प्राप्नुवन्ति। कीदृशाः सोमाः? सुताः अभिषुताः शुचयः दशा पवित्रेण शोधितत्वात् शुद्धाः। दध्याशिरः अवनीयमानं दधि आशीर्दोषघातकं येषां सोमानां ते दध्याशिरः। ५

२। दया......सुतपाव्ने सुतानाम् आभिमुख्येन उत्पादितानां पदार्थानां पावा रक्षको जीवः तस्मै सुता उत्पादिता इमे सर्वे शुचयः पवित्रा यन्ति यान्ति प्राप्नुवन्ति। वीतये ज्ञानाय भोगाय वा। सोमासः अभिषूयन्ते उत्पद्यन्ते उत्तमा व्यवहारा येषु ते। दध्याशिरः—दधति पुष्णन्तीति दधयः, ते आसमन्तात् शीर्य्यन्ते येषु ते। ५

३। रमानाथ......इमे शुचयः शुद्धाः पाकद्रव्यैः अमिश्रिताः। दधि आशीरुग्रतादोषनाशकं येषां सोमानां, ते दध्याशिरः, अवनीयमानदधिमिश्रितत्वात् सुपेयाः सुताः प्रस्तुताः सोमासः सोमाः, सुतं पिबतीति सुतपावा (सुत-पा+वनिप्) तस्मै सुतपाव्ने सोमपानशीलाय इन्द्राय इन्द्रं प्रति वीतये सम्भजनार्थं पानार्थमिति यावत् यन्ति गच्छन्ति समर्प्यन्ते इत्यर्थः। ५

४। रमेश......एइ अभिषुत पवित्र दधिमिश्रित सोमरससमूह अभिषुत सोमपायीर पानार्थ ताँहार निकट याइतेछे। ५

स्वाभिमतम्—"वीतये" भक्षणार्थम् इति सामवेदे ऋग्वेदे च सायणेन व्याख्यातं। परन्तु पदमेतत् "पीतये" इत्येव पदस्य विकारः। "पीवः" इति हेमचन्द्रः। पीतये पानाय। अत्र सायणन "दध्याशिरः" इति पदस्य व्याख्यानविधौ दधि आशीर्येषामिति विग्रहः कृतः। रमानाथोऽपि सायणमार्गानुसारी अभवत्। परमयं आशिरशब्दो न खलु "आशिर्" "आशिष्" वा इति शब्दप्रभव इत्येव प्रतीयते। यतः

इन्द्राय गाव आशिरम् ॥ ६-५८ सू-८म।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

इत्यत्र सायणोऽपि—गाव आशिरम् आश्रयणसाधनं पयआदिकम् इति व्याख्यातवान्। अत्र तु दधि एव आशिरं मिश्रणसाधनं वस्तु येषामित्येव व्याख्यानं साधीय आसीत्। वस्तुतस्तु "दध्याशिरः" इति पाठश्छान्दसो लिपिकरप्रमादात् वा विकृत इति। "दध्याशिराः" पाठः खलु साधीयानिति। अस्य आशिरशब्दस्य व्युत्पत्तिविधौ देवराजयज्वनापि यदुक्तं, तदपि न खलु समीचीनमिति।

५। प्रकृतार्थवाहिनी—इमे पुरो दृश्यमानाः शुचयः पवित्रा निर्मला इति यावत् दध्याशिरः दधि आशिरं मिश्रणसाधनं पयआदिकं वस्तु येषां (सोमैः सह दधिसंमिश्रणेन तेषां तीव्रता तिरोहिता भवेत्) ते दध्याशिराः (वचनव्यत्ययः) दधिमिश्रिताः सोमासः सोमरसा सुतपाव्ने (सुत—पा+वनिप्=सुतपावा, तस्मै) इन्द्राय'ते सुता अभिषुताः सोमाः तस्य इन्द्रस्य वीतये (भाषाविकारात् पकारस्य वकारत्वं) पीतये पानार्थं यन्ति गच्छन्ति। ५

এই সোমরস সকল অতীব নির্ম্মল, ইহার তীব্রতানাশের জন্য ইহার সহিত দধি মিশ্রিত করা হইয়াছে। এই সুত সোমরস সোমপানকারী সেই ইন্দ্রের নিকট গমন করিতেছে। ৫

The Soma wine is very powerful. In order to lessen its stimulating effect curd is mixed with it. This Soma wine is sent to Indra who drinks it. 5.

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः।
इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥

१। सा......सुक्रतो शोभनकर्म्मन् शोभनप्रज्ञ वा हे इन्द्र! त्वं सुतस्य अभिषुतस्य सोमस्य पीतये पानार्थं ज्यैष्ठ्याय देवेषु ज्येष्ठत्वार्थं च सद्यः तस्मिन्नेव क्षणे वृद्धः अजायथाः अभिवृद्धया उत्साहेन युक्तोऽभूः। ६।

२। दया......त्वं जीवः सुतस्य उत्पन्नस्य अस्य जगत्पदार्थसमूहस्य सकाशात् रसस्य पीतये पानाय ग्रहणाय वा, सद्यः शीघ्रं वृद्धः ज्ञानादिसर्व्वगुणग्रहणेन सर्वोपकारकरणे च श्रेष्ठः अजायथाः प्रादुर्भूतोभव। इन्द्र विद्यादिपरमैश्वर्य्ययुक्त विद्वन्। इन्द्र इति पदनामसु पठितम्, अनेन गन्ता प्रापकः विद्वान् जीवः गृह्यते। ज्यैष्ठ्याय अत्युत्तमकर्म्मणाम् अनुष्ठानाय सुक्रतो श्रेष्ठकर्म्मबुद्धियुक्त मनुष्य। ६।

३। रमानाथ.........हे सुक्रतो शोभनप्रज्ञ इन्द्र त्वं सुतस्य सोमरसस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

पीतये पानार्थं ज्यैष्ठ्याय देवेषु ज्येष्ठ्यार्थं च ज्येष्ठत्वलाभाय, इति यावत् सद्यः तस्मिन्नेव क्षणे वृद्धः उत्साहयुक्तः अजायथाः भवसि। ६।

४। रमेश......हे सुक्रतु इन्द्र। तुमि अभिषुत सोमपानेर जन्य (देवगणेर मध्ये) ज्येष्ठत्व प्राप्तिर जन्य एकेवारेइ वृद्धिप्राप्त हइयाछ। ६।

५। प्रकृतार्थवाहिनी......हे सुक्रतो शोभनयज्ञ इन्द्र! त्वं सुतस्य पीतये पीतौ सोमपानविषये सद्यः अचिरं ज्यैष्ठ्याय ज्यैष्ठ्येन ज्येष्ठत्वेन गुणप्राधान्येन जरसा विना वृद्धः वयोज्येष्ठः अजायथाः अभवः। देवेषु ब्रह्मादिषु इन्द्रः कनीयानपि गुणवत्तया वृद्धत्वं प्राधान्यं गत इति भावः। ६।

হে শোভনযজ্ঞ ইন্দ্র! তুমি দেবগণের মধ্যে কনিষ্ঠ হইয়াও (ইন্দ্র বিষ্ণুর বড় ও অন্যান্য দেবগণের কনিষ্ঠ) নিজগুণে জ্যেষ্ঠত্ব লাভ করিয়াছ। এই ক্ষণে সোমপানবিষয়ে তুমি অগ্রভাগ পাইতে অধিকারী। ৬।

O Indra! the efficient performer of Yajna, though you are the youngest amongst the Devas, you have acquired greatness by dint of your power and merits, and now you are the first to get the first cup of Soma wine. 6.

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः।
शं ते सन्तु प्रचेतसे ॥ ७ ॥

१। सा......इन्द्र! त्वा त्वां सोमासः सोमाः आविशन्तु आभिमुख्येन प्रविशन्तु। कीदृशाः सोमाः? आशवः सवनत्रये प्रकृतिविकृत्योर्वा व्याप्तिमन्तः कीदृश इन्द्र? गिर्वणः गीर्भिः स्तुतिभिः संभजनीयः देवविशेषः। "गिर्वणा देवोभवति गीर्भिरेनं वनयन्तीति" यास्कः। तथाविध हे! इन्द्र ते तुभ्यं प्रचेतसे प्रकृष्टज्ञानाय शं सुखस्वरूपाः सोमाः सन्तु। ७

२। दया......आ समन्तात् त्वा त्वां जीवं विशन्तु आविष्टा भवन्तु, आशवः वेगादिगुणसहिताः सर्वक्रियाव्याप्ताः सोमासः सर्वे पदार्थाः इन्द्र जीव विद्वन् गिर्वणः गीर्भिर्वन्यते संभज्यते स गिर्वणाः, तत्सम्बुद्धौ। देवशब्देन अत्र प्रशस्तैर्गुणैः स्तोतुमर्हो विद्वान् गृह्यते। शं सुखं ते तुभ्यं सन्तु प्रचेतसे प्रकृष्टं चेतो विज्ञानं यस्य तस्मै। ७

३। रमानाथ......हे गृणन्ति इति गिरः स्तुतयः, ताभिर्वन्यते सेव्यते इति गिर्वणः (गिर्—वन्+असुन्) सुस्तुत्य इन्द्र! आशवः सवनत्रयप्रयुक्ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

शीघ्रमादकाः वा सोमाः त्वां विशन्तु, तवोदरं प्रविश्य तृप्तिं जनयन्तु, प्रचेतसे प्रकृष्टज्ञानवते सर्वज्ञाय ते तुभ्यं शं सुखरूपाः तृप्तिप्रदा इति यावत् सन्तु भवन्तु च। ७

४। रमेश……हे स्तुतिभाजन इन्द्र व्यापनशील (अर्थात् शीघ्रमादक) सोमरससमूह तोमाते प्रवेश करुक। प्रकृष्ट ज्ञानलाभे तोमार मङ्गलकारी हउक। ७

५। प्रकृतार्थवाहिनी……हे गिर्वणो देव इन्द्र! त्वा त्वाम् आशवः 'श'-मध्यत्वमार्षम् आसवाः मादकाः सोमासः सोमाः आविशन्तु सम्यक् प्रविशन्तु गच्छन्तु इति यावत्। ते सोमाः प्रचेतसे प्रचेतसः प्रकृष्टचित्तस्य तव शं कल्याणकराः सन्तु।

गिर्वणः—सम्बोधनपदं। "गोः" शब्दोपपदात् वनोतेर्ण्यन्तात् असुनि वनेर्घटादित्वेन मित्संज्ञकत्वात् ह्रस्वत्वं गोर्वण इति प्राप्ते दीर्घाभावः छान्दसः"। इति देवराजयज्वा। ७

হে দেব ইন্দ্র! এই মাদক সোমরস সকল তোমার নিকট গমন করুক। তুমি প্রকৃষ্ট হৃদয়বান্, এই সোম সকল তোমার মঙ্গলকর হউক। ৭

Oh god Indra, let this Soma juice go to you. May this Soma be auspicious for your good-hearted self. 7.

त्वां स्तोमा अवीवृधन् त्वा मुक्था शतक्रतो।
त्वां वर्द्धन्तु नो गिरः॥ ८

१। सा……हे शतक्रतो! बहुकर्म्मन् बहुप्रज्ञ वा इन्द्र! त्वां स्तोमाः सामगानां स्तोत्राणि अवीवृधन् वर्धितवन्ति। तथा बह्वृचाना मुक्था शस्त्राणि त्वाम् अवीवृधन् यस्मात् पूर्वमेव मासीत् तस्मात् इदानीमपि नः अस्माकं गिरः स्तुतयः त्वां वर्द्धन्तु वर्द्धयन्तु अतिवृद्धं कुर्वन्तु। ८

२। दया……त्वाम् इन्द्रं परमेश्वरं स्तोमा वेदस्तुतिसमूहाः अवीवृधन् वर्द्धयन्ति। अत्र लडर्थे लुङ्। त्वां स्तोतव्यम् उक्था परिभाषितुमर्हाणि वेदस्थानि सर्वाणि स्तोत्राणि। शतक्रतो त्वां सर्वज्येष्ठं वर्द्धन्तु वर्द्धयन्तु, अत्र अन्तर्गतोण्यर्थः। नः अस्माकं गिरः विद्यासत्यभाषणादियुक्ता वाण्यः। ८

३। रमानाथ……हे शतक्रतो बहुकर्म्मन् शतप्रज्ञाविशिष्ट वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

इन्द्र स्तोमाः सामगानां स्तोत्राणि पूर्वं त्वाम् अवोवृधन् गुणकीर्त्तनेन वर्द्धितवन्तः उक्था (वच्+थक्) उक्थानि ऋग्वेदिनां शस्त्राख्यमन्त्रविशेषाणि च त्वां वर्द्धितवन्ति। नः अस्माकं गिरः स्तुतय स्त्वामधुना वर्द्धन्तु वर्द्धयन्तु प्रशंसन्तु। ८

४। रमेश........हे शतक्रतु! स्तोमसमूह तोमाके वर्द्धन करियाछे। उक्थसमूह तोमाके वर्द्धन करियाछे। आमादिगेर स्तुति तोमाके वर्द्धन करुक। ८

५। प्रकृतार्थवाहिनी——हे शतक्रतो इन्द्र! स्तोमाः स्तोत्राणि त्वाम् अवीवृधन् वर्द्धितवन्ति, अवर्द्धयन्; उक्था उक्थानि (वच्+थक्=उक्थ) शस्त्राणि सामस्तुतयः त्वाम् अवोवृधन् अवर्द्धयन्, नः अस्माकं गिरः स्तुतयश्च त्वां वर्द्धयन्तु। अवीवृधन्—वृध् धातोर्णिच् लुङ् अन्।

হে শতমথ ইন্দ্র! প্রাচীন ঋষিগণের স্তোত্র ও উক্থ সকল তোমাকে বাড়াইয়াছে, আমাদিগের স্তুতিবাক্য সকলও তোমার যশঃ ও প্রতিপত্তির সংবর্দ্ধন করুক। ৮

Oh Indra, the performer of a hundred Yajnas, the hymns of the ancient sages have dignified you. Let our hymns also increase your fame and prestige. 8

अक्षितोतिः सनेदिमं वाज मिन्द्रः सहस्त्रिणम्।
यस्मिन् विश्वानि पौंस्या॥ ९

१। सा....इन्द्रः इमं वाजं-सोमरूपमन्नं सनेत् सम्भजेत्; कीदृश इन्द्रः? अक्षितोतिः अहिंसितरक्षणः, कदाचिदपि रक्षां न मुञ्चति इत्यर्थः। कीदृशं वाजं? सहस्त्रिणं प्रकृतौ विकृतिषु च प्रवर्त्तमानत्वेन सहस्रसंख्यायुक्तं यस्मिन् वाज विश्वानि सर्वाणि पौंस्या पौंस्यानि पुंस्त्वानि बलानि वर्त्तन्ते, तादृशं वाज मिति—पूर्ववदन्वयः। ९

२। दया···अक्षितोतिः क्षयरहिता ऊतिर्ज्ञानं यस्य सः अक्षितोतिः; सनेत् सम्यक् सेवयेत्, इमं प्रत्यक्षविषयं वाजं पदार्थविज्ञानं इन्द्रः सकलैश्वर्य्ययुक्तः परमात्मा। सहस्त्रिणं सहस्राणि असंख्यातानि सुखानि यस्मिन् सन्ति तं, तपःसहस्राभ्यां विनीनी। यस्मिन् व्यवहारे विश्वानि समस्तानि पौंस्या पुंसो बलानि। ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

३। रमानाथ...अच्छिता अहिंसिता ऊतिः रक्षणं यस्य असौ अच्छितोतिः अखण्डाश्रयदाता कदाचिदपि रक्षां न विमुञ्चति इत्यर्थः। इन्द्रः इमं सहस्रिणं प्रकृतियागे विकृतियागे च प्रवर्त्तमानं सोमरूपं वाजमन्नं सनेत् संभजेत् स्वीकरोतु। यस्मिन् वाजे विश्वानि सर्वाणि पुंसः कर्म्माणि पौंस्यानि बलानि वर्त्तन्ते। यदन्नसमर्पणेन वयं प्रभूतं बलं प्राप्नुयाम इति भावः। ९

४। रमेश......इन्द्र रक्षणे विरत ना हइया एइ सहस्रसंख्यक अन्न ग्रहण करुन, ये अन्ने समस्त पौरुष अवस्थिति करे। ९

स्वाभिमतम्......अत्र सायणादिभिः वाजशब्दस्य अन्नार्थो गृहीतः। वयं तन्न समीचीनं मन्यामहे। अच्छितोतिरिति विशेषणसाहचर्य्यात् वाजशब्दो ऽत्र युद्धार्थे प्रयुक्त इत्येव प्रतीयते। ९

५। प्रकृतार्थवाहिनी...अच्छितोतिः अच्छिता हिंसारहिता ऊतयो रक्षा यस्य सः अच्छितोतिः, अव्याहतोपायः इन्द्रः इमं सहस्रिणं सहस्रं वाजं युद्धं सनेत् सेवेत। इन्द्रः सहस्रशो नाना युद्धक्षेत्रे अगमत् परं न केऽपि तं हिंसयितुं समर्थाः अभवन्। तस्य शत्रवो निहताः, स पुनरक्षतदेह एव गृहं प्रत्यागतः। अस्मिन् विषये अक्षतदेहेन शत्रुहननव्यापारे एव तस्य इन्द्रस्य विश्वानि समग्राणि प्रभूतानीति यावत् पौंस्या पौंस्यानि पुरुषकाराः इति।

याँहार युद्धक्षेत्रे प्रयुक्त उपाय वा कौशल सकल शत्रुगण भेद करिते पारे ना, यिनि सहस्र सहस्र युद्धे अन्येर हिंसा करिया निजे अक्षतदेहे गृहे प्रत्यागत हइयाछेन, ताँहार एइ कौशलोद्भावनी-शक्तितेइ समुदाय पुरुषकार विद्यमान।

Indra of infallible means has been in thousands of battles. [He hurts his enemies in thousands, but himself remains unhurt]. Herein (i.e. in these means) lies all his prowess. 9.

मा नो मर्त्ता अभिद्रुहन् तनूना मिन्द्र गिर्वणः।
ईशानो यवया वधम् ॥ १०।१०।

१। सा......हे गिर्वणः इन्द्र! मर्त्ता विरोधिनो मनुष्याः नः अस्मदीयानां तनूनां शरीराणां मा अभिद्रुहन् अभितोद्रोहं मा कुर्य्युः। ईशानः समर्थस्त्वं वधं वैरिभिः सम्पाद्यमानं यवय पृथक् कुरु।

२। दयानन्द...मा निषेधार्थे, नः अस्माकम् अस्मान् वा मर्ता मरण-धर्म्माणो मनुष्याः, अभिद्रुहन् अभिद्रुह्यन्तु अभिजिघांसन्तु। अत्र व्यत्ययेन शो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

लोडर्थे लुङ् च। तनूनां शरीराणां विस्तृतानां पदार्थानां वा इन्द्र सर्वरक्षकेश्वर! गिर्वणः वेदशिक्षाभ्यां संस्कृताभिर्गीर्भिः वन्यते सम्यक् सेव्यते यः, तत्सम्बुद्धौ। ईशानो यः असौ ईष्टे, यवया मिश्रय, प्रातिपदिकात् धात्वर्थे बहुलम् इष्टवच्च इति यवशब्दात् धात्वर्थे णिच्। वधं हननम्। १०

३। रमानाथ. . . . हे गिर्वणः स्तुतिप्रिय इन्द्र! मर्त्ता विरोधिनो मनुष्याः नः अस्माकं तनूनां शरीराणि मा अभिद्रुहन् (लिङर्थे लेट्) द्रोहं मा कुर्य्युः मा हिंस्युरिति शेषः। ईशानः समर्थस्त्वम् अस्माकं वधं वैरिभिः सम्पाद्यमानं नाशं यवया यवय पृथक् कुरु निवारय अस्मान् रक्ष इति भावः। १०

४। रमेश . . . . हे स्तुतिभाजन इन्द्र (विरोधी) मनुष्येरा आमादिगेर शरीरे येन आघात ना करे। तुमि क्षमताशाली, आमादिगेर वध निवारण कर। १०

५। प्रकृतार्थवाहिनी. . . . हे गिर्वणः इन्द्र! ("गिर्वणः" इति शब्दस्य व्याख्या पूर्वं कृता) मर्त्ताः मरणधर्मशीला नरा आदिमभारतवासिनः कृष्णत्वचो जनाः नः अस्माकं भारतागतदेवानां तनूनां देहानां मा अभिद्रुहन् द्रोहं मा कुर्य्युः। ईशानः प्रतीकारसमर्थस्त्वं वधं शत्रुकृतमस्माकं विनाशं आ सम्यक् यवय पृथक् कुरु दूरीकुरु। त्वमस्मान् रक्ष इति भावः। द्रुह् जिघांसायां लिङर्थे लेट् इति प्रार्थनायां लेट्। १०

হে দেবরাজ ইন্দ্র! ভারতের আদিমনিবাসী মরণধর্মশীল কৃষ্ণত্বচ্ লোকেরা যেন আমাদিগের দেহের কোনও পীড়া দিতে না পারে। প্রতীকারসমর্থ তুমি তাহাদিগের দ্রোহ ব্যর্থ করিয়া আমাদিগকে রক্ষা কর। ১০।১০

Oh god Indra, let not the aborigins hurt us. Powerful as you are, save us from their cruelties. 10.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

षष्ठं सूक्तम् ।

ऋषिच्छन्दसी पूर्ववत् । इन्द्रादयो देवता: ।

युञ्जन्ति ब्रध्न मरुषं चरन्तं परि तस्थुषः।
रोचन्ते रोचना दिवि ॥ १

१। उवट....अश्वं युनक्ति ; युञ्जन्ति ब्रध्नं अश्वोऽत्र आदित्यवत् स्तूयते। उत्तरोर्द्धर्चः प्रथमं व्याख्यायते—यस्य भासा, रोचन्ते देदीप्यन्ते रोचना: रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि। दिवि द्युलोके ; तं युञ्जन्ति रथे बध्नन्ति। कथम्भूतं ब्रध्नं ? परिवृढम् आदित्यम् अरुष मरोषणम्, चरन्तं गच्छन्तं वैदिक-कर्म्मसिद्ध्यर्थं। के युञ्जन्ति ? परितस्तुषः सर्वतः स्थिता ऋत्विग्यजमानाः। ५—२३ अ।

२। सायण....इन्द्रोहि परमैश्वर्य्ययुक्तः, परमैश्वर्य्यं च अग्नि-वाय्वादित्यनक्षत्ररूपेण अवस्थानात् उपपद्यते। ब्रध्नं आदित्यरूपेण अवस्थितम् ; अरुषं हिंसकरहिताग्निरूपेण अवस्थितं चरन्तं वायुरूपेण सर्वतः प्रसरन्तमिन्द्रं परितस्थुषः परितः अवस्थिताः लोकत्रयवर्त्तिनः प्राणिनो युञ्जन्ति, स्वकीये कर्म्मणि देवतात्वेन संबद्धं कुर्वन्ति। तस्यैव इन्द्रस्य मूर्त्तिविशेषभूता रोचना नक्षत्राणि दिवि द्युलोके रोचन्ते प्रकाशन्ते।

अस्य मन्त्रस्य उक्तार्थपरत्वं ब्राह्मणान्तरे व्याख्यातं (तै-ब्रा—३।८।४) युञ्जन्ति ब्रध्नमित्याह। असौ वा आदित्यो ब्रध्नः। आदित्यमेव अस्मै युनक्ति। अरुषमित्याह—अग्निर्वा अरुषः। अग्निमेव अस्मै युनक्ति। चरन्तमित्याह—वायुर्वै चरन्। वायुमेव अस्मै युनक्ति॥ परितस्थुषः, इत्याह—इमे वै लोकाः परितस्थुषः। इमानेव अस्मै लोकान् युनक्ति।

रोचन्ते रोचना दिवि—इत्याह—नक्षत्राणि वै रोचना दिवि। नक्षत्राणि एव अस्म रोचयन्ति इति। आदित्यस्यापि महत्त्वात् एव ब्रध्नत्वम्। १।

३। महीधर.....का। २०।५।११। युनक्ति एनं युञ्जन्ति ब्रध्नमिति—अश्वं रथ युनक्ति। मधुच्छन्दो दृष्टा। आदित्यदेवत्या, गायत्री। तस्थुषे विभक्तेर्व्यत्ययः। तस्थिवांसः कर्म्मार्थं स्थिता ऋत्विजः ब्रध्नमादित्यं युञ्जन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

रथे योजयन्ति। अश्वः—आदित्यत्वेन स्तूयते—असौ वा आदित्यो ब्रध्नोऽरुषोऽमुमेव अस्मा आदित्यं युनक्ति स्वर्गस्य लोकस्य समष्ट्या इति श्रुतिः। (१३।२।६।१)।

किम्भूतं ब्रध्नम्? अरुषं रोषति क्रुध्यति रुषः इगुपध इति (पां—३।१।१३५)। इति कः, न रुषः अरुषः, तं क्रोधरहितं परिचरन्तं वैदिककर्म्मसिद्ध्यर्थं सर्वत्र गच्छन्तम्। यस्य ब्रध्नस्य रोचना विभक्तिलोपः, दीप्तयो दिवि आकाशे रोचन्ते प्रकाशन्ते। यद्वा रोचनानि दीप्तानि चन्द्रग्रहतारकादीनि ब्रध्नस्य भासा रोचन्ते तेजसां गोलकः सूर्य्यः। नक्षत्राणि अम्बुगोलका इति ज्योतिः-शास्त्रोक्तेः। ५—२३ अ—यजुः।

४। दयानन्द——युञ्जन्ति योजयन्ति ब्रध्नं महान्तं परमेश्वरं शिल्पविद्यासिद्धये आदित्यमग्निं प्राणं वा। ब्रध्नमिति महन्नामसु पठितं। निघ—३।३। अश्वनामसु च निघ—१।१४। अरुषं सर्वेषु मर्म्मसु सीदन्तम् अहिंसकं परमेश्वरं प्राणवायुं तथा वाह्ये देशे रूपप्रकाशकं रक्तगुणविशिष्टम् आदित्यं वा। अरुषमिति रूपनामसु पठितम्। निघ—३।७। चरन्तं सर्वं जगज्जानन्तं सर्वत्र व्याप्नुवन्तं। परि सर्वतः तस्थुषः तिष्ठन्ति इति तान्। सर्वान् स्थावरान् पदार्थान्। मनुष्यान् वा, तस्थुष इति मनुष्यनामसु पठितम्। निघ—२।३। रोचन्ते प्रकाशन्ते रुचिहेतवश्च भवन्ति। रोचनाः प्रकाशिताः। प्रकाशकाश्च। दिवि द्योतनात्मके ब्रह्मणि सूर्य्यादिप्रकाशे वा। अयं मन्त्रः शतपथऽपि एवं—व्याख्यातः—

"युञ्जन्ति ब्रध्नमरुषं चरन्त मिति—असौ वा आदित्यो ब्रध्नः अरुषः, अमुमेव अस्मै आदित्यं युनक्ति। स्वर्गस्य लोकस्य समष्ट्या॥ श—१३।१।१५।१।

५। रमानाथ....परितस्थुषः परितो वर्त्तमानाः लोकाः, ब्रध्नं महान्तमादित्यम् अरुषं हिंसकरहितमग्निं चरन्तं सर्वतः प्रसरन्तं वायुं युञ्जन्ति स्वकीये कर्म्मणि देवतात्वेन सम्बन्धं कुर्वन्ति अर्चयन्ति इति यावत्। दिवि द्युलोके रोचनानि नक्षत्राणि रोचन्ते प्रकाशन्ते, तान्यपि पूजयन्ति इति यावत्।१

६। रमेश......चतुर्दिक्स्थ लोकेरा (इन्द्रेर सहित) प्रतापान्वित (सूर्य्य), हिंसकरहित (अग्नि) ओ विचरणकारी [वायुर] सहित सम्बन्ध स्थापन करे; नक्षत्रगण आकाशे दीप्यमाने रहियाछे। १।

७। मोक्षमूलर......Those who stand around him while he moves on, harness the bright red steed; the lights of

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

heaven shine forth. (Chips from a German workshop)। अर्थात् पार्श्ववर्त्ति जनगण गमनशील रक्तवर्ण अश्वके रथे योजना करितेछे। आकाशे नक्षत्र प्रकाश पाइतेछे।

स्वाभिमतम्……मन्त्रोऽयं न सुखबोधः। रमेशचन्द्रेणापि उक्तम्—"एइ ऋकेर अर्थ अतीव अपरिष्कार"। अस्य व्याख्याविधौ सर्व एव भाष्यकाराः बहुधालीकं विप्रलपन्तः स्वातन्त्र्यं भेजुरिति। वयमपि स्वातन्त्र्यं भजामः।

ब्रध्नं किं? अरुषं किं? एतन्न केनापि स्थिरीकर्त्तुं शक्यं। वैदिककोषकारो निघण्टुस्तु—

ब्रध्नः—अरुषस्य—अश्वः

इति निरदिशत्। केचित्तु ब्रध्नः—दिवाकर इति व्याचख्युः। भास्करमिश्रस्तु—

ब्रध्नं परिवृढम् अरुषम् आरोचन मिति

व्याख्यातवान्। वयं मन्यामहे अत्र एष ब्रध्नो दिवाकरो न, अत्र अरुषशब्दस्य रूपार्थको न, तस्थुषो मनुष्या इत्यपि निघण्टुकारस्य महान् प्रमादः। शतपथव्याख्यानमपि नितरां स्खलनबहुलमिति। वस्तुतस्तु कश्चित् ऋषिः पारिषदगणपरिवेष्टितम् अरुषं रोषरहितं ब्रध्नं सुरज्येष्ठब्रह्माणं दृष्ट्वा इत्यमुक्तवान् इति। ब्रध्नः—ब्रह्मा, इत्यत्र किम् प्रमाणम्? अत्र अथर्ववेदस्तु एवं वक्ति—

त्रीन् नाकान् त्रीन् समुद्रान् त्रीन् ब्रध्नान् त्रीन् वैष्टपान्।
त्रीन् मातरिश्वन स्त्रीन् सूर्य्यान् गोप्तॄन् कल्पयामि ते॥ ३७५ पृ। ४ ख

अत्र ब्रध्नशब्दसूर्य्यशब्दयोरेकत्राभिधानात् ब्रध्नः सूर्य्यो न, इत्येव प्रतीयते, तन्मतञ्च निरस्यते इति। अथ "त्रीन् ब्रध्नान्", इत्युक्तत्वात्, दिवाकरस्य एकत्वाच्च ब्रध्नः—दिवाकरः—इति च न सङ्गच्छते खलु। तर्हि कथं त्रीन् सूर्य्यान् इत्युक्तं? यतः कश्चित् सूर्य्यः—सामवेदमन्त्रसमाहर्त्ता सावर्णिमनुपिता—कश्चित् सूर्य्यो गन्धर्वजातीय आसीत् यः खलु देवानां प्रधानतमः शिल्पी [Engineer] बभूव। येन च वाष्पीयशकटादिकमुद्भावितमभूत्। तृतीयस्तु सूर्य्यः—अन्यः कश्चन देव इति।

त्रीन् ब्रध्नान् इति किं? ब्रध्नाः ब्रह्माणः त्रय एव आसन् यदुक्तममरेण सता—

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः।

अत्र एको ब्रह्मा—यः स्वयमुद्बभौ (मनुः), द्वितीयस्तु—लोकपितामहो विराट् हिरण्यगर्भः, स एव स्वर्णाण्डप्रभव इति (८।१ अ मनुः)। तृतीयस्तु परमेष्ठी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

ब्रह्मा इति, स एव सुरज्येष्ठो ब्रह्मा। यस्य ज्येष्ठः पुत्रस्तु अथर्वा इति। स तु सुरज्येष्ठब्रह्मा आदिस्वर्गं विहाय उत्तरकुरुषु गृहप्रतिष्ठां चक्रे। उत्तरकुरव एव सत्यलोकः, ब्रह्मलोकः, परमव्योम, विष्टपञ्च इति।

त्रिपिष्टपं—त्रिदिवं
पिष्टपं (विष्टपं विष्टपः),…दिवं, दिव् वा।
त्रिदिवं…महः, तपः, सत्यम्। (Sibiria).

स तु सुरज्येष्ठो ब्रह्मा सत्यलोकापरनाम्नः विष्टपस्य राजा आसीत् अत एव ऐतरेयेण सता उक्तं—

स्वर्गो वै लोको ब्रध्नस्य विष्टपम्। ४४२ पृ

अत एव अत्र ब्रध्नः—अश्वः सूर्य्यश्च न स्यात् इति। यदि ब्रध्नः सूर्य्य एव स्यात्, तर्हि स सूर्य्यः वैदिककर्म्मणि इतस्ततश्चरति, स एव जड़सूर्य्यः अरुषः क्रोधरहितश्च, कथमित्थं सह्यीधरादिभिरुक्तम्?

८। प्रकृतार्थवाहिनो…परितस्थुषः परि परितः चतुष्पार्श्वे अवस्थिताः साध्यादिदेवगणाः, पञ्चमास्मृते ब्रह्मलोके साध्या एव देवा ब्रह्माधीना आसन् इति छान्दोग्येन उक्तत्वात्, चरन्तं इतस्ततो गच्छन्तं अरुषं रुषा रहितं क्रोधहीनं अत एव चन्द्रवत् प्रशान्तमूर्त्तिं ब्रध्नं सुरज्येष्ठब्रह्माणं युञ्जन्ति तेन सह मिलिता भवन्ति। अतएव अनुमीयते दिवि गगने (दिव् गगनम् भ्रान्तिरेषा मन्त्रप्रणेतु रिति) चन्द्रेण सह रोचना रोचनानि उज्ज्वलानि नक्षत्राणि रोचन्ते दीप्यन्ते शोभन्ते। १

ইতস্ততঃ ভ্রমণশীল ক্রোধহীন প্রশান্তমূর্ত্তি সুরজ্যেষ্ঠ ব্রহ্মার চারিদিকে সাধ্যাদি দেবগণ তাঁহাকে বেষ্টন করিয়া আছেন, তাহাতে বোধ হইতেছে যেন গগনে গমনশীল চন্দ্রকে বেষ্টন করিয়া নক্ষত্রগণ শোভা পাইতেছে। ১

The gods are seated round Brahmá (the eldest of the gods) who is calm and without anger and is moving hither and thither. They look like stars surrounding the moving moon in the heavens. 1.

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे।
शोणा धृष्णू नृवाहसा ॥ २

१। उवट……इतराश्वं युनक्ति—युञ्जन्ति अस्य, गायत्री, युञ्जन्ति रथ अस्य आश्वमेधिकस्य अश्वस्य काम्या काम्यौ कामसंपादिनौ, न हि एको रथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वोढुं शक्ताः। हरी हरितवर्णौ अश्वौ हरिणौ वा वेगवन्तौ। विपक्षसा विविधाः पक्षसाः पक्षाः ययोः तौ विपक्षसौ विविधपक्षावस्थितौ ;

यद्वा—विरिति शकुनिनाम, वेतेर्गतिकर्म्मणः वेः शकुने रिव पक्षौ ययोः तौ, शोणा शोणौ शोणशब्दः अत्र वर्णवचनः। रक्तोवर्णौ धूम्रभागः शोण इत्युच्यते। धृष्णू प्रसहनौ नृवाहसा, नृणां मनुष्याणां वोढ़ारौ। ६—२३अ।

२। सायण.....अस्य ब्रह्मादिप्रतिपाद्यस्य आदित्यादिमूर्त्तिभिः तत्र तत्र अवस्थितस्य इन्द्रस्य रथे हरी एतन्नामानौ द्वौ अश्वौ सारथयो युञ्जन्ति इन्द्रसम्बन्धिनोरश्वयोर्हरिनामत्वं। "हरी इन्द्रस्य, रोहितः अग्नेः" इति पठितत्वात्, कीदृशौ हरी? काम्या कामयितव्यौ, विपक्षसा विविधे पक्षसौ रथस्य पार्श्वौ ययो रश्वयोः तौ विपक्षसौ। रथस्य द्वयोः पार्श्वयोः योजितौ इत्यर्थः। शोणा रक्तवर्णौ। धृष्णू प्रगल्भौ, नृवाहसा—नृणां पुरुषाणाम् इन्द्रतत्सारथिप्रमुखानां वोढ़ारौ। २

३। महीधर.....कां (२०, ५, ११) इतरांश्च युञ्जन्ति अस्य इति। इतरान् त्रीन् अश्वान् रथे युनक्ति। गायत्री अश्वस्तुतिः। ऋत्विजो हरी अश्वौ रथे युञ्जन्ति। कीदृशौ? अस्य आश्वमेधिकाश्वस्य काम्या काम्यौ काम-सम्पादिनौ, नतु एकौ रथं वोढुं शक्त इति काम्यौ ; विपक्षसा, पक्ष परिग्रहे असुन् प्रत्ययः। पक्षयन्ति शरीरं गृह्णन्ति पक्षसः पक्षाः, विविधाः पक्षसः पक्षा ययोस्तौ, विपक्षसौ। यद्वा विरिति शकुनिनाम (वेतेर्गतिकर्म्मणः, निरु २।६ इति यास्कः)। वेः पक्षिण इव पक्षसौ ययो स्तौ शोणा शोणौ, रक्तौ ; धृष्णू प्रगल्भौ। ञि धृषा प्रागल्भ्ये-कुप्रत्ययः। नृवाहसा नॄन् वहतः तौ, वहेरसुन् प्रत्ययः। सर्वत्र विभक्ते राकारः। नृणां वोढ़ारौ।६—२२ अ, शुक्लयजुः।

४। दया....युञ्जन्ति युञ्जन्तु, अत्र लोडर्थे लट्। अस्य सूर्य्यस्य अग्नेः, काम्या कामयितव्यौ, अत्र सर्वत्र सुपांसुलुक्। इति आकारादेशः हरी हरणशीलौ आकर्षणवेगगुणौ पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी, ताभ्याम् इदं सर्वं हरतीति। षड्विंश ब्रा:, प्रपा—१, खण्ड—१। विपक्षसा विविधानि यन्त्रकलाजलचक्रभ्रमणयुक्तानि पक्षांसि पार्श्वे सहितानि ययोः तौ रथ रमणसाधने भूतलाकाशगमनार्थे याने। यन्त्रसंयोगात् राजा स्तुतिं लभेत। राजसंयोगात् युद्धोपकरणानि, तेषां रथः प्रथमागामी भवति। रथो रंहतेर्गतिकर्म्मणः स्थिरतेर्वा स्यात्, विपरीतस्य रममाणः अस्मिन् तिष्ठतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वारयतेर्वा रसतेर्वा। निरु—८।११। रथ इति पदनामसु पठितं। निघ ५।३। आभ्यां प्रमाणाभ्यां रथशब्देन विशिष्टानि यानानि गृह्यन्ते। शोणा वर्णप्रकाशकौ गमनहेतू च धृष्णू दृढ़ौ, नृवाहसौ सम्यक् योजितौ नॄन् वहतः तौ। २

५। रमा......विभिन्ने पक्षसी पार्श्वौ ययोस्तौ विपक्षसौ; द्वयोः पार्श्वयोर्योजितौ, शोणौ लोहितवर्णौ, धृष्णू प्रगल्भौ नॄन् वहतः इति (नृ—वह्+असुन्)। नृवाहसौ वीरवाहसौ। अस्य इन्द्रस्य रथे काम्यौ सुन्दरौ द्वौ हरी अश्वौ युञ्जन्ति लोका इति शेषः। २

६। रमेश......ताहारा इन्द्रेर कमनीय रक्तवर्ण तेजःपूर्ण ओ पुरुष वाहक हरिनामक अश्वद्वय रथेर उभय पार्श्वे संयोजित करे। २

स्वाभिमतम्......पूर्वमन्त्रेण तस्य ब्रध्नशब्देन च सह एतस्य द्वितीय-मन्त्रस्य न कोपि सम्बन्ध इति। दयानन्दस्तु अकाण्डे शिल्पविद्याविमानादीना-मवतारणां चक्रे। षड् विंश ब्राह्मणव्याख्यापि न हृद्या इति।

७। प्रकृतार्थवाहिनी......मातलिप्रभृतयः सारथय इति शेषः, अस्य इन्द्रस्य रथे काम्या काम्यौ कमनीयौ शोणा शोणौ शोणवर्णौ लोहितवर्णौ धृष्णू सहिष्णू वहनक्लेशसहौ नृवाहसा नृवाहसौ नरवहनसमर्थौ विपक्षसा विपक्षसौ पक्षिवत् पक्षयुक्तौ, (प्राक् हस्तिपर्वताश्वाः पक्षवन्त आसन् इति अन्धविश्वासः प्रचरद्रूप आसीत्) हरी इन्द्राश्वौ, उक्तञ्च मेदिनीकरवैद्यशर्म्मणा,—हरिश्चन्द्रार्क-वाताश्वशुकभेकयमाहिषु॥ युञ्जन्ति योजयन्ति बध्नन्ति। २।

মাতলিপ্রভৃতি সারথিগণ ইন্দ্রের রথে কমনীয় সহিষ্ণু এবং নরবাহনসমর্থ রক্তবর্ণ ও পক্ষযুক্ত অশ্বদ্বয় যোজনা করিলেন। ২

The charioteers such as Mátali and others yoke to Indra's chariot a pair of horses that are red, beautiful, persevering and able to carry men. 2.

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे।
समुषद्भिरजायथाः॥ ३

१। सायण......हे मर्या मनुष्या इदमाश्चर्यं पश्यतेत्यध्याहारः। किमाश्चर्य-मिति तदुच्यते। आदित्यरूपोऽयमिन्द्र उपद्भिर्दाहकैः रश्मिभिः प्रतिदिनमुषः कालैर्वा संभूयाजायथाः उदपद्यत। अथवा सूर्य्यस्यैवास्तमये मरणमुपचय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

व्यत्ययेन बहुवचनं कृत्वा संबोधनं क्रियते हे मर्य प्रतिदिनं त्वमजायथा इति योज्यं। किं कुर्वन्। अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय प्राणिने केतुं कृण्वन् प्रातः प्रज्ञानं कुर्वन्। अपेशसे। रात्रावंधकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहिताय पदार्थाय प्रातरंधकारनिवारणेन पेशो रूपमभिव्यज्यमानं कुर्वन्॥ पेश इति रूपनाम पिंशतेरिति यास्कः (निरु ८।११)। अकेतवेऽपेशसे इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्यौ। ३

२। रमा......हे मर्य्या ! मनुष्याः अयमादित्यः अकेतवे (षष्ठ्यर्थे चतुर्थी) निद्राभिभूतत्वेन प्रज्ञानरहितानां जनानां केतुं प्रज्ञानं कृण्वन् कुर्वन् प्रातर्लोकान् विबोधयन् अपेशसे रात्रौ अन्धकारावृतत्वेन अनभिव्यक्तत्वात् रूपरहितानां पदार्थानां पेशं रूपं कृण्वन् प्रातरन्धकारनिवारणेन रूपं प्रकाशयन् उषद्भिः उषःकालैः सह अजायथाः समपद्यत। ३

३। महीधर... अग्निदेवत्या गायत्री मधुच्छन्दो दृष्टा निरुक्ता। हे अग्ने त्वं उषद्भिः कृत्वा अजायथाः उत्पन्नः असि। जनेर्लङि रूपं उषदाहे उषन्ति हविर्दहन्ति ते उषन्तः अग्निहोमकर्त्तारो यजमानाः। कीदृशस्त्वं ? अकेतवे अज्ञानाय मर्य्याः मर्य्याय मनुष्याय केतुं ज्ञानं कृण्वन् कुर्वन् (विभक्ति व्यत्ययः) नास्ति पेशः सुवर्णं यस्य सः, अपेशाः तस्मै अपेशसे मर्य्याय पेशः सुवर्णं कृण्वन्। ३७।२८ अ॰यजुः।

स्वाभिमतम्......अस्मिन् मन्त्रे दिवाकरप्रसङ्गः, अकारणं कृत इति, दिवाकर इन्द्र इत्यपि न। श्रीमता महीधरेण अग्नेरपि अवतारणा वृथा कृता।

४। प्रकृतार्थवाहिनी......हे इन्द्र त्वं इति अध्याहार्य्यं, उषद्भिः ज्वलद्भिः दहनसमर्थैः प्रभावैः अकेतवे अकेतुं अश्रेष्ठमिति यावत् मर्य्याः मर्य्यं मनुष्यं केतुं प्रधानं कृण्वन् कुर्वन्, तथा अपेशसे अपेशसं असुन्दरं मर्य्याः मर्य्यं (विभक्तिव्यत्ययः) मनुष्यं पेशः पेशस्वन्तं रूपवन्तं सुन्दरमिति यावत् कुर्वन् समजायथाः प्रकटीभूतः असि।३

হে ইন্দ্র! তুমি আপনার অত্যুৎকটপ্রভাববলে অপ্রধানকে প্রধান এবং অসুন্দরকে সুন্দর করিয়া প্রখ্যাত হইয়াছ। ৩

O Indra ! You have become famous by making the subordinates chiefs and the ugly beautiful by dint of your prowess. 3.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

आदह स्वधामनु पुनर्गर्भत्वमेरिरे।
दधाना नाम यज्ञियम्॥ ४

१। सायण......अत्रास्ति विशेषविनियोगः। चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे आदह स्वधामन्विति द्वे ऋचौ। इंद्रेण सं हि दृक्षस इत्येका अयं तृचः षलहस्तोत्रियसंज्ञकः। तथा च सूत्रितं चतुर्विंश होताजनिष्टेति खंडे। इंद्रेण सं हि दृक्षस आदह स्वधामन्वित्येका द्वे च। इति। यद्यप्येतदैंद्रं सूक्तं, तथाप्यादहेत्यादिषु षट्सु मरुतो वर्ण्यंते। प्रायेणैन्द्र मरुत इत्यनुक्रमणिकायामुक्तत्वात्। अ॰ परि॰ १. २.॥ आदित्ययमानंतर्यार्थे निपातः। अहेत्यवधारणार्थः। आदह वर्षर्तोरनन्तर मेव स्वधामनु इतः परं जनिष्यमाणमन्नमुदकं वानुपलक्ष्य मरुतो देवा गर्भत्वमेरिरे। मेघमध्ये जलस्य गर्भाकारं प्रेरितवंतः। जलस्य कर्त्तारं पर्जन्यं प्रेरितवन्तः। प्रतिसंवत्सरमेवं कुर्वंतीति दर्शयितुं पुनःशब्दः प्रयुक्तः। कीदृशा मरुतः। यज्ञियं यज्ञार्हं नाम दधानाः। धारयंतः। सप्तसु गणेषु मरुतामीदृङ्चान्यादृङ्चेत्यादीनि यज्ञयोग्यानि नामान्यन्यत्राम्नातानि। अन्ध इत्यादिष्वष्टाविंशतिसंख्याकेष्वन्ननामसूक्ं रसः स्वधेति पठितं। अर्ण इत्यादिष्वेकशतसंख्याकेषूदकनामसु तेजः स्वधा अक्षरमिति पठितं। ४

२। रमा.....आदह अनन्तरमेव यज्ञिंय यज्ञार्हं ईदृङ्न्यादृङित्यादिकानि नामानि दधाना धारयन्तो मरुतो देवाः स्वं दधातीति स्वधां स्वधा शब्दोच्चारणपूर्वकमर्पितं। अन्नमनुलक्ष्य पुनर्गर्भत्वमेरिरे प्राप्ता जाता इति यावत्। प्रतिदिन मेवं कुर्वन्तु इति दर्शयितुं पुनः शब्दः प्रयुक्तः। ४

३। रमेश......ताहार पर मरुद्गण यज्ञार्ह नाम धारण करिया स्वीय प्रकृति अनुसारे मेघेर मध्ये जलेर गर्भाकार रचना करिलेन। ४

स्वाभिमतम्......नायं मन्त्रः सुखबोधः, परन्तु अतीव दुर्बोध एव। प्रकृतगुरोरभावात् न केनापि किमपि बुद्धमिति। तथापि इदं वक्तुं युज्यते यतः अत्र मरुतामवतारणा सर्वथैव वृथा कृता, मन्ये मन्त्र एष युग्मकस्य एकतरः, अतः अन्यतरस्य अभावात् प्रकृतार्थप्रकटनमशक्यमिति।

४। प्रकृतार्थवाहिनी.....अह निश्चितं स्वधाम् अनु "पितृभ्यः स्वधा नमः" इति पित्रादीन् उद्दिश्य पिण्डदानात् आत् अनन्तरं यजमाना यज्ञियं नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

यज्ञघटितं उपाधिं दधाना धारयन्तः पुनर्गर्भत्वम् एरिरे प्राप्तवन्तः ते पुनर्जाता इव अभवन् इति। ४

यजमानगण पितृगणের উদ্দেশে অন্নপিণ্ড দান করিয়া অনুষ্ঠিত যজ্ঞানুসারে নূতন নাম ধারণপূর্বক যেন নূতন জন্ম লাভ করিলেন। ৪

The Yajamánas gain new births, as it were, by acquiring new names according to their ceremonies after making oblations to the Manes. 4.

वीलु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः।
अविन्द उस्रिया अनु॥ ५॥११

१। सा......अस्ति किञ्चित् उपाख्यानं पणिभिर्देवलोकात् गावः अपहृताः अन्धकारे प्रक्षिप्ताः; ताश्च इन्द्रो मरुद्भिः सह अजयत् इति। एतच्च अनुक्रमणिकायां सूचितं—पणिभिरसुरैः निगूढा गाः अन्वेष्टुं सरमां देवशुनीम् इन्द्रेण प्रेषितां असुरैः पणयः मित्रीयन्तः प्रोचुरिति। मन्त्रान्तरे च दृष्टान्ततया सूचितं निरुद्धा आपः पणिनेव गाव इति। तदेतदुपाख्यानमभिप्रेत्योच्यते॥ हे इन्द्र वीलु चित्। दृढमपि दुर्गमस्थानमारुजत्नुभिर्भञ्जद्भिर्वह्निभिर्वोढृभिरन्यत्र नेतुं समर्थैर्मरुद्भिः सहितस्त्वं गुहा चित्। गुहायामपि स्थापिता उस्रिया गा अन्वविंदः। अन्विष्य लब्धवानसि। ओजः पाज इत्यादिष्वष्टाविंशतिसंख्याकेषु बलनामसु दध्रो वीलु च्यौत्नमिति पठितं। नवसंख्याकेषु गोनामसूस्रम्योस्त्रोस्रियेति पठितं। ५

२। दया......वीलु दृढ़ं बलं (वीलु इति बलनामसु पठितं) निघ—२।९) चित् उपमार्थे। × × उस्रियाः किरणाः। ५

३। रमा......हे इन्द्र वीलु चित् दृढ़मपि दुर्गमस्थानं आरुजत्नुभिः (रुज् भङ्गे कत्नु) भञ्जद्भिः वह्निभिः (वह+नित्) वाहकैः मरुद्भिः त्वं गुहा चित् गुहायामपि निगूढ़ा वसन्तीति उस्रिया (वस+रियक्) गाः अन्वविन्द-अन्विष्य लब्धवान्। ५

४। रमेश......हे इन्द्र दृढ़स्थानेर भेदकारी एवं वहनशील मरुद्‌दिगेर सहित तुमि गुहाय लुक्कायित गाभी समुदय अन्वेषण करिया उद्धार करियाछिले। ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

स्वाभिमतम्......मन्त्रेऽस्मिन् "वीलु" इति शब्दः कमर्थं प्रकटयति, पूर्वं तावत् तदेव चिन्तनीयं। निघण्टुकारेण उक्तं—

ओजः, दक्षः, वीलु।

इत्यष्टाविंशतिर्बलनामानि। श्रीमता दयानन्देन च तदर्थ एव अनुसृत इति। पक्षान्तरे सायणरमानाथादयस्तु—

वीलु चित् दृढ़मपि दुर्गमस्थानम्

इति व्याचख्युः। परन्तु सायणादिभिः एतत्समर्थनार्थं न किमपि प्रमाणमुपस्थापितमिति। निघण्टुकारोऽपि कथं वीलु, बलं, इति न अदर्शयत्। देवराज यज्वापि उक्तवान्—

वीलयति संस्तम्भकर्म्मा। संस्तब्धो दृढ़ो भवति अनेन, संस्तभ्यन्ते अनेन शत्रव इति वा। निगमः—अन्वेषणीयः। १८३ पृ निरुक्तं।

परन्तु—वीलयति संस्तम्भकर्म्माः इति तु न पाणिनीयधातुपाठे परिदृश्यते, न पुनरन्येषु गणपाठेषु च। "वीलु" बलं इत्थं निगमोऽपि वैदिके लौकिके वा शास्त्रादौ न दृश्यते। अतएव वीलु—बलं—इत्यपि न, वीलु—दृढ़ं दुर्गमस्थानं, इत्यपि न, प्रमाणाभावात्। अमरस्तु—

शुषिरं विवरं विलम्

इत्युक्त्वा पाठसमाप्तिं कृतवान्। तर्हि वीलुशब्देन किमत्र अवबोधितम्? वयं मन्यामहे वीलुशब्देनात्र वृत्रासुरानुजो वल एव अवबोधित इति। यदुक्तं श्रीमता कृष्णमोहनवन्द्योपाध्यायेन—सता—

If now we compare the Indian narrative with the records of Cuniform inscriptions, there can scarcely remain a doubt that the Bala of the Rigveda, was the Belus or Bel of the Inscriptions—that "the lofty capital of Bala" in the Rigveda, was ~~the lofty~~ citadel of Bel, in the Inscriptions, that the Asuras Panis, (Sanskrit Panayas) of the Veda, were identical with the Phinides of classical history or mythology. Arian Witness P. 62.

वयमपि एतत् सर्वं सत्यमिति अनुमन्यामहे। यतः इन्द्रेण सन्ताड़ितः सन् वृत्रो वलश्च अस्मात् भारतवर्षात् पारस्यं तुरुष्कञ्च गत्वा आर्य्यायणं आसुरीयञ्च (Assyria) एतज्जनपदद्वयं प्रतिष्ठापितवन्तौ। तस्यैव वलस्य अनुचराः पणयः एव देवानां गाः अपहृत्य पर्वतकन्दरे लुक्कायितवन्तः। ततः इन्द्रेण गावो निर्म्मुक्तीकृता इति ऐतिह्यम्। तथाहि रमानाथघोषसरस्वती—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

आसिरीय दलपतिर राजधानी व्याविलन नगर इउफ्रेटीश नदीर तीरस्थित। व्याविलनेर नृपतिदिगके वेलस् वलित। ताँहादिगेर आदि पुरुषेर "पिनिडस" नामे एक सन्तान छिल। इँहार वंशजातदिगके "पिनिडिज" वला हइत। आसिरीय शङ्कुसंहित खोदित लिपि सकले भूयोभूयः देखिते पाओया याय ये, आसीरियेरा पशुप्रभृति हरण करित। ऋग्वेदेर पणि ओ वल, बोध हय, आसीरिय लोकविशेष। ५।६।१ म टिप्पनी।

५। प्रक्षतार्थवाहिनो……चित् चेत् यद्यपि वीलु (कपोलचल शब्दः) वलासुरः पणिभि रपहृता उस्त्रिया गाः गुहा चित् चेत् गुहायां संगोपितवान्, तथापि हे इन्द्र! त्वं आरुजत्नुभिः भञ्जद्भिः वह्निभिः दहनैः भीषणाग्नेयास्त्रैः वज्रैः साधनैः आग्नेयास्त्रप्रयोगेण असुरान् पराभूय ताः उस्रिया गाः अन्वविन्दः पश्चात् लब्धवान् असि।

হে ইন্দ্র, বলাসুরের অনুচর পণিনামক অসুরেরা দেবগণের গাভী সকল হরণ করিয়া নিয়া পর্বতগুহায় গোপন করিয়া রাখিলে, তুমি তৎপর ভীষণ আগ্নেয়াস্ত্রপ্রহারদ্বারা শত্রুগণকে পরাভূত করিয়া গাভী সকল লাভ করিয়াছিলে। ৫

O Indra, when the Panis, the attendants on Bala, stole away the cows of the gods and kept them concealed within the caves of mountains, you rescued them after having defeated the Asuras with formidable weapons of fire. 5.

देवयन्तो यथामति मच्छा विदद्वसुं गिरः।
महा मनूषत श्रुतम् ॥ ६

१। सा……देवयन्तः मरुत्संज्ञान् देवान् इच्छन्तः गिरः स्तोतारः ऋत्विजः महां प्रौढ़ं मरुद्गणं अच्छ प्राप्तुं अनूषत स्तुतवन्तः। कीदृशं मरुद्गणं? विदद्वसुं वेदयद्भिः स्वमहिमप्रख्यापकैः वसुभिर्धनैर्युक्तं श्रुतम् विख्यातं मरुद्गणस्य दृष्टान्तः यथामतिं मन्तारमिन्द्रं यथा स्तुवन्ति तथा इत्यर्थः। ६

२। रमानाथ....देवान् आत्मन इच्छन्तो देवयन्तो देवभक्ताः गृणन्ति स्तुवन्ति इति गिरः स्तोतारो मतिं बुद्धियुक्तमिन्द्रं यथा स्तुवन्ति तद्वत्। वेदयन्ति ज्ञापयन्ति वसूनि धनानि यं तं विदद्वसुं स्वमहिमप्रख्यापकधनदातारं महां महान्तं श्रुतं विख्यातं मरुद्गणं अच्छा अच्छ उद्दिश्य अनूषत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

(नु स्तुतौ लुङि व्यत्ययेन आत्मनेपदं) स्तुतवन्तं अच्छ गत्यर्थवदेषु इत्यव्ययं अनूषत इत्यस्य प्राक् प्रयोज्यम्। ६

स्वाभिमतम्......मन्त्रोऽयमतीव दुरवगाहः। सायणादयः अस्मिन्नपि मन्त्रे अकाण्डे मरुतामवतारणां कृतवन्तः परं तन्न कथमपि आयात्येव।

२। प्रकृतार्थवाहिनी .....अच्छा धूतपापा निर्म्मलान्तःकरणा देवयन्तः इन्द्रादीन् देवान् आत्मनः कर्त्तुमिच्छन्तो (देवशब्दात् क्यच् देवय ततः शतृः, भूम्नि) देवभक्ता देवयवः यजमाना इति शेषः। यथामतिं (आर्षत्वात् विभक्तेर् लुक्) यथामति यथाबुद्धि यथाज्ञानमिति यावत् गिरः गीर्भिः (विभक्ति-व्यत्ययः) स्तोत्रैः श्रुतं विख्यातं महां (कपोलचलोऽयं शब्दः) महान्तम् इन्द्रमिति शेषः अनूषत (नु स्तुतौ ततः लुङ् अन्त, आत्मनेपदमार्षम् स्तुतवन्तः। कीदृशमिन्द्रं तदाह विदद्वसुं विदत् (परस्मैपदमार्षम्) विद्यमानं वसु यस्य तम् धनवन्तमिति यावत् यद्वा विदद्भ्यः विद्वद्भ्यो वसु धनं यस्य तं विद्वत्पालकं इति। ६

দেবভক্ত দেবপক্ষপাতী ধূতপাপ যজমানগণ মন্ত্রোচ্চারণপূর্ব্বক যথাবুদ্ধি বিদ্বদ্গণের প্রতিপালক অথবা ধনবান্ দিগন্তবিশ্রুত মহান্ ইন্দ্রের স্তুতি করিলেন। ৬।

The stainless Yajamánas devoted to gods behymn the noted Indra according to their knowledge—Indra who supports the learned with riches (or who is possessed of riches). 6.

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा।
मन्दू समानवर्चसा॥ ७

१। यास्कः......इन्द्रेण हि सन्दृश्यसे सङ्गच्छमानः अबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात् समानवर्चसा इत्येतेन व्याख्यातम्। ७५६ पृ—प्रथम खण्ड।

तत्र दुर्गाचार्य्यः——हे भगवन् इन्द्र त्वम् इन्द्रेण ईश्वरेण दर्शिन वा मरुद्गणेन नित्यमेव सङ्गच्छमानः सन्दृक्षसे संदृश्यसे। अबिभ्युषा अभय-वता गणेन इत्यध्याहारः। तौ च युवां मरुद्गणः, त्वञ्च एकत्र सङ्गतौ। मदिष्णू हर्षशीलौ, नित्यप्रमुदितौ इत्यर्थः समानवर्चसौ च समानदीप्तौ इत्यर्थः।

२। सा......हे मरुद्गण! त्वम् इन्द्रेण संजग्मानः संगच्छमानः सं दृक्षसे हि सम्यक् दृश्येथाः खलु अवश्यमस्माभिर्द्रष्टव्य इत्यर्थः। कीदृशेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

इन्द्रेण? अबिभ्युषा भीतिरहितेन। कीदृशौ इन्द्रमरुद्गणौ? मन्दू नित्य-प्रमुदितौ, समानवर्चसा तुल्यदीप्ती, पुरा कदाचित् वृत्रवधदशायां इन्द्रस्य सखायः सर्वे देवाः वृत्रश्वासेन अपसारिताः। तदानीं इन्द्रस्य वृत्रसम्बन्धि सकलसेनाजयार्थं मरुद्भिः सङ्गमोऽभूत्। सोऽयमर्थो "वृत्रस्य त्वा श्वसथादिति मन्त्रे (७।८५ सू। ८म) संगृहीतः। इन्द्रो वै वृत्रं हनिष्यन् इति ब्राह्मणे (ऐः ब्राः ३।२०) प्रपञ्चितं। इन्द्रशब्दः परमैश्वर्य्यवन्तं मरुद्गणञ्च अभिधत्ते। तदानीम् इन्द्रस्य संबोधनं वह्निरेव अध्याहर्त्तव्यम्।

स्वाभिमतम्...मरुतः पृश्निमातरः अन्तरिक्षप्रभवाः (पृश्नि रन्तरिक्षं तुरुष्कपारस्यापोगस्थानानि, मनु स्तेषां माता, ते आफगानसैनिकाः) ते देवाद्भीतस्य इन्द्रस्य सैनिकत्वं गृहीत्वा देवलोकं जग्मुः ततः इन्द्रप्रसादात् मनुष्या स्ते देवत्वं गताः इन्द्रेण सह तेषां परं बन्धुत्वञ्च समजनि इत्यैतिह्य माश्रित्य मन्त्रोऽयं विरचितः। एते मरुतः आफगानसैनिका इति ध्येयं। "सप्तापः सप्त रक्षन्ति सद मप्रमाद मिति यजुः। ।३४ अ—५५ क।

२। प्रकृतार्थवाहिनी...हे मरुद्गण! त्वम् अबिभ्युषा (न—भी+ क्वसु=अबिभ्वान् तेन) निर्भीकेण इन्द्रेण देवराजेन संजग्मानः संगच्छमानः सङ्गतः सन् संदृक्षसे- संदृश्यसे (कर्म्मणि लेट् से) सम्यक् दर्शनीयो भवसि। एवं सम्मिलितौ युवाम् इन्द्रमरुद्गणौ मन्दू नित्यं हर्षयुक्तौ यतः युवां समानवर्चसा समानं वर्चस्तेजो ययो स्तौ तुल्यतेजस्विनौ। ७

হে মরুদ্গণ! তোমরা ভয়রহিত ইন্দ্রের সহিত মিলিত হইয়া সুন্দর শোভা পাইতেছ। ঠিক যোগ্যের সহিত যোগ্যের মিলন হইয়াছে। তোমাদিগের তেজঃ সমান এবং তোমরা নিত্য প্রমুদিত। ৭

O Maruts, you are looking well by being united with [your equal] the fearless Indra. Both of you are equally valourous and are always cheerful. 7.

अनवद्यै रभिद्युभिर्मखः सहस्वदर्चति।
गणैरिन्द्रस्य काम्यैः॥ ८

१। सा......मखः प्रवर्तमानोऽयं यज्ञोऽनवद्यैर्दोषरहितैरभिद्युभिर्द्युलो-कमभिगतैः काम्यैः फलप्रदत्वेन कामयितव्यैर्गणैर्मरुत्समूहैः सहितमिद्रस्येन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

सहस्वत् बलोपेतं यथा भवति तथा अर्चति पूजयति। अयं यज्ञो मरुत इन्द्रं चातिशयेन प्रीणयतीत्यर्थः। यज्ञ इत्यादिषु पंचदशसु यज्ञनामसु मखो विष्णुरिति पठितं। चतुश्चत्वारिंशत्स्वर्चतिकर्मस्वर्चति गायतीति पठितं॥

२। प्रकृतार्थवाहिनी……मखः अस्माकमयं समारब्धो यज्ञः द्युभिः द्युषु स्वर्गेषु अनवद्यैः न अवद्या न निन्दनीयाः अनवद्याः श्रेष्ठाः तैः श्रेष्ठैः, काम्यैः अभीष्टैः प्रियैः गणैः गणदेवैः मरुद्भिरिति यावत् (अपोगस्थानवासिनः पृश्निमातरो मरुतः इन्द्रसैनिकाः—इति ध्येयं)। सह वर्त्तमानं, सहस्वत् सहस्वन्तं बलवन्तं इन्द्रस्य इन्द्रं अभ्यर्चति सम्यक् पूजयति।

আমাদিগের অনুষ্ঠিত এই যজ্ঞ, প্রিয় মরুদ্গণ সহ স্বর্গে অবস্থিত বলশালী ইন্দ্রের সম্যগ্-রূপে অর্চনা করিতেছে। ৮

This our sacrifice duly worships the valourous Indra who resides in heaven (Mongolia) with his friends, the Maruts. 8.

अतः परिज्मन्नागहि दिवो वा रोचनादधि।
समस्मिन्नृञ्जते गिरः॥ ९॥

१। मा……हे परिज्मन् परितो व्यापिन् मरुद्गण! अतोऽस्मान्मरुद्गण-स्थानादंतरिक्षादागहि। अस्मिन्कर्मणि आगच्छ। दिवो वा द्युलोकाद्वा समागच्छ। रोचनादधि दीप्यमानादादित्यमण्डलाद्वा समागच्छ। अस्मदीयकर्मकाले यत्र यत्र तिष्ठसि, ततः सर्वस्मादागच्छेत्यर्थः। किमर्थमागमनमिति तदुच्यते। अस्मिन् कर्म्मणि वर्त्तमाने ऋत्विग्गिरः स्तुतीः समृञ्जते सम्यक् प्रसाधयति। ऋंजति प्रसाधनकर्मेति यास्कः। एताः स्तुतीः श्रोतुमागच्छेत्यर्थः। यद्यपि ऋत्विजा मंत्रस्य प्रयुज्यमानत्वादृंजतिधातोरुत्तमपुरुषेण भवितव्यं तथापि परोक्षकृतत्वेन निर्देशात्प्रथमपुरुषप्रयोगः। परोक्षकृतलक्षणं च यास्क आह। तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च। तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यंते प्रथमपुरुषैश्चाख्यातस्येति॥ ९

२। प्रकृतार्थवाहिनी……हे परिज्मन् (परि—अज्+मनिन् तत्सम्बुद्धौ कपोलचलमितत्।) पर्य्यज्मन् परितो गच्छन् इन्द्र! अस्मिन् भारतवर्षे ऋत्विक् इति शेषः गिरः स्तुतीः समृञ्जते पुनः पुनः उच्चारयति (ऋञ्ज भर्जने) अतएव त्वं दिवः आदिस्वर्गात् (द्यौरादिस्वर्गः, रोचनं दिव्—महः तपः, सत्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

—त्रिरोचनानि) रोचनात् द्युलोकैकदेशात् अधि उपरि देशात् वा। त्वं साम्प्रतं कुत्र तिष्ठसि—तन्न ज्ञातमिति। आगहि आगच्छ ॥ ९

হে বহুস্থানগামী ইন্দ্র, তুমি এখন আদিস্বর্গে কি ত্রিরোচনার (ত্রিদিবের) কোথায় আছ—তাহা আমরা জানিনা। এখানে ঋত্বিক্ তোমার উদ্দেশে পুনঃ পুনঃ স্তুতিমন্ত্র উচ্চারণ করিতেছেন, অতএব তুমি এই ভারতবর্ষে আগমন কর। ৯

O Indra, you travel to various places. We do not know where you are now—in heaven or in any other place of the three regions (Mahas, Tapas and Satya). Here (in India) the worshipper is repeating your hymns. Do please come. 9.

इतो वा सातिं मीमहे दिवो वा पार्थिवादधि।
इन्द्रं महो वा रजसः ॥ १०

१। सा……इन्द्रं देवं प्रति सातिं धनदानं अधीमहे आधिक्येन याचामहे। कस्मात् लोकात्? इति तदुच्यते—इतः अस्मात् अभिदृश्यमानात्-पार्थिवात् पृथिवीलोकाद्वा। दिवो वा द्युलोकाद्वा। महो महतः प्रौढ़ाद्रजसो वा पद्यादीनां रंजकादंतरिक्षलोकाद्वा। अयमिंद्रो यतःकुतश्चित् आनीय अस्मभ्यं धनं प्रयच्छत्वित्यर्थः। सप्तदशस्तु याञ्चाकर्मस्वीमहे यामीति पठितं ॥ १०

॥ इति प्रथमस्य प्रथमे द्वादशो वर्गः ॥

इंद्रमित्यादिकं दशर्चं यत्सूक्तं तत् सुरूपकृत्नु मित्यादिषु चतुर्थं। ऋषिच्छंदोदेवता विनियोगश्च पुर्ववत्। विशेषविनियोगस्तूच्यते। महाव्रते निष्केवल्यशस्त्रे इन्द्रमिद्गाथिन इति सूक्तं। तथा च पंचमारण्यके सूत्रितं। शिरो गायत्रमिंद्रमिद्गाथिन इति। तथा चतुर्विंशेऽहनि ब्राह्मणाच्छंसिनः शस्त्र इंद्रमिद्गाथिन इति षलहस्तोत्रियस्तृचः। चतुर्विंशे होताजनिष्टे त्युपक्रम्यायाहि सुषमा हि त इंद्रमिद्गाथिनो बृहत्। आ० ७ २। इति सूत्रितत्वात्। अतिरात्रे प्रथमे पर्यायेऽच्छावाकशस्त्रेऽयमेव तृचोऽनुरूपः। सुत्रितं च। इन्द्राय मद्वने सुतमिंद्रमिद्गाथिनो बृहत्। आ० ६ ४। इति ॥

२। प्रकृतार्थवाहिनी……यजमाना ब्रुवन्ति साम्प्रतम् इन्द्रः कुत्र तिष्ठति तन्न वयम् जानीमहे। अतो वयम् इन्द्रं देवराजम् इतः पार्थिवात् अधि पृथिवीलोकपृष्ठात् भारतवर्षात् वा, (इन्द्रः असुरवधार्थं प्रायेण भारतवर्षमाजगाम इति च ध्येयम्)। वा, अथवा दिवः अमुष्मात् आदिस्वर्गलोकात्, (आदिस्वर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

इन्द्रस्य राज्यमिति न तु दिव्) मह्नः रजसः महर्लोकात् चन्द्रद्वीपात् वा, कार्य्यवशात् इन्द्रो यदा तदा चन्द्रराज्ये महर्लोकेऽपि गच्छति स्म। इन्द्रं सातिं ("सातिर्दानेऽवसाने च" इति मेदिनी। सातिर्दानावसानयोरिति च अमरसिंहः)। दानं लक्षणया धनमिति यावत् ईमहे याचामहे ॥ १०।१२

ইন্দ্র এখন আদিস্বর্গ, ভারতবর্ষ অথবা মহর্লোকের কোথায় আছেন, তাহা জানি না, যেখানেই থাকুন, আমরা তাঁহার নিকট ধনাদি প্রার্থনা করি ॥ ১০।১২

We beg riches from Indra wherever he may be—in heaven, in India or in Maharloka. 10.

टिप्पनी······प्रथममन्त्रे यो ब्रध्नशब्दो विद्यते, तेन सुरज्येष्ठो ब्रह्मा एव अवबोधितो बभूव। तत्र मन्त्रवर्णः—जानन्ति वृष्णो अरुषस्य शेवं, उत ब्रध्नस्य शासने रणन्ति दिवः ॥ ५।७।३म

सप्तमं सूक्तम्।

ऋषिच्छन्दसी पूर्ववत् इन्द्रो देवता।

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः।
इन्द्रं वाणीरनूषत ॥ १

१। सा······गाथिनो गीयमानसामयुक्ता उद्गातार इन्द्रमित् इन्द्रमेव बृहत्—त्वामिद्धि हवामहे। ऋ० वे० १, ४६, ६म,। इत्यस्यामृचि उत्पन्नेन बृहन्नामकेन साम्ना अनूषत स्तुतवन्तः। अर्किणः अर्चनहेतुमंत्रोपेता होतारः अर्कैभिर्ऋग्रूपैर्मंत्रैरिन्द्रमेवानूषत। ये त्ववशिष्टा अध्वर्य्वादयस्ते वाणीर्वाग्भिर्यजूरूपाभिरिंद्रमेवानूषत। अर्कशब्दस्य मन्त्रपरत्वं यास्केनोक्तं। अर्को मंत्रो भवति यदनेनार्चंति। नि० ५, ४,। इति। श्लोक इत्यादिषु सप्तपंचाशत्सु वाङ्नामसु वाणी वाणीति पठितं ॥

२। प्रकृतार्थवाहिनी...गाथिनः सामगा यजमाना उद्गातारः, बृहत् बृहता उक्थेन साममन्त्रेण अर्किणः ऋङ्मन्त्रोच्चारणकारिणः होतारः अर्कैभिः अर्कैः ऋङ्मन्त्रैरिन्द्रं तथा वाणीः वाक्यः लक्षणया वाणीमन्ति यजूंषि तैः गद्ययजुर्भिरध्वर्य्यवः तमेव इन्द्रम् अनूषत (आत्मनेपदमार्षम्) अनाविषुः स्तुतवन्तः ॥ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

সামগ উদ্গাতৃগণ বৃহদ্‌কথে, হোতৃগণ ঋঙ্‌মন্ত্রে ইন্দ্রের স্তুতি করিতেছেন। অধ্বর্য্যু-গণও গত্ত যজুর্ম্মন্ত্রে ইন্দ্রের বন্দনা করিতেছেন ॥ ১

All are behymning Indra—the Udgátris with Brihat Uktha (Sámans) the Hotris with Riks and the Adhwaryus with Yajus. 1.

इन्द्र इत् हर्य्योः सचा संमिश्ल आ वचोयुजा।
इन्द्रो वज्री हिरण्ययः॥ २

१। सा .....इन्द्र इत् इन्द्र एव हर्य्योः हरिनामकयोरश्वयोः सचा सह युगपदासंमिश्लः सर्वतः सम्यग्मिश्रयिता। कीदृशयोर्हर्य्योः? वचोयुजा। इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिच्चितयोरित्यर्थः। अयमिन्द्रो वज्री वज्रयुक्तः। हिरण्ययः हिरण्यमयः सर्वाभरणभूषित इत्यर्थः।

२। प्रक्कतार्थवाहिनी.... इन्द्र इत् इन्द्र एव हर्य्योः अश्वयोः हरिभ्यां सचा सह आसंमिश्लः सम्यक् मिश्रितः, सततं हरिभ्यां सह वर्त्तते इति भावः। तौ हरी किम्भूतौ? वचोयुजा वचयुजौ यौ वाङ्मात्रेण रथाकर्षणविषये युक्तौ भवतः। इन्द्रो देवराजो वज्री वज्रधारी। वज्रः किम्भूतः? हिरण्ययः—हिरण्यमयः लौहमयः। "इन्द्रस्य वज्रमायस" मिति मन्त्रवर्णात्। २

ইন্দ্র যেন সর্ব্বদা তাঁহার ঘোটকদ্বয়ের সহিত বর্ত্তমান আছেন। উক্ত ঘোটকদ্বয় তাঁহার বাক্যমাত্রেই রথাকর্ষণ করিতে আরম্ভ করে। তিনি বজ্রধারী—তাঁহার সেই বজ্র (Cannon) লৌহময়। ২

Indra is always ready with his pair of horses which engage themselves in drawing his chariot. He is possessed of cannon which is made of steel. 2.

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि।
वि गोभिरद्रिमैरयत्॥ ३

अयमिन्द्रो दीर्घाय प्रौढ़ाय निरन्तराय चक्षसे दर्शनाय दिवि द्युलोके सूर्य्यं आरोहयत्। पुरा वृत्रासुरेण जगति यत् आपादितं तमः, तन्निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थं आदित्यं द्युलोके स्थापितवान् इत्यर्थः। स च सूर्य्यो गोभिः स्वकीयरश्मिभिः अद्रिं पर्व्वतप्रमुखं सर्वं जगत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

व्यैरयत्। विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः। अथवा इन्द्र एव गोभिर्जलैर्निमित्तभूतैरद्रिं मेघं व्यैरयत् विशेषण प्रेरितवान्। पंचदशसंख्याकेषु रश्मिनामसु खेदयः किरणा गाव इति पठितं। त्रिंशत्संख्याकेषु मेघनामस्वद्रिर्ग्रावेति पठितं ॥ ७

२। दया......इन्द्रः सर्वजगत्स्रष्टा ईश्वरः दीर्घाय महते निरन्तराय चक्षसे दर्शनाय आ क्रियार्थे सूर्य्यं प्रत्यक्षं सूर्य्यलोकं रोहयत् उपरि स्थापितवान् दिवि प्रकाशनिमित्ते वि विविधार्थे गोभिः रश्मिभिः। (गाव इति रश्मिनामसु पठितं निघ १।५)। अद्रिं मेघं, (अद्रि रिति मेघनामसु पठितं। निघं १।१०) ऐरयत् वीरयत् वीरयत्यूर्द्ध्वमधो गमयति अत्र लडर्थे लुङ्। २

३। रमा......इन्द्रः सूर्य्यं दीर्घाय चक्षसे बहुदूरदर्शनाय दिवि आकाशे आरोहयत् स्थापितवान्। अद्रिं पर्वतं गोभिः निमित्तभूतैः व्यैरयत् विदारितवान्। पर्वतं भित्त्वा वहिष्कृतवान् इत्यर्थः। ३

४। रमेश......इन्द्र बहुदूर दर्शनेर जन्य आकाशे सूर्य्यके आरोहण कराइया सुनिर्म्मल सूर्य्यकिरणद्वारा पर्वत आलोकित करियाछेन। २

स्वाभिमतम्......इन्द्रः अहल्याजारः, तत्पिता कश्यपः, माता च अदिति रिति, भ्राता विष्णुः। स चेत् परमेश्वरः, तत् कथं मुण्डकेन उक्तं—

भयादस्याग्निस्तपति, भयात् तपति सूर्य्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ?

अतएव स कथं स्वयमसिद्धः इन्द्रो जड़सूर्य्यं गगने आरोहयितुं समर्थः स्यात्? परन्तु भ्रान्तिरेषा सायणदयानन्दरमानाथादीनामिति। अद्रिर्मेघ इति यत् निघण्टुकारेण उक्तं तदपि अतीव हास्यजनकं। गौः...रश्मिः, गौः गोपशुश्च, परन्तु अत्र गोपशुरेव। सूर्य्यः—दिवाकरः, परन्तु अत्र सूर्य्यः—इन्द्रस्य भ्राताः यः खलु सावर्णिमनोः पिता। वस्तुतस्तु कश्चित् नराग्निर्नरः सूर्य्यश्च आसीत् इति विस्मृतिवशात् सर्वे भाष्यकारा इत्थं युक्तिविरुद्धं किमपि व्याचख्युरिति। (पश्य तावत् ७।७८। ८म मन्त्रं सभाष्यम्। तथा १।३७।१०म मन्त्रञ्च यजुः ४ अ ३५ क)।

५। प्रकृतार्थवाहिनो......बलानुचरैः पणिभिरङ्गिरसां गावः अपहृताः। यदा ते गाः अपहृत्य गच्छन्तः, तदैव ते कस्यां दिशि कियत्पर्य्यन्तं वा अगच्छन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

तत् स्थिरकर्त्तुं इन्द्रः दीर्घाय चक्षसे दूरदर्शनार्थं सूर्य्यं स्वभ्रातरं दिवि द्यवि स्वर्गे स्थितं अद्रिं मेरुपर्वतशृङ्गविशेषं आरोहयत् पर्वतोपरि उदस्थापयत्। ततः गोभिः गवां अन्वेषणाय सरमां व्यैरयत् प्रेरितवान्। ३

বলানুচর পণিরা অঙ্গিরাদিগের গো সকল অপহরণ করিয়া লইয়া যাইতেছে, ইহা শুনিয়া ইন্দ্র আপনার ভ্রাতা সূর্য্যকে দূরদর্শনের জন্য মেরুপর্বতের এক উচ্চ শৃঙ্গে উঠাইয়া দিলেন। তৎপর সেই সকল অপহৃত গো সকলের অন্বেষণজন্য সরমাপ্রভৃতি প্রেরিত হইয়াছিল। ৩

Indra learning that the Panis, the attendants on Bala, were stealing away the cows of the Angiras, made [his own brother] Surya ascend a high summit of the divine mountain (Meru) to have a distant view. Then Saramá [and others] were sent for searching the stolen cows. 3.

इन्द्र वाजेषु नो अव, सहस्रप्रधनेषु च।
उग्र उग्राभिरूतिभिः॥ ४

१। सा……हे इन्द्र उग्रः शत्रुभिः अप्रधृष्यः त्वं उग्राभिरप्रधृष्याभिरूतिभिः अस्मद्विषयरक्षाभिः वाजेषु युद्धेषु नः अस्मान् अव रक्ष। तथा सहस्रप्रधनेषु च सहस्रसंख्यके गजाश्वादिलाभयुक्तेषु महायुद्धेषु अपि रक्ष। ४

२। प्रकृतार्थवाहिनी……हे इन्द्र! उग्रः अप्रधृष्यः अजेयः कठोरस्त्वं वाजषु क्षुद्रयुद्धेषु तथा सहस्रप्रधनेषु सहस्राणि प्रधनानि निधनानि यत्र ते सहस्रप्रधनाः महासंग्रामाः, तेषु सहस्रप्रधनेषु महायुद्धेषु च नः अस्मान् उग्राभिः ऊतिभिः कठोरोपायैः अव रक्ष।

হে ইন্দ্র! তুমি অজেয় ও অতীব কঠোর। তুমি কি ক্ষুদ্র যুদ্ধ, কিংবা কি মহাসংগ্রাম তাহাতে তোমার কঠোর উপায়দ্বারা আমাদিগকে রক্ষা কর। ৪

O Indra! You are unconquerable. Protect us by strong measures in ordinary battles and in those where thousands of lives are lost. 4.

इन्द्रं वयं महाधने इन्द्रमर्भे हवामहे।
युजं वृत्रेषु वज्रिणं॥ ५

१। सा……वयमनुष्ठातारो महाधने प्रभूतधननिमित्तमिंद्रं हवामहे आह्वयामः। अर्भे अर्भके स्वल्पेऽपि धने निमित्तभूते सतीन्द्रं हवामहे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

कीदृशमिन्द्रं। युजं सहकारिणं समाहितं वा। वृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय वज्रिणं वज्रोपेतं॥ महाधनशब्दो यद्यपि संग्रामनामसु पठितस्तथापि महाधनवचनमत्र संग्राम इति बहुव्रीहित्वे सत्यंतोदात्तत्वासिद्धेर्नात्र तत् गृहीतं॥ ५

२। प्रकृतार्थवाहिनी......वयं भारतवासिनः सर्वे वृत्रेषु वृत्रपक्षीयाणां वधाय अर्भे क्षुद्रे युद्धे युजं योग्यं वज्रिणं वज्रधारिणं इन्द्रं हवामहे आह्वयामः, तथा महाधने महासंग्रामे (महाधनं संग्राम इति निघ २२० पृ) महान्ति धनानि निधनानि यत्र, तस्मिन्, इन्द्रं हवामहे। ५

ভারতবাসী আমরা (যেহেতু ভারতবর্ষেই বৃত্রাসুর সহ ভারতবাসীর প্রথম যুদ্ধ হয় তাহাতেই ইন্দ্র আগমন করেন) কি ক্ষুদ্র যুদ্ধ, অথবা কি মহাযুদ্ধ, তাহাতেই আমরা বজ্রধারী উপযুক্ত সহায় ইন্দ্রকে আহ্বান করিতেছি। ৫

We (the inhabitants of India) invoke the able assistance of Indra, the wielder of the thunderbolt, in great as well as in ordinary battles. 5.

स नो वृषन्नमुं चरुं सत्रादावन् अपावृधि।
अस्मभ्यम् अप्रतिष्कुतः॥ ६

१। सा...... हे सत्रादावन्। अस्मदभीष्टानां सर्वेषां फलानां सह प्रदातः। अतो व्रीह्यादिनिष्पत्त्यर्थं हे वृषन् वृष्टिप्रद इन्द्र नोऽस्मदर्थममुं दृश्यमानं चरुं मेघमपावृधि उद्घाटय। तथैव अस्मभ्यमस्मदर्थमप्रतिष्कुतः प्रतिशब्दरहितः। यद्यदस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति। अतोऽस्मद्विषये कदाचिदपि अप्रतिस्खलितः। एतदेवाभिप्रेत्य यास्क आह। अप्रतिष्कुतोऽप्रतिष्कृतः अप्रतिस्खलितो वेति। ६

स्वाभिमतम्...... नायं मन्त्रः सुखबोधः। श्रीमता वास्कलेन "सत्रादावन्", इति एकपदं मेने, तन्न। चरुं मेघं इत्यपि असाम्प्रतं युक्ति विरुद्धत्वात्। "अप्रतिष्कुतः" पदमेतत् कपोलचलं अपभ्रष्टं वा इत्येव प्रतीयते परन्तु न केनापि अस्य स्वरूपनिर्णयने प्रयत्नः कृतः। ६

२। प्रकृतार्थवाहिनी......हे वृषन् अभीष्टदातः हे अवन् रक्षण-तत्पर इन्द्र ! स त्वं नः अस्माकं सत्रादी यज्ञादी धर्म्मकर्म्मणि चरुं विरुद्धाचारिणं अमुं दूरवर्त्तिनं वृत्रासुरं अपवृधि क्लीवीकुरु। अस्य प्रभावं चूर्णीकुरु। त्वञ्च अस्मभ्यं भारतवासिभ्यो निमित्तं अप्रतिष्कुतः अविचलितो भव। ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

হে ইন্দ্র তুমি আমাদিগের অভীষ্টদাতা ও রক্ষাকর্ত্তা, আমাদিগের রক্ষণসমর্থ সেই তুমি আমাদিগের যজ্ঞাদির বিরুদ্ধাচরণকারী ঐ বৃত্রকেও আর বাড়িতে দিও না। উহাকে নষ্ট কর। আর তুমি আমাদিগের বিষয়ে সর্বদা অবিচলিত থাক। ৬

O Indra! You are our protector and the fulfiller of our desires. Please curtail the glory of Vritra who moves against us. Be unflinching with regard to us. 6.

तुञ्जे तुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः।
न विन्धे अस्य सुष्टुतिं॥ ७

१। यास्कः.....दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विंदामि समाप्तिं स्तुतेः। नि० ६. १८.। ७। १०१५ पृ। १ ख।

२। सा——तस्मिन्तस्मिन् फलदातरि देवान्तरे ये स्तोमाः स्तोत्रविशेषा उत्तरे उत्कृष्टाः सन्ति तैः स्तोमैः सर्वैरपि वज्रिणो वज्रयुक्तस्येन्द्रस्य सुष्टुतिं योग्यां शोभनस्तुतिं न विंधे न विंदामि। इन्द्रस्य अत्यन्तगुणबाहुल्येन देवान्तरेषूत्तमत्वेन प्रसिद्धान्यपि स्तोत्राणि न पर्याप्तानीत्यर्थः॥ ७

स्वाभिमतम्......"तुञ्जे तुञ्जे" किं, तन्न केनापि बुद्धं। "दाने दाने" इति यास्केन; "दातव्ये दातव्ये" इति दयानन्देन; "तस्मिन् तस्मिन्" इति सायणेन व्याख्यातम्। रमानाथस्तु अत्र मौनमाप इति। परन्तु "तुञ्ज" इति शब्देन "राशिः" इत्येव बोध्यते पूर्ववङ्गेषु, तदेव वयं समीचीनं मन्यामहे। वस्तुतस्तु प्रादेशिक एव एष शब्दः।

३। प्रकृतार्थवाहिनी.....वज्रिणः वज्रधारिणः अतएव रक्षणसमर्थस्य रक्षकस्य इन्द्रस्य उत्तरे परवर्त्तिनि युगे ये स्तोमाः स्तुतिमन्त्राः तुञ्जे तुञ्जे राशौ राशौ राशीकृताः स्युः, परन्तु अस्य महत इन्द्रस्य सुस्तुतिं शोभनस्तुतिं प्रकृतस्तवमन्त्रं न विन्धे न विन्दामि न गच्छामि। कोऽपि स्तुत्या अस्य गुणान्तं गन्तुं न शक्त इति। इन्द्रः अनन्तगुणशाली इत्यर्थः। ७

লোকসকল ইন্দ্রের যে প্রকার স্তুতিমন্ত্র রচনা করিতেছেন, তাহাতে উত্তরকালে এই সকল স্তুতিমন্ত্র তুঞ্জীকৃত হইবে। কিন্তু তাহাতেও ইহার অনন্তগুণের প্রকৃত বর্ণনা করা হইবে না। ৭

The hymns unto Indra will be collected in future. But a full collection of all his excellences is hardly to be attained. 7.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

वृषा यूथेव वंसगः कृष्टीरियर्त्त्योजसा ।
ईशानो अप्रतिष्कुतः ॥ ८

१। सा……वृषा कामानां वर्षिता इन्द्र ओजसा स्वकीयबलेन अनुग्रहीतुं कृष्टीर्मनुष्यान् इयर्ति प्राप्नोति। कीदृश इन्द्रः ईशानः समर्थः अप्रतिष्कुतः। प्रतिशब्दरहितः। याच्यमानं न परिहरतीत्यर्थः। इन्द्रस्य दृष्टान्तः। वंसगो वननीयगतिर्वृषभो यूथेव गोयूथानि यथा प्राप्नोति तद्वत् ॥ ८

२। प्रकृतार्थवाहिनी……यथा वंसगः वंशगः वंशवृद्ध्यर्थं गन्ता वृषा वृषभः यूथा यूथानि गोयूथानि इयर्त्ति गच्छति प्राप्नोति, तथा ईशानः प्रभुः, उपकारकरणे समर्थः वृषा अभीष्टदाता अप्रतिष्कुतः प्रतिशब्दरहितः अतुलनीयप्रभव इन्द्र ओजसा बलेन कृष्टीः कृषकान् मनुष्यान् इयर्त्ति गच्छति। ८

যে প্রকার বর্ষণসমর্থ বৃষভ বংশরক্ষার্থ গো-যূথের দিকে বেগে ধাবিত হয়, তদ্রূপ প্রভু অতুলনীয়প্রতাপ ইন্দ্রও মনুষ্যদিগের দিকে রক্ষার্থ বলসহ ধাবিত হইয়া থাকেন। ৮

The powerful and unrivalled Indra rushes with impetuosity towards men for protection as a pouring bull rushes towards cows for breeding. 8.

य एकश्चर्षणीनां वसूनां इरज्यति
इन्द्रः पञ्चक्षितीनां ॥ ९

१। सा……य इन्द्रः स्वयमेक एव चर्षणीनां मनुष्याणामिरज्यति ईष्टे। तथा वसूनां धनानामिरज्यति स इन्द्रः पंच निषादपंचमानां क्षितीनां निवासार्हाणां वर्णानामनुग्रह्णीतेति शेषः ॥

आश्विनं शंसिषन्निन्द्रं वो विश्वतस्परीति जुहुयात्। संस्थितेष्वाश्विनाय स्तुवत इति खंडे वयमहां असि इति द्वाभ्यामिन्द्रं वो विश्वतस्परि इति सूत्रितं ॥ चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिन इन्द्रं वो विश्वतस्परीत्यारम्भणीया। चतुर्विंश इत्युपक्रम्य ऋजुनीती नो वरुण इन्द्रं वो विश्वतस्परि इति सूत्रितं। तामेतां दशमीमृचमाह ॥

स्वाभिमतं……पञ्चक्षितीनां—पञ्च निकृष्टमध्यमोत्तमोत्तमतरोत्तमतमानां पञ्चविधानां पृथिवीलोकाना मिति दयानन्दसरस्वती। निवासयोग्यानां पञ्चलोकाना मिति रमानाथः ; निषादपञ्चमानां क्षितीनां इति सायण इति यत् एते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

सर्वे व्याचख्युः—तत्सर्वं भ्रष्टं, परन्तु पञ्चक्षितयः—पञ्चनदप्रदेशाः (पाञ्जाव) इति।

२। प्रकृतार्थवाहिनी......एकः असहायः य इन्द्रः पञ्चक्षितीनां पञ्चनदप्रदेशानां चर्षणीनां कर्षणीनां (भाषापभ्रंशात् ककारस्य चकारत्वं) कृषकाणां वसूनां धनानां इरज्यति ईष्टे प्रभुर्भवति। ८

একমাত্র ইন্দ্রই পঞ্চনদভূমিষ্ঠ পঞ্জাবপ্রদেশের কৃষক মনুষ্যদিগের ধনের প্রভু হইতেছেন। ৯

Indra alone lords it over the money of (i. e. disposes money to) the men (lit. cultivators) of the Punjab. 9.

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः।
अस्माकमस्तु केवलः। १० ॥

१। सा......हे ऋत्विग्यजमानाः विश्वतः सर्वेभ्यो जनेभ्यः परि उपरि अवस्थित मिन्द्रं वो युष्मदर्थं हवामहे आह्वयामः, अतः स इन्द्रः अस्माकं केवलः असाधारणः अस्तु। इतरेभ्योऽपि अधिकमनुग्रह मस्मासु करोतु इत्यर्थः। १०।१४

२। प्रकृतार्थवाहिनी......हे भारतवासिनो जनाः वयं, वो युष्मदर्थं विश्वतः सर्वेभ्योजनेभ्यः परि उपरि श्रेष्ठत्वेन अवस्थितं इन्द्रं हवामहे आह्वयामः। सः इन्द्रः केवलः केवलं अस्माक मस्तु भवतु। १०

হে ভারতবাসী লোক সকল, আমরা তোমাদিগের জন্য সকল লোকের শ্রেষ্ঠ ইন্দ্রকে আহ্বান করিতেছি, তিনি কেবল আমাদিগেরই হউন। ১০

We invoke Indra, the highest in the world. May he be of us alone. 10.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

अष्टमं सूक्तम् ।

ऋषिच्छन्दसी पूर्व्ववत् । इन्द्रोदेवता ।

एन्द्र सानसिं रयिं सजित्वानं सदासहं ।
वर्षिष्ठमूतये भर ॥ १ ॥

आ । इन्द्र । सान् असि । रयिं । सऽजित्वानं । सदाऽसहं । वर्षिष्ठं । ऊतये । भर ॥ १ ॥

१ । सा——हे इन्द्र । ऊतयेऽस्मद्रचार्थं रयिं धनमाभर आहर । कीदृशं रयिं ? सानसिं संभजनीयं । सजित्वानं समानशत्रुजयशीलं । धनेन हि शूरान् भृत्यान् संपाद्य शत्रवो जीयन्ते । सदासहं । सर्वदा शत्रूणामभिभवहेतुं । वर्षिष्ठं अतिशयेन वृद्धं प्रभूतमित्यर्थः ॥ १

स्वाभिमतं .....नायं मन्त्रः सुखबोधः । "सानसिं", "सजित्वानं" एतत् पदद्वयं प्रसादगुणोपेतं न । सानसिं—सम्भजनीयं इति सायणेन व्याख्यातं दयानन्दरमानाथाभ्यामपि तत् स्वीकृतं । परन्तु कथं ? तन्न बुध्यते । "सानसिं" इति पदं लिपिकरप्रमाददुष्टमित्येव अनुमीयते । "सानसि" एव विशुद्धः पाठ इति । १

२ । प्रकृतार्थवाहिनी......हे इन्द्र ! त्वं सान् (सन्+विण्) दाता (षन् दुञ् दाने) असि भवसि । अतएव त्वमस्माकं ऊतये रचार्थं सजित्वानं शत्रुजयकरणसाधनं सदासहं सर्वकालस्थिरं वर्षिष्ठं प्रभूतं रयिं धनं आभर आहर । १ ।

হে ইন্দ্র ! তুমি দাতা, অতএব আমাদিগের রক্ষার জন্য তুমি এমন ধন আহরণ করিয়া দেও, যাহা বাড়িবে ভিন্ন কমিবে না! ও যদ্দ্বারা আমরা শত্রুজয় করিতে পারিব । ১

O Indra, you are bountiful. Give us plentiful and enduring riches with which we can conquer our enemies. 1.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै।
त्वोतासो नि अर्वता ॥ २

१। सा...येन धनेन सम्पादितानां भटानां निमुष्टिहत्यया नितरां मुष्टिप्रहारेण वृत्रा शत्रून् निरुणधामहै निरुद्धान् करवाम, तादृशं धनं आहर इत्यर्थः। त्वोतासः त्वया रक्षिता वयं अर्वता अस्मदीयेन अश्वेन निरुणधामहै, इत्यनुषङ्गः। पदातियुद्धेन अश्वयुद्धेन च शत्रून् विनाशयाम इत्यर्थः ॥ २

२। प्रकृतार्थवाहिनी...हे इन्द्र इति शेषः, त्वा त्वया ऊतासः ऊता रक्षिताः वयं देवयवो भारतवासिनः सर्वे येन धनेन संगृहीतानां—सैनिकानां मुष्टिहत्यया, मुष्ट्या मुष्ट्याघातेन वृत्रा वृत्राणि वृत्रासुरसैन्यानि निरुणधामहै नितरां निरुद्धानि करवाम, मारयाम इत्यर्थः। तथा अर्वता अश्वेन अश्वारोहि सैन्येन च तान् वृत्रसैनिकान् निरुणधामहै निरुद्धान् करवाम इति। २

হে ইন্দ্র! এইরূপে ধনসঞ্চয়শীল আমরা সেই ধন পাইলেই মুষ্টিপ্রহারপটু পদাতিক ও অশ্বারোহী সৈন্য সংগ্রহ করিয়া বৃত্রসৈন্যগণকে পরাভূত ও নিহত করিতে পারিব। ২

Thus protected, and favoured with riches, we shall be able to rally foot-soldiers expert in employing fists as well as horse-soldiers by whom we shall be able to conquer and destroy the army of Vritra, 2.

इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि।
जयेम सं युधि स्पृधः ॥ ३

१ सा——हे इन्द्र! त्वोतासः त्वया पालिता वयं घना घनं शत्रुप्रहरणाय अत्यन्तदृढ़ं वज्रं आयुधं आददीमहि स्वीकुर्म्मः। तेन च वज्रेण युधि युद्धे स्पृधः स्पर्द्धमानान् शत्रून् संजयेम सम्यक् जयेम ॥ ३

२। प्रकृतार्थवाहिनी......हे इन्द्र! त्वोतासः त्वा त्वया (विभक्तिव्यत्ययः) ऊतासः ऊताः रक्षिताः वयं भारतवासिनः सर्वे युधि संग्रामे घना घनं लौहमयं कठिनमिति यावत् वज्रं (इन्द्रस्य वज्रमायसमिति मन्त्रवर्णात्) शतघ्नीं आददीमहि गृह्णामः, तेन घनेन च स्पृधः स्पर्द्धमानान् शत्रून् जयेम पराभूतान् कुर्म्मः। ३

হে ইন্দ্র! তোমাকর্ত্তৃক রক্ষিত আমরা যুদ্ধক্ষেত্রে স্পর্দ্ধান্বিত শত্রুগণকে কঠিন লৌহময় বজ্র (কামান) প্রহারে পরাভূত করিব। ৩

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

O Indra! being protected by you we shall be able to conquer the boasting enemies with hard pieces of canon made of steel. 3.

वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयं।
सासह्याम पृतन्यतः॥ ४

१। सा ·····वयं कर्मानुष्ठातारः शूरेभिः शौर्ययुक्तैरस्तृभिरायुधानां प्रक्षेप्तृभि-र्भटैः संयुज्येमह्हीति शेषः। हे इन्द्र तादृशा भटसहिता वयं युजा सहायभूतेन त्वया पृतन्यतः सेनामिच्छतः शत्रून् सासह्याम अतिशयेन अभिभवेम॥ ४

२। प्रकृतार्थवाहिनी·····हे इन्द्र! वयं भारतवासिनः सर्वे अस्तृभि अस्त्रक्षेपणपटुभिः शूरेभिः शूरैः तथा शूरेण महावीरेण त्वया युजा सहायेन मिलिताः सन्तः पृतन्यतः आत्मनः पृतनां इच्छतः युयुत्सून् शत्रून् हन्तुमिति शेषः, सासह्याम पुनः पुनः यत्नपरायणा भवेम। ४

হে ইন্দ্র! ভারতবাসী আমরা অস্ত্রক্ষেপণপটু মহাবীরগণ ও তোমার সহিত মিলিত হইয়া সংগ্রামক্ষেত্রে যুযুৎসু শত্রুগণকে বধ করিবার জন্য সবিশেষ যত্নপরায়ণ হইব। ৪

O Indra! We (the Indians), too, uniting with you and with the valiant heroes expert in throwing missiles, shall try our best to destroy the contending enemies fighting with soldiers. 4.

महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे।
द्यौर्न प्रथिना शवः॥ ५

१। सा·····अयमिन्द्रो महान् शरीरेण प्रौढ़ः परश्च गुणैरुत्कृष्टोऽपि। नु किंच वज्रिणे वज्रयुक्ताय इन्द्राय महित्वं पूर्वोक्तं द्विविधमाधिक्यं सर्वदास्तु। स्वभावसिद्धस्यापि भक्त्या प्रार्थनमेतत्। किंच। द्यौर्न द्युलोक इव शवो बलमिन्द्रस्य सेनारूपं प्रथिना प्रथिम्ना पृथुत्वेन युज्यतामिति शेषः। यथा द्युलोकः प्रभूत एवमस्य सेना प्रभूता॥ ५

२। प्रकृतार्थवाहिनी····अयं अस्मद्रक्षक इन्द्रः परो महान् अतिशयेन महत्तरः, वज्रिणे वज्रधारिणे वज्रधारकस्य इन्द्रस्य महित्वं महत्त्वं अस्तु भवतु। तस्य इन्द्रस्य शवः बलं प्रथिना प्रथिम्ना प्रभूतत्वेन द्यौरिव आदिस्वर्ग इव प्रभूतं भवतु। ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

(আমাদিগের রক্ষাকর্ত্তা) এই ইন্দ্র মহৎ হইতেও মহত্তর। ইঁহার বলবীর্য্য আদি-স্বর্গ দ্যোর ন্যায় প্রভূত হউক। ৫

Indra is greater than the great: May the greatness of the Vajrin (Indra) extend like Dyo (heaven). 5.

समोहे वा ये आशत, नर स्तोकस्य सनितौ।
विप्रासो वा धियायवः॥ ६

१। सा……ये नरः पुरुषाः समोहे संग्रामे तोकस्य अपत्यस्य सनितौ वा लाभे वा आशत व्याप्तवन्तः। इन्द्रं स्तुत्वा इति शेषः। वा अथवा विप्रासो मेधाविनो धियायवः प्रज्ञाकामाः सन्त आशत ते सर्वे लभन्ते इत्यध्याहारः। रण इत्यादिषु षट्चत्वारिंशत्संग्रामनामसु समोहे समिथ इति पठितं। पंचदशस्वपत्यनामसु तुक्तोकमिति पठितं॥

२। प्रकृतार्थवाहिनी……धियायवः (धी—धारणे, धीयते धार्य्यते अवबोध्यते श्रुतं अर्थजातं अनया। इति धिया प्रज्ञा, तां आत्मनः इच्छन्ति इति क्यच् (क्याच्छन्दसि इति उ-प्रत्ययः, अतो लोपः—इति सायणः)। बुद्धिकामा विप्रासो मेधाविनः पण्डिताः तोकस्य पुत्त्रस्य सनितौ लाभे यथा आशत प्रीता भवेयुः, तथा नरः अस्मद्विधा नराः मनुष्याः समोहे संग्रामेऽपि तथा प्रीता भवन्ति।

যে প্রকার পণ্ডিতেরা পুত্রলাভে প্রীত হয়েন, তদ্রূপ অস্মাদৃশ মনুষ্যেরাও যুদ্ধক্ষেত্রে যাইতে পারিলে প্রীত হইয়া থাকে। ৬

Men like us are gratified by being able to fight, as learned men are gratified at the acquisition of a son. 6.

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते।
उर्वीरापो न काकुदः॥ ७

१। तत्र सायणः……यः कुक्षिः अस्य इन्द्रस्य उदरप्रदेशः सोमपातमः अतिशयेन सोमस्य पाता, स कुक्षिः समुद्र इव पिन्वते वर्द्धते। सेचनार्थो धातु रौचिल्लेन हृद्धिं लच्चयति। काकुदो मुखसम्बन्धिन्यः उर्वी बंह्व्य आपोन जलानि इव जिह्वासंबद्धं आस्योदकं यथा कदाचिदपि न शुष्यति तथा इन्द्रस्य कुक्षिः सोमपूरितो न शुष्यति इत्यर्थः। यद्यपि श्लोक इत्यादिषु सप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

पश्चाशत्सु वाग्नामसु काकुत् जिह्वा इति पठितं, तथापि उदकसम्बन्धसिद्ध्यर्थं अत्र काकुच्छब्देन मुख मुपलक्षितं। सम्बन्धवाचिनः तद्धितस्य अत्र छान्दसो लोपो द्रष्टव्यः। सोमपातमः सोमं पिबति इति सोमपाः।

२। प्रकृतार्थवाहिनी . . . . . यः कुक्षिः इन्द्रस्य उदरप्रदेशः सोमपातमः अतिशयेन सोमपानशीलः सः कुक्षिः समुद्र इव पिन्वते प्यायते (पिवि वर्द्धने) सोमपानेन वर्द्धते, उर्वीः आपः (विभक्तिव्यत्ययेन) उर्वीभिः अद्‌भिः काकुदो न ? काकुदमिव तालुवत् मुखगह्वरमिव न ? यथा प्रभूतजलेन मुखगह्वरं स्फीतं भवति, तथा प्रभूतसोमपानेनापि इन्द्रस्य उदरं स्फीतं भवति न तु विदीर्य्यति इति। ७

যে প্রকার মুখের মধ্যে অধিক জল লইলে মুখগহ্বর স্ফীত হইয়া থাকে, তদ্রূপ দেবরাজ ইন্দ্রের উদরও প্রভূত সোমপানে সমুদ্রের ন্যায় স্ফীত হয়, কিন্তু ফাটিয়া যায় না। ৭

Indra's belly becomes inflated like ocean, with an abundance of Soma-juice, like the cavity of the mouth filled with an abundance of water. 7.

एवा हि अस्य सूनृता विरप्शी गोमती मही।
पक्वा शाखा न दाशुषे ॥ ८

१। सायणः . . . . . अस्येन्द्रस्य सूनृता प्रियसत्यरूपा वाक् दाशुषे हविर्दत्तवते यजमानाय तदर्थमेवाहि एवं खलु। अनन्तरपदवक्ष्यमाणगुणोपेता भवतीत्यर्थः। कीदृशी ? विरप्शी। विविधरपणोपेतवाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः। गोमती बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः। अत एव मही महती पूज्या। यथोक्तवाचो दृष्टान्तः। पक्वा शाखा न। यथा बहुभिः पक्वैः फलैरुपेता पनसवृक्षादिशाखा प्रीतिहेतुस्तद्वत्। यद्यपि महन्नामसु व्राधं विरप्शीति पठितं तथाप्यत्र महीत्यनेन पुनरुक्तिप्रसंगादवयवार्थो गृहीतः॥ ८

२। प्रकृतार्थवाहिनी . . . . . हि निश्चितम् अस्य इन्द्रस्य मही महती विरप्शी (कपोलचलभितत्) विविधरपणोपेता विविधोपचारवती सूनृता प्रिया सत्या च वाक् दाशुषे हविर्दत्तवते यजमानाय शाखा वृक्षलता पक्वानि फलानि न इव गोमती गोप्रदा भवतीति शेषः॥ ८

যে প্রকার বৃক্ষশাখা প্রার্থিগণকে পক্বফল দান করে, সেইরূপ ইন্দ্র হোতা যজমানদিগকে গোদান করিয়া থাকেন। তাঁহার মনোহর বাক্য যেমন প্রিয়, তেমনই সত্যও বটে। ৮

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

As the branches of a tree bestow ripe fruits on those who want them, so Indra bestows cows on the Yajamánas (sacrificers). 8.

एवा हि ते विभूतय ऊतय इन्द्र मावते।
सद्य श्चित् सन्ति दाशुषे॥ ९

१। सायण:...... हे इन्द्र ते तव विभूतय ऐश्वर्यविशेषा एवा हि। एवंविधा: खलु। किंविधा इति तदुच्यते। मावते मत्सदृशाय दाशुषे हविर्दत्तवते यजमानाय ऊतयस्त्वदीयरक्षारूपा: सद्यश्चित् सन्ति। यदा कर्मानुष्ठितं तदैव भवन्ति॥ मावते मत्सदृशाय वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्ये उपसंख्यान मिति अस्मच्छब्दात् मतुप्॥ ९

प्रकृतार्थवाहिनी...... हे इन्द्र! ते तव विभूतय: ऐश्वर्य्याणि ऊतयो रक्षणानि च मावते मादृशाय दाशुषे हविर्दत्तवते यजमानाय सद्यश्चित् सद्य एव सन्ति भवन्ति॥ ९

হে ইন্দ্র! তোমার ঐশ্বর্য্য ও রক্ষাবিধান মাদৃশ অনুগৃহীত ব্যক্তিদিগের প্রতি সত্বই হইয়া থাকে। ৯

O Indra! your gift and protection fructify instantaneously with regard to men like us (who offer sacrifices). 9.

एवा हि अस्य काम्या स्तोम उक्थञ्च शंस्या।
इन्द्राय सोमपीतये॥ १०। १६

१। सायण:...... अस्य इन्द्रस्य स्तोम: सामसाध्यं स्तोत्रमुक्थं च ऋक्साध्यं शस्त्रमपि वा हि एते उभे एवंविधे खलु किंविधे इति तदुच्यते। काम्या कामयितव्ये। शंस्या ऋत्विग्भि: शंसनीये। किमर्थं शंसनमिति तदुच्यते। इन्द्राय सोमपीतये इन्द्रस्य सोमपानार्थं॥ १०। १६

२। प्रकृतार्थवाहिनी..... हि निश्चितं अस्य एवंभूतस्य महत इन्द्रस्य काम्या काम्ये प्रार्थनीये स्तोम: ऋक्साध्यं स्तोत्रं उक्थञ्च सामसाध्यं शस्त्रञ्च उभे इन्द्राय इन्द्रस्य सोमपीतये सोमपानार्थं शंस्या शंस्ये शंसनीये। १०। १६

এই প্রকার মহৎ ইন্দ্রের সোমপানের নিমিত্ত সামমন্ত্র উক্থ ও ঋঙ্‌মন্ত্রে স্তুতি গান করা কর্ত্তব্য। ১০। ১৬

For the draught of Soma of such Indra, Riks and Sámas should be chanted. 10.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

नवमं सूक्तम्।

ऋषिश्छन्दोदेवताः पूर्व्ववत्।

इन्द्रेहि मत्सि अन्धसो विश्वेभिः सोमपर्व्वभिः।
महाँ अभिष्टि रोजसा ॥ १

१। सा......हे इन्द्र एहि अस्मिन् कर्म्मणि आगच्छ आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः सोमरसरूपैः अन्धसः अन्धोभिरन्नैः मत्सि माद्य हृष्टो भव तत ऊर्द्धं ओजसा बलेन महान् भूत्वा अभिष्टिः शत्रूणां अभिभविता भव इति शेषः। १

२। प्रकृतार्थवाहिनी...हे इन्द्र त्वम् एहि आगच्छ आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः (विभक्तिव्यत्ययः) विश्वेषां सोमपर्वणां सोमोत्सवानाम् अन्धसः अन्धोभिः (विभक्तिव्यत्ययः) अन्नैः भोजनद्रव्यैः मत्सि माद्यसि" (मत्सि इति पदं कपोलचलं) हृष्टोभवसि ततः ओजसा बाहुबलेन महान् अजेयो भूत्वा अभिष्टिः (आङ–स्था+क्तिः कर्त्तरि) अभिमुखे तिष्ठ शत्रूणामभिभविता भव इति शेषः। १

হে ইন্দ্র! তুমি এস, আসিয়া আমাদিগের এই সোমমহোৎসবের অন্নাদি ভোজন করিয়া হৃষ্ট হও, এবং বলে অজেয় হইয়া শত্রুগণের পরাভব সাধন কর। ১

Come O Indra! Be gratified with the eatables offered in this Soma sacrifice and being unconquerable bring about the defeat of the enemies. 1.

एमेनं सृजता सुते मन्दि मिन्द्राय मन्दिने।
चक्रिं विश्वानि चक्रये ॥ २

१। ईमित्यनर्थकः पादपूरणाय प्रयुक्तः। हे अध्वर्य्यवः सुते अभिषुते चमसस्थे सोमे एनं सोममिन्द्राय इन्द्रार्थमासृजत पुनरभ्युन्नयत। शुक्रामंथिचमसगणे पुनरभ्युन्नयनमापस्तंभेनोक्तं—होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तध्वमितोति। कीदृशमेनं? मन्दिं हर्षहेतुं। चक्रिं साधुकरणशीलं। कीदृशाय इन्द्राय मन्दिने हर्षयुक्ताय। विश्वानि सर्वाणि कर्म्माणि चक्रये कृतवते सर्वकर्मनिष्पादनशीलायेत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

२। प्रकृतार्थवाहिनी... हे अध्वर्यव: यजुर्वेदविद: सुते (विभक्तिव्यत्यय:) सुतम् अभिषुतम् मन्दिं (कपोलचलं) मन्दयन्तं हर्षयन्तं चक्रिं चक्रवत् घूर्णनोत्पादकं मत्तताकारक मिति यावत् ईम् इमम् एनं (द्विरुक्ति श्छान्दसी) पुरोवर्त्तिनं सम्मुखे स्थितं सोमं सोमरसं विश्वानि चक्रये विश्वेषां बहूनां कर्म्मणां शास्त्रविदे शस्त्रप्रयोक्त्रे च कर्त्रे मन्दिने हर्षजनकाय इन्द्राय आसृजत अर्पयत ।२

হে অধ্বর্য্যুগণ তোমরা যে সোমরস হর্ষজনক ও যাহা পান করিলে লোক সকল মত্ততাবশতঃ চক্রের ন্যায় ঘুরিতে থাকে, সেই সোমরস, বহুবিধ কার্য্যের কর্ত্তা শস্ত্রী ও শাস্ত্রী ইন্দ্রকে প্রদান কর। ২

O Adhwaryus (who know Yajurveda)! offer the pleasing and reeling Soma juice to Indra versed in weapons as well as in learning. 2.

मत्स्वा सुशिप्र मन्दिभि: स्तोमेभि र्विश्वचर्षणे ।
सचा एषु सवनेषु आ ॥ ३

१। सायण:.....सुशिप्र हे शोभनहनो शोभननासिक वा (शिप्रे हनू नासिके वा इति यास्केन उक्तत्वात्) तादृश हे इन्द्र ? मन्दिभि: हर्षहेतुभि: स्तोमेभि: स्तोमै: स्तोत्रै: मत्स्व हृष्टो भव हे विश्वचर्षणे सर्वमनुष्ययुक्त सर्वैर्यजमानै: पूज्य इत्यर्थ:। तादृशेन्द्र त्वं एषु यागगतेषु त्रिषु सवनेषु सचा देवैरन्यै: सह आगच्छेति शेष: ॥

२। प्रकृतार्थवाहिनी......हे सुशिप्र शोभनहनो इन्द्र त्वं सचा सर्व्वैर्देवै: सह एषु सवनेषु अस्माकं त्रिसवनेषु त्रिकालसम्पाद्ययागेषु विश्वचर्षणे विश्वचर्षणीनां (विभक्तिव्यत्यय:) विश्वेषां कर्षणीनां (ककारस्य चकारत्वं छान्दसं) सर्व्वेषां कृषकाणाम् अर्य्याणां मन्दिभि: मन्दयद्भि: हर्षकारकै: स्तोमेभि स्तोमै: स्तोत्रै: आ मत्स्व सम्यक् माद्य हृष्टोभव ॥ ३

হে শোভনহনু ইন্দ্র তুমি অন্যান্য দেবগণ সহ এই কৃষকসমূহের (অর্য্যগণের) সম্পাদ্য যজ্ঞে আগমন করিয়া ইহাঁদিগের হর্ষজনকস্তোত্রশ্রবণে হৃষ্ট হও। ৩

O Indra with beautiful jaw-bones, coming with the other gods in the sacrifices of the Aryas be pleased with their pleasing hymns. 3.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

असृग्रमिन्द्र ते गिरः प्रति त्वा मुदहासत।
अजोषाः वृषभं पतिम् ॥ ४

१। सायणः……हे इन्द्र गिरस्त्वदीयाः स्तुतीरस्त्वयं सृष्टवानस्मि। ताश्च गिरः स्वर्गेऽवस्थितं त्वां प्रत्युदहासत उद्गत्य प्राप्नुवन्। तादृशीर्गिरस्त्वमजोषाः सेवितवानसि। कीदृशं त्वां? वृषभं कामानां वर्षितारं। पतिं सोमस्य पातारं यजमानानां पालयितारं वा। पाता वा पालयिता वा। निं ४, । २६, इति यास्केनोक्तत्वात्॥ असृग्रं। असृजं। सृज विसर्गे। लङो मिप्। तुदादिभ्यः शः। बहुलं छंदसि। ४

२। प्रकृतार्थवाहिनी……हे इन्द्र अहं ते तव गिरः स्तुतीः स्तुतिमन्त्रान् असृग्रं (अपभ्रष्टमेतत् पदं) असृजं सृष्टवान् अस्मि। ताश्च गिरः स्तुतिवाक्यानि स्वर्गे स्थितं वृषभं पतिं पातारं स्वामिनं त्वां प्रति उदहासत उदगच्छन् त्वं ता अजोषाः सेवितवान् असि।४

হে ইন্দ্র আমি তোমার স্তুতির জন্য মন্ত্র সকল রচনা করিতেছি, ঐ সকল স্তুতিবাক্য পালনসমর্থ স্বামী তোমার অভিমুখে উত্তরদিকে যাইতেছে, তুমি সেই সকল স্তুতিবাক্য শ্রবণ কর।৪

O Indra! I am preparing hymns for your worship. They are going up towards you the protector. Listen to them. 4.

सं चोदय चित्रमर्व्वाग्राध इन्द्र वरेण्यम्।
असदित्ते विभु प्रभु ॥ ५ । १७

१। सायणः……हे इन्द्र वरेण्यं श्रेष्ठं राधो धनं चित्रं मणिमुक्तादिरूपेण बहुविधमर्वागस्मदभिमुखं यथा भवति तथा संचोदय सम्यक् प्रेरय। भोगाय यावत्पर्याप्तं तावद्विभुशब्देनोच्यते। ततोऽप्यधिकं प्रभुशब्देन। तादृशं धनं ते तव एव असदित् अस्त्यव। तस्मादस्मभ्यं प्रयच्छेत्यर्थः॥ मघमित्यादिष्वष्टाविंशतिधननामसु रायो राध इति पठितं। चोदय। चुद प्रेरणे। एवंतात्लोट्।

२। प्रकृतार्थवाहिनी……हे इन्द्र त्वं वरेण्यं श्रेष्ठं राधो धनं स्वर्णमुद्रादिकं तथा चित्रं राधो बहुमूल्यं मणिमुक्तादिकम् अर्व्वाक् अस्मत्समीपे सञ्चोदय प्रेरय। यतः ते तव प्रभु प्रभुत्वं विभु विभुत्वं विभवोऽपि (कपोलचल मेतत् पदद्वन्द्वं) असत् अस्ति असधातोर्लेट्तिप्। तव यथा प्रभुत्वम् अस्ति तथा प्रभूतो विभवोपि अस्त्येव इति भावः। ५॥ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

হে ইন্দ্র তুমি একমাত্র প্রতাপশালী ধনবান্, তোমার যেমন প্রভুত্ব, তদ্রূপ বহু ধনও আছে। তুমি আমাদিগের নিকট বহুমূল্য ধন ও বহুমূল্য মণিমুক্তাদি প্রেরণ কর। ৫। ১৭

O Indra! Bestow on us valuable riches and gems. You are both rich and powerful. 5.

अस्मान्त् सु तत्र चोदय इन्द्र राये रभस्वतः।
तुविद्युम्न यशस्वतः॥ ६

१। सायणः——हे तुविद्युम्न प्रभूतधन इन्द्र! राये धनसिद्ध्यर्थं अस्मान् अनुष्ठातॄन् तत्र कर्म्मणि सुचोदय सुष्ठु प्रेरय। कीदृशान् अस्मान्! रभस्वतः उद्योगवतः यशस्वतः कीर्त्तिमतः। ६॥

२। प्रकृतार्थवाहिनी……मन्त्रोऽयं दैत्यदानवनिपीड़ितेन केनचित् देवेन इन्द्र मुद्दिश्य विरचितः। हे तुविद्युम्न तुवि बहु, द्युम्नं धनं यशो वा (इति निघण्टुः) यस्य तत्सम्बुद्धिः बहुधन यशस्वतः (विभक्ति-व्यत्ययः) यशस्वन् बहुयशो वा इन्द्र त्वम् अस्मान् दैत्यदानवनिपीड़ितान् स्वर्गभ्रष्टदेवान् रभस्वतः वेगवतः औद्धत्यवत इति यावत् दैत्यदानवसंघात् राये धनाय धनान्नवासस्थानादिलाभाय तत्र तस्मिन् पूर्व्वकथिते दक्षिणदेशे भारतवर्षे इति यावत् (दक्षिणां पितरो-व्यभजन्त इति कृष्णयजुः) सुचोदय सुष्ठु प्रेरय। ६

হে বহুধনশালী যশস্বী ইন্দ্র দৈত্যদানবগণ অত্যন্ত উদ্ধত, উহারা আমাদিগের অন্ন, ধন ও বাসস্থান কাড়িয়া লইয়াছে, তুমি আমাদিগকে ধন, অন্ন ও বাসস্থানের জন্য সেই পূর্বকথিত দক্ষিণ দেশে পাঠাইয়া দেও। ৬

O rich and famous Indra! send us to the southern region (India) so that we may have our riches &c. beyond the reach of the arrogant Daityas and the Danavas. 6.

सं गोमत् इन्द्र वाजवत् अस्मे पृथुश्रवोबृहत्।
विश्वायु र्धेहि अक्षितम्॥ ७

१। सायणः……हे इन्द्र श्रवो धनमस्मे संधेहि अस्मभ्यं सम्यक् प्रयच्छ। कीदृशं श्रवः? गोमत्। बह्वीभिर्गोभिरुपेतं। वाजवत् प्रभूतेन अन्नेन उपेतं। पृथु परिमाणेन अधिकं। बृहत् गुणैरधिकं। विश्वायुः कृत्स्नायुष्यकारणं। अक्षितं विनाशरहितं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

२। प्रज्ञतार्थवाहिनी···हे इन्द्र विश्वायुः सर्व्वेषां प्राणस्वरूप त्वम् अस्मे अस्मभ्यं गोमत् धेनुमत् वाजवत् अन्नवत् पृथु बहुलं बृहत् भूरिप्रमाणं अक्षितं क्षयरहितं अक्षय मिति यावत् श्रवो धनं सन्धेहि सम्यक् देहि। ७

হে ইন্দ্র তুমি আমাদিগের সকলের প্রাণদাতা, তুমি আমাদিগকে প্রভূত গো, প্রভূত অন্ন ও প্রভূত অক্ষয় ধন দান কর। ৭

O Indra, the life of us all! give us immense and imperishable wealth with many cows and viands. 7.

अस्मे धेहि श्रवो बृहत् द्युम्नं सहस्रसातमम्।
इन्द्र ता रथिनी रिषः॥ ८

१। सायणः ··· हे इन्द्र बृहत् श्रवः महतीं कीर्त्तिं अस्मे धेहि अस्मभ्यं प्रयच्छ। तथा सहस्रसातममतिशयेन सहस्रसंख्यादानोपेतं द्युम्नं धनमस्मे धेहि। तथा ता व्रीहियवादिरूपेण प्रसिद्धा रथिनीर्बहुरथोपेता इषोऽन्नानि अस्म धेहि॥८

२। प्रज्ञतार्थवाहिनी···हे इन्द्र त्वम् अस्मे अस्मभ्यं बृहत् श्रवः भूरि अन्नं सहस्रसातमं बहुदानोपेतं द्युम्नं मणिमुक्तादि धनं तथा ताः रथिनीः बहुरथपूर्णा इषः व्रीहियवादीनि धेहि देहि। ८

হে ইন্দ্র! তুমি আমাদিগকে বহু অন্ন, সহস্র সহস্র ধন ও বহু রথপূর্ণ ধান্যাদি দেও।

O Indra! give us victuals, immense riches and carriage-loads of of grains. 8.

वसोरिन्द्रं वसुपतिं गीर्भिं गृणन्त ऋग्मियम्।
होम गन्तार मूतये॥ ९

१। सायणः ... वसोर्वसुनोऽस्मदीयस्य धनस्य ऊतये रक्षार्थमिन्द्रं होम वयमाह्वयामः। किं कुर्वन्तः? गीर्भिः स्तुतिभिर्गृणन्तः स्तुवन्तः। कीदृशमिन्द्रं? वसुपतिं धनपालकं। ऋग्मियं ऋचां मातारं गन्तारं यागदेशे गमनशीलं॥

२। प्रज्ञतार्थवाहिनी...वयं भारतवासिनो जना वसोः वसुनः ऊतये अस्माकं धनरक्षार्थं वसुपतिं धनपतिं धनरक्षणसमर्थम् ऋग्मियं ऋचा स्तोतव्यं गन्तारं गन्तव्यं शरण्यं गीर्भिः स्तोत्रैः गृणन्तः स्तुवन्तः होम आह्वयामः। ९

আমাদিগের ধনরক্ষার নিমিত্ত ধনরক্ষণসমর্থ স্তবনীয় শরণ্য ইন্দ্রদেবকে স্তুতিবাক্যে আহ্বান করি। ৯

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

For the preservation of our riches we invoke the adorable Indra who is able to preserve wealth. 9.

सुते सुते न्योकसे बृहद्बृहते एदरिः।
इन्द्राय शूषमर्चति ॥ १० । १८

१। सायणः···आकार इच्छन्दस्य पादपूरणौ। यद्वा व्याप्तिवचन आकारः। आ ईषदर्थे अभिव्याप्तौ इति अभिधानात् इच्छन्दोऽपि शब्दार्थः इयर्त्ति गच्छति अनुष्ठेयं कर्म्म प्राप्नोति इति अरिर्यजमानः एदरिः सर्वोऽपि यजमानः इन्द्राय सुते सुते इन्द्रार्थ मभिषुते तत्तत् सोमे शूषं बलं अर्चति स्तौति इन्द्रस्य पराक्रमं प्रशंसति इत्यर्थः। कीदृशं शूषं? बृहत् प्रौढ़ं। कीदृशाय इन्द्राय? न्योकसे नियतस्थानाय बृहते प्रौढ़ाय।

२। दयानन्दः ... सुते सुति उत्पन्ने उत्पन्ने न्योकसे निश्चितानि श्रोकांसि स्थानानि येन तस्मै, बृहत् सर्वथा वृद्धं, बृहते सर्वोत्कृष्टगुणैर्महते व्यापकाय, आ समन्तात्, इत् अपि, अरिः ऋच्छति गृह्णाति अन्यायेन सुखानि च यः। इन्द्राय परमेश्वराय शूषं बलं सुखं च। अर्चति समर्पयति। १०

३। रमानाथः......आ इत् सर्व एव उत्सुकः देवेषु भक्तिकरण-तत्परो यजमानः सुते सुते न्योकसे यत्र यत्र सोमाभिषवो भवति, तत्र तत्र तत्प्रयर्थं स्थिताय बृहते महते इन्द्राय बृहत् महत् शूषं स्तोत्रं अर्चति गायति। शूष शब्दस्तु स्तोत्रार्थकः (३म—५४।१, ३।२५।५।१०म १६।२)। १०

४। रमेशचन्द्र·····प्रत्येक सवने यजमानगण नित्य निवास प्रौढ़ इन्द्रेर बृहत् पराक्रमेर प्रशंसा करे। १०

५। प्रकृतार्थवाहिनो······मन्त्रोऽयमतीव दुर्बोधः, तथापि यथाशक्ति व्याख्यामः। अरिः ऋच्छति गच्छति यज्ञगृहमिति सायणः। परं तन्न। एदरिः (कपोलचलमेतत्) अध्वरो यजमानः न्योकसे आश्रयस्थानाय आश्रयस्थानलाभाय (अस्मादन्नात् अस्यै प्रतिष्ठायै इति शुक्लयजुः) सुते सुते प्रतिसोमाभिषवे बृहते महते इन्द्राय महत इन्द्रस्य (विभक्तिव्यत्ययः) बृहत् शूषं महत् बलम् अर्चति स्तौति इन्द्रस्य पराक्रमं प्रशंसति। १०। १८

यजमान आश्रयस्थानलाभेर निमित्त प्रत्येक सोमाभिषवे महान् इन्द्रेर प्रभूत बलेर प्रशंसा करितेछेन। १०। १৮

For a shelter the Yajamána is praising the mighty strength of Indra in each soma-sacrifice. 10.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

दशमं सूक्तम्

ऋषिर्देवते पूर्व्ववत्, छन्दः—अनुष्टुप्।

गायन्ति त्वा गायत्रिणो अर्चन्त्यर्कमर्किणः।
ब्रह्माण स्त्वा शतक्रतो उद्वंशमिव येमिरे॥ १

१। यास्कः.....गायन्ति त्वा गायत्रिणः प्रार्चन्ति ते अर्कं अर्किणः, ब्राह्मणा स्त्वा शतक्रतो उद्येमिरे, वंशमिव, वंशो वनशयो भवति, वननात् श्रूयते इति वा। १म भाग, ८५८ पृ।

तत्र दुर्गाचार्य्यटीका......मधुच्छन्दस आर्षं, अनुष्टुप्, ऐन्द्री। हे भगवन् इन्द्र गायन्ति त्वा गायत्रिणः स्तुवन्ति त्वां सामगाः सामभिः; अर्चन्ति अर्कं अर्किणः पूजयन्ति त्वां ऋग्भिः होतारः, मन्त्रिणः। एवमनेन प्रकारेण सर्व्वं एते ब्राह्मणाः यज्ञे कर्म्मणि हे शतक्रतो उद्वंशमिव येमिरे उद्येमिरे वंशमिव त्वां स्तुतिभिः हविर्भिश्च यज्ञेषु तवैव महिमानं वर्द्धयन्ति इत्यर्थः। ५अ—६ (५)।

२। सायणः...हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा इन्द्र त्वां गायत्रिण उद्गातारो गायन्ति स्तुवन्ति। अर्किणोऽर्चनहेतुमन्त्रयुक्ता होतारोऽर्कमर्चनीयमिन्द्रमर्चन्ति शस्त्रगतैर्मन्त्रैः प्रशंसन्ति। ब्रह्माणो ब्रह्मप्रभृतय इतरे ब्राह्मणास्त्वा त्वामुद्येमिरे। उन्नतिं प्रापयन्ति। तत्र दृष्टान्तः—वंशमिव, यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढ़ं वंशमुन्नतं कुर्वन्ति। यथा वा सन्मार्गवर्तिनः स्वकीयं कुलमुन्नतं कुर्वन्ति, तद्वत्।

३। दयानन्दः......गायन्ति सामवेदादिगानेन प्रशंसन्ति, त्वा त्वां गेयं जगदीश्वरं इन्द्रं, गायत्रिणः, गायत्राणि प्रशस्तानि छन्दांसि अधीतानि विद्यन्ते येषां ते धार्म्मिका ईश्वरोपासकाः, अर्चन्ति नित्यं पूजयन्ति, अर्कं—अर्च्यते पूज्यते सर्वै र्जनैः य स्तं, अर्किणः—अर्का मन्त्राः ज्ञानसाधना येषां ते, ब्रह्माणः—वेदान् विदित्वा क्रियावन्तः, त्वा जगत्स्रष्टारं शतक्रतो शतं बहूनि कर्म्माणि प्रज्ञानानि वा यस्य, तत्सम्बुद्धौ। उत् उत्कृष्टार्थे, वंशमिव, यथा उत्कृष्टैर्गुणैः शिक्षणैश्च स्वकीयं वंशं उद्यमवन्तं कुर्वन्ति, तथा येमिरे उद्युञ्जन्ति। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

४। रमानाथः....हे शतक्रतो! बहुप्रज्ञाविशिष्ट! त्वां गायत्रिणः उद्गातारो गायन्ति, अर्किणः होतारः तुभ्यम् अर्कं ऋङ्मन्त्रं अर्चन्ति प्रयच्छन्ति, ऋङ्मन्त्रैः त्वाम् अर्चयन्ति, ब्रह्मादय इतरे ऋत्विजः त्वां वंशं वेणुमिव उद्येमिरे उन्नतं कुर्वन्ति। यथा गायकाः वंशं उन्नतं कुर्वन्ति, तद्वत् ब्रह्मादयस्त्वाम् उच्चैः स्तुवन्ति।

५। रमेश......हे शतक्रतु! गायकेरा तोमार उद्देशे गान करे, पाठकेरा उच्चैःस्वरे इन्द्रके अर्चना करे, नर्त्तकेरा ये प्रकार वंशखण्ड उन्नत करे, स्तुतिकारकेरा तोमाके सेइरूप उन्नत करे। १

६। प्रज्ञातार्थवाहिनी ... हे शतक्रतो शतमख इन्द्र (इन्द्रो विष्णुना सह भारतवर्षमागत्य कुरुक्षेत्रेषु शतं क्रतून् शतमखान् कृतवान्, ततः तस्य शतक्रतुरिति संज्ञा बभूव इति ध्येयम्। क्रतुः कर्म्म इति अर्थान्तरे सत्यपि तत् नात्र ग्रहणीयं प्रसिद्धिविरोधात्) गायत्रिण उद्गातार उच्चैर्गानं कुर्व्वन्त ऋत्विजः सामगा गायन्ति, स्तुवन्ति, अर्किणो होतार ऋङ्मन्त्रप्रयोक्तारः अर्कं मर्चनीयं त्वाम् अर्चन्ति शस्त्रमन्त्रैः प्रशंसन्ति, तथा ब्रह्माणः स्तोत्रपाठका इतरे ऋत्विजः तेषां सामवेदिना ऋत्विजां अनुकारिणो वंशं वंशीं तानप्रदायिवंशीवादक इव उद्येमिरे अनुस्तोतुं उद्यता भवन्ति। १

হে শতক্রতো ইন্দ্র! সামগ উদ্গাতারা তোমার স্তুতি গান করেন, হোতারা ঋঙ্মন্ত্রদ্বারা তোমার অর্চ্চনা করিতেছেন এবং ব্রহ্মাখ্য পুরোহিতেরা তান-প্রদায়ী বংশীবাদকের ন্যায় উচ্চৈঃস্বরে তোমার স্তুতি করিতে উদ্যত হইয়াছেন। ১

O the hundred-sacrificer Indra! the Udgátris are chanting your praise, the Hotris are worshipping you with Riks and the Barhma priests are behymning you loudly like pipers. 1.

यत् सानोः सानुमारुहत् भूरि अस्पष्ट कर्त्वम्।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति॥ २

१। सायणः......यद्यदा सानोः सानुमारुहत्, यजमानः सोमवल्लीसमिधाद्याहरणाय एकस्मात् पर्वतभागादपरं पर्वतभागमारूढवान्, तथा भूरि प्रभूतं कर्त्वं कर्म सोमयागरूपमस्पष्ट स्पृष्टवानुपक्रान्तवानित्यर्थः। तत्तदानीमिन्द्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति। ज्ञात्वा च वृष्णिः कामानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

वर्षिता सन् यूथेन मरुद्गणेन सह एजति। कम्पते स्वस्थानात् यज्ञभूमिमागन्तुमुद्युक्त इत्यर्थः॥

२। प्रकृतार्थवाहिनी... यत् यदा यजमानः सानोः एकस्मात् अधित्यकाप्रदेशात् सानुं पर्वतस्य अधित्यकान्तरं आरुहत् समिधादेराहरणार्थं आरोहति भूरि प्रभूतं कर्त्वं कर्त्तव्यं च यज्ञस्य पूर्वानुष्ठेयं कार्य्यञ्च अस्पष्ट कर्तुं प्रवृत्तो भवति, तत् तदानीमेव वृष्णिः कामानां वर्षिता यजमानस्य अभीष्टफलदाता इन्द्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति, ज्ञात्वा च यूथेन दलबलेन सह एजति यज्ञस्थल मागच्छति। २

যখন যজমানেরা সোমলতা ও সমিধাদি আহরণের জন্য পর্ব্বতের এক অধিত্যকা হইতে অন্য অধিত্যকায় গমন করেন ও প্রভূত যাগের অনুষ্ঠান করিয়া থাকেন, ইন্দ্র তখনই তাহা জানিতে পারিয়া যজমানের প্রার্থনাপূরণের জন্য সেই যজ্ঞভূমিতে আপনার পারিষদবর্গসহ আগমন করেন। ২

When the Yajamánas wander through vales and dales [in search of Sacrificial materials] and perform great sacrifices, Indra comes to know of this and makes his appearance in the sacrificial ground with his party. 2.

युच्वा हि केशिना हरी वृषणा कच्यप्रा।
अथा न इन्द्र सोमपा गिरा मुपश्रुतिं चर॥ ३

१। उवटः.... द्वितीयो ग्रहणमन्त्रः। युच्वाहि—युजिर योगे युङ्ग्धि हि यस्मात् केशिनौ प्रलम्बकेशरौ हरी हरितवर्णौ वश्वौ वृषणौ वर्षितारौ सेक्तारौ तरुणौ कच्यप्रा कच्या अश्वस्य सन्नाहरज्जुः, प्रा पूरणे, कच्यां यौ आपूरयतः, तौ एव सुच्येते, तौ युक्त्वा रथे तमास्थाय अथ समनन्तर मेव नः आपूरयतः, तौ एव सुच्येते, तौ युक्ता रथे तमास्थाय अथ समनन्तर मेव नः अस्माकं हे इन्द्र सोमपाः सोमपानशीलः गिरां उपश्रुतिं चर स्तुतिलक्षणां गिरं वाचमुपश्रुत्य चर आगच्छ, अस्मद्गृहं। २४—८अ

२। सायणः.....हे सोमपाः सोमपानयुक्त इन्द्र हरी त्वदीयौ अश्वौ युच्वा हि सर्वथा संयोजय, अथ अनन्तरं नः अस्मदीयानां गिरां स्तुतीनां उपश्रुतिं समीपे श्रवण मुद्दिश्य चर तत्प्रदेशं गच्छ। कीदृशौ हरी? केशिना स्कन्धप्रदेशे लम्बमानकेशयुक्तौ वृषणा सेवनसमर्थौ युवानौ, कच्यप्रा अश्वस्य उदरबन्धनरज्जुः कच्या, तस्याः पूरकौ पुष्टाङ्गौ इत्यर्थः। ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MII

३। महीधरः . . . द्वितीयो ग्रहणमन्त्रः। इन्द्रदेवत्यानुष्टुव् मधुच्छन्दो दृष्टा। हे इन्द्र! हि निश्चितं हरी हरितवर्णौ त्वदीयौ अश्वौ युच्वा रथेन संयोजय; कीदृशौ हरी? केशिना प्रलम्बकेशरौ, तथा वृषणा, वृष सेचने। वृषणौ वर्षितारौ सेक्तारौ तरुणौ वा। तथा कक्ष्यप्रा कक्ष्ये भवः कक्ष्यः, अश्व सन्नाहरज्जुः, कक्ष्यं मध्यबन्धनं प्रातः, तौ कक्ष्यप्रौ स्थूलावयवौ इत्यर्थः। अथ अनन्तरं रथारोहणानन्तरं हे इन्द्र सोमपाः सोमपानं कुर्वन् नः अस्मदीयानां गिरां ऋग्यजुःसामलक्षणानां वाचाम् उपश्रुतिं उपश्रवणं चर गच्छ प्राप्नुहि। अस्मद्गिरः शृणु इत्यर्थः। वाचं श्रुत्वा अस्मद्गृहमागच्छ इत्यर्थः। २४—८अ।

४। दयानन्दः……युच्व युंच्व योजय, हि हेत्वपदेशे, केशिना प्रकाशयुक्तो, आकर्षणबले, हरी—व्याप्तिहरणशीलौ अश्वौ, वृषणा वृष्टिहेतू, कक्ष्यप्रा, कक्षासु भवाः कक्ष्याः सर्वपदार्थावयवाः, तान् प्रातः प्रपूरयतः, तौ, अथ आनन्तर्य्ये, नः अस्मान् अस्माकं वा इन्द्र सर्वस्रोतोव्यापिन् ईश्वर प्रकाशमानः सूर्य्यलोको वा, सोमपाः सोमान् उत्तमान् पदार्थकान् पाति रक्षति, तत्सम्बुद्धौ, पदार्थानां रक्षणहेतुः सूर्य्यो वा। गिरां प्रवर्त्तमानानां वाचां उपश्रुतिं उपयुक्तां श्रुतिं श्रवणं चर प्राप्नुहि प्राप्नोति वा। ३

५। रमानाथः....हे सोमपाः सोमपानयुक्त इन्द्र केशिनौ स्कन्धदेशे लम्बमानकेशरयुक्तौ वृषणौ युवानौ कक्ष्यप्रौ कक्ष्यं उदरबन्धनरज्जुं पृणतः पूरयतः यौ तौ पुष्टाङ्गौ इत्यर्थः हरी अश्वौ युच्व रथे योजय। अथ नः अस्माकं गिरां स्तुतीनां उपश्रुतिं श्रवणमुद्दिश्य चर समीपे गच्छ।

६। प्रकृतार्थवाहिनी. . . . . हे सोमपाः सोमपानकारिन् इन्द्र त्वं रथे इति शेषः केशिनौ शोभनकेशरौ वृषणौ युवानौ कक्ष्या उदरबन्धनरज्जुः तस्याः पूरकौ अतएव पुष्टाङ्गौ हरी अश्वौ आयुच्व सम्यक् योजय अथानन्तरं रथारूढ़स्त्वं नः अस्माकं गिरां स्तुतीनाम् उपश्रुतिं समीपे श्रवणम् उद्दिश्य चर भ्रम। ३

হে সোমপায়ী ইন্দ্র তুমি তোমার রথে শোভনকেশরযুক্ত উদরবন্ধনরজ্জুবিশোভিত যুবা অশ্বদ্বয়কে যোজনা কর। তৎপর আমাদিগের স্তুতি শ্রবণ করিবার জন্য যজ্ঞগৃহের নিকটে আগমন কর। ৩

O Indra, the drinker of Soma-juice! Yoke to your chariot the young pair of horses with beautiful manes and belly-bands and then come to us to listen to our hymns. 3.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

एहि स्तोमाँ अभि स्वर अभि गृणीहि आ रुव।
ब्रह्म च नो वसो सचा इन्द्र यज्ञञ्च वर्द्धय ॥ ४

१। हे वसो निवासकारणभूतेन्द्र एहि अस्मिन् कर्मणि आगच्छ। आगत्य च स्तोमान् उद्गातृप्रयुक्तानि स्तोत्राणि अभिस्वर अभिलक्ष्य प्रशंसारूपं शब्दं कुरु। तथा अध्वर्य्यवमभिलक्ष्य गृणीहि शब्दं कुरु। तथा होतृप्रयुक्तानि शस्त्राणि आलक्ष्य रुव शब्दं कुरु। परितोषेण सर्वान् ऋत्विजः प्रशंसेत्यर्थः। तत ऊर्द्ध्वं नोऽस्माकं ब्रह्म च अन्नं च यज्ञं च अनुष्ठीयमानं कर्म्म च सचा सह वर्धय साङ्गत्वसम्पादनेन यज्ञं वर्धयित्वा तत्फलमन्नं च प्रवृद्धं कुरु। अन्ध इत्यादिष्वष्टाविंशत्यन्ननामसु ब्रह्म वर्च इति पठितं। ४

२। प्रकृतार्थवादिनो......हे वसो अस्माकं भारतवासिनां भारतवर्षवासनिदान इन्द्र त्वं एहि अत्र यज्ञभूमौ आगच्छ आगत्य च स्तोमान् स्तुतिमन्त्रान् अभिस्वर अभिगच्छ (स्वरति गतिकर्मा इति स्कन्दस्वामी) गृहाण इति यावत्। तथा अभिगृणीहि अनुमोदय, तथा आरुव उच्चैःस्वरेण स्वीकुरु. तथा नः अस्माकं ब्रह्म वेदं सचा तेन सह यज्ञञ्च वर्द्धय वृद्धिं प्रापय। ४

হে ইন্দ্র! আমরা যে এখন ভারতবর্ষে সুখে বাস করিতেছি, তাহার নিদান তুমিই। তুমি আমাদিগের এই যজ্ঞস্থলে আগমন কর, আসিয়া আমাদিগের স্তুতিমন্ত্র সকল গ্রহণ কর, অনুমোদন কর ও তৎসমুদয় উচ্চৈঃস্বরে স্বীকার কর এবং তুমি আমাদিগের বেদ ও যজ্ঞের বর্দ্ধন কর। ৪

O Indra, the root-cause of our living in India, come to us and accept our hymns, give your loud consent to them and increase our hymns and sacrifices. 4

उक्थमिन्द्राय शंस्यं वर्द्धनं पुरुनिष्षिधे।
शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥ ५

१। सायणः......इन्द्राय इन्द्रार्थं वर्धनं वृद्धिसाधनमुक्थं शस्त्रं शंस्यमस्माभिः शंसनीयं। कीदृशाय इन्द्राय ? पुरुनिष्षिधे बहूनां शत्रूणां निषेधकारिणे। शक्रः शक्तः इन्द्रो नोऽस्मदीयेषु सुतेषु पुत्रेषु सख्येषु च सखित्वेष्वपि यथा येन प्रकारेण रारणत् अतिशयेन शब्दं कुर्यात्तथा शंस्यमिति पूर्वत्रान्वयः। अस्मदीयेन शस्त्रेण परितुष्ट इन्द्रोऽस्माकं पुत्रान् अस्मत्सख्यानि च बहुधा प्रशंसत्वित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

प्रक्कतार्थवाहिनी……यथा यतः शक्रो देवराजः, नः अस्माकं सुतेषु सोमेषु प्रस्तुतेषु सत्सु तथा अस्माकं सख्येषु बन्धुत्वेषु प्र रारणत् रारणेत् पुनः पुनः अत्यर्थं हर्षं प्रकाशयेत् तस्माद्धेतोः पुरुनिःषिधे (निः – सिध् + क्विप् तस्मै, सिधु शास्त्रे माङ्गल्ये च) बहुमङ्गलनिधानाय इन्द्राय तस्मै देवराजाय वर्द्धनं उक्थं साममन्त्रः शंस्यं गेयमित्यर्थः। ५

হে ভ্রাতৃগণ! আমরা সোমরস প্রস্তুত করিলে, দেবরাজ ইন্দ্র, অত্যন্ত হর্ষ প্রকাশ করেন। আমাদিগের বন্ধুতাতেও তিনি পুন পুনঃ হর্ষ প্রকাশ করিয়া থাকেন। অতএব যিনি আমাদিগের এ হেন মঙ্গলনিধান, তাঁহার উদ্দেশে তাঁহার যশোবর্দ্ধক সাম গান কর। ৫

O brethren, Indra becomes very glad when we prepare Soma-juice for him. He frequently expresses joy at our friendship with him. We should therefore chant hymns in praise of Indra who is our excellent benefactor. 5.

तमित् सखित्व ईमहे तं राये तं सुवीर्य्ये ।
स शक्र उत नः शकत् इन्द्रो वसु दयमानः ॥ ६

१। सायणः ·····सखित्वे निमित्तभूते सति तमित्तमेवेन्द्रमीमहे। तथा सुवीर्ये शोभनसामर्थ्यनिमित्तं तमीमहे। उत अपि च शक्रः शक्तिमान् स इन्द्रो नोऽस्मभ्यं वसु धनं दयमानः प्रयच्छन् शकत्। अस्मदीयरक्षणे शक्तोऽभूत्। समदशयाच्ञाकर्मस्वीमहे यामीति पठितं। तदनुसारेणेन्द्रं याचामह इति व्याख्येयं। ६

२। प्रक्कतार्थवाहिनी.... वयं तम् इन्द्रं सखित्वे सख्यत्वाय बन्धुत्वनिमित्तं तं राये धनाय धननिमित्तं सुवीर्य्ये शौर्य्याय ईमहे प्रार्थयामहे उत अपि च स शक्रः स इन्द्रः परमशौर्य्यशाली स देवराज नः अस्मभ्यं वसु धनं दयमानः शकत् दातुं शक्नोति समर्थो भवति। ६

আমরা সেই ইন্দ্রের নিকট বন্ধুত্ব, ধন ও শৌর্য্য প্রার্থনা করি। পরমশৌর্য্যশালী সেই দেবরাজ আমাদিগকে ধনদান করিতে সমর্থ হয়েন। ৬

We beg of that Indra friendship, wealth and strength. He is able to give us wealth.

सुविवृतं सुनिरजम् इन्द्र त्वादातमिद् यशः ।
गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः ॥ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

१। सायण: .... हे इन्द्र यशोऽन्नं कर्मफलभूतं सुविवृतं सुष्ठु सर्वत्र प्रसृतं सुनिरजं सुखेन नि:शेषं प्राप्तुं शक्यं त्वादातमित् त्वया शोधितं च सम्पन्नमिति शेष:। इत: परं चौरादिरसलाभार्थं गवां व्रजं निवासस्थानमपवृधि अपवृतमुद्घाटितद्वारं कुरु। हे अद्रिव: पर्वतोपलक्षितवज्रयुक्तेन्द्र राधो धनं कृणुष्व सम्पादय। ७

२। प्रकृतार्थवाहिनी...हे अद्रिव: अद्रिवन् अद्रि: पर्वत:, तं वानयति वनति उपतापयति हिनस्ति इति अद्रिवा तत्सम्बुद्धौ। हे गोत्रभित् इन्द्र त्वं त्वादातं (कपोलचलमेतत्) त्वया दत्तं यशोधनं (यशोधन मन्नमुदकं कीर्त्तिश्च इति निघण्टु:) सुविवृतं सम्यक् विस्तृतं सुनिरजं सुखेन लभ्यं च (अज-गतौ) गवां व्रजं निवासस्थानं गोशालामिति यावत् अपवृतम् उद्घाटितद्वारं कृणुष्व कुरु अस्मभ्यं गां प्रयच्छ राधो धनञ्च प्रयच्छ। ७

হে গোত্রভিৎ ইন্দ্র তুমি যে ধন দান করিয়া থাক, তাহা প্রভূত ও সুখপ্রাপ্য, তুমি গোশালার দ্বার উন্মুক্ত করিয়া আমাদিগকে গোদান কর ও ধন দাও। ৭

O Indra! the riches which you give us are abundant and easily obtainable. Give us cows and wealth by opening the door of the cow-sheds. 7.

न हि त्वा रोदसी उभे ऋघायमाण मिन्वत:।

जेष: स्वर्वती रप: सङ्गा अस्मभ्यं धूनुहि॥ ८

१। सायण: ... हे इन्द्र ऋघायमाणं शत्रुवधं कुर्वाणं त्वा त्वां रोदसी उभे द्यावापृथिव्यावपि त्वदीयं महिमानं नहि इन्वत: न व्याप्तुं समर्थे इत्यर्थ:। तादृशस्त्वं स्वर्वती: स्वर्लोकयुक्ता अपो वृष्टिरूपा जेष: जयि: प्रेरयेत्यर्थ: अपां स्वर्गसम्बन्धश्चान्यत्र दिवो वृष्टिं च्यावयतीति श्रुतं। किंच वृष्टिप्रदानादन्नसम्पत्ते-रूर्ध्वमस्मभ्यं चौरादिरसप्रदा गा: संधूनुहि सम्यक प्रेरय॥

२। प्रकृतार्थवाहिनी......हे इन्द्र ऋघायमाणं (पदमेतत् कस्यापि मूलशब्दस्य कपोलकल्पितमिति प्रतीयते) शत्रुवधं कुर्वाणं त्वा त्वाम् उभे द्वे रोदसी द्यावापृथिव्यौ स्वर्गभारतवर्षौ हि निश्चितं न इन्वत: न वारयितुं समर्थौ। तं स्वर्वती: अप: स्वर्गस्थितानि पानीयजलानि जेष: जयि: जितवान त्वम् अस्मभ्यं गा: संधूनुहि प्रेरय। ८

হে ইন্দ্র! তুমি যখন ক্রোধভরে শত্রুবধ করিতে উদ্যত হও, তখন সমগ্র স্বর্গবাসী ও সমগ্র ভারতবাসী লোক সকলও তোমাকে থামাইয়া রাখিতে পারে না। দৈত্যদানবেরা

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

স্বর্গের যে পানীয় জল দখল করিয়াছিল, তাহা তুমি জয় করিয়াছ, তুমি আমাদিগকে গাভী দান কর। ৮

O Indra! when you engage yourself in slaying the enemies neither the inhabitants of Swarga nor of India can check you. You have taken possession of the drinking water of Swarga (which had been captured by the Daityas aud the Dánavas . Give us cows. 8.

आस्रुत्कर्ण स्रुधी हवं नू चित् दधिष्व मे गिर:।
इन्द्र स्तोम मिमं मम कृष्वा युजश्चिदन्तरम् ॥ ९

१। सायण:...हे आश्रुत्कर्ण सर्वत: श्रोतारौ कर्णौ यस्य तादृगिन्द्र हवं मदीयमाह्वानं नु चिप्रं स्रुधि शृणु। मे मम होतुर्गिरश्चित् स्तुतीरपि दधिष्व चित्ते धारय। किंच मम मदीयमिमं स्तोमं स्तोत्ररूपं वाक्समूहं युजश्चित् स्वकीयसख्युरपि अन्तरं कृष्व आसन्नं कुरु। यथा वचनं तस्य त्वं प्रियं मन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुर्वित्यर्थ: ॥ ९

२। प्रकृतार्थवाहिनी......नु भो आस्रुत्कर्ण आ सम्यक् स्रुतौ (स्रु धातो: क्विप् स्रुत्, तौ) श्रवणशीलौ कर्णौ यस्य तादृक् इन्द्र त्वं हवम् अस्माकमाह्वानं स्रुधि शृणु। मे मम गिरश्च स्तुतिवाक्यानि च दधिष्व धत्स्व धारय शृणु इति यावत्। तथाहि त्वं चित् चेत् यद्यपि अन्तरं युज: अन्तरे वहि:-स्थाने पराके स्वर्गे युज्यसे तिष्ठसि, तथापि मम इमं स्तोमं स्तोत्रं कृष्व कुरुष्व गृहाण इति यावत्। ९

হে সম্যক্ শ্রবণসমর্থ ইন্দ্র তুমি আমার আহ্বান শ্রবণ কর, আমার বাক্য সমূহে কাণ দাও এবং যদিও তুমি দূরে রহিয়াছ, তথাপি আমার এ স্তুতিবাক্য সকল গ্রহণ কর। ৯

O the excellent hearer Indra! Listen to my address. Lend your ears to my words. Far away though you are, accept these my prayers. 9.

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्।
वृषन्तमस्य हूमहे ऊतिं सहस्रसातमाम् ॥ १०

१। सायण:.....हे इन्द्र त्वा त्वां विद्म जानीम:। हि: पूरण: कीदृशं त्वां वृषन्तमं कामानामतिशयेन वर्षितारं; वाजेषु हवनश्रुतं अस्मदीयस्य आह्वानस्य श्रोतारं; वृषन्तमस्य अतिशयेन कामादीनां वर्षितुस्तव ऊतिं रचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

मस्मद्विषयामुद्दिश्य ह्वमहे त्वामाह्वयामः। कीदृशीमूतिं ? सहस्रसातमां अतिशयेन धनसहस्राणां दात्रीम्॥ १०

२। प्रज्ञातार्थवाहिनी . . . . हे इन्द्र वयं वृषन्तमं प्रार्थनानां अतिशयेन वर्षितारं पूरयितारं वाजेषु हवनश्रुतं संग्रामेषु अस्माकं आह्वानस्य श्रोतारं विद्म जानीमः, चेत् कश्चित् किमपि प्रार्थयते तर्हि त्वं तस्य तां प्रार्थनां पूरयसि ; चेत् कश्चित् संग्रामवेलात् साहाय्यार्थं आह्वयति, तर्हि त्वं तस्य आह्वानञ्च शृणोषि। वयं वृषन्तमस्य कामानां पूरकस्य तव सहस्रसातमां सहस्रं सातं सुखं मांति जनयति इति तां अशेषसुखदायिनीं ऊतिं रक्षां ह्वमहे याचामहे। १०

হে ইন্দ্র কেহ তোমার নিকট প্রার্থনা করিলে তুমি তাহার প্রার্থনা পূর্ণ কর, কেহ যুদ্ধক্ষেত্র হইতে তোমার সাহায্য চাহিলে, তুমি তাহাকেও সাহায্য দান করিয়া থাক ; এই জন্য হে প্রার্থনাপূরণকারিন্ ইন্দ্র আমি তোমার নিকট তোমার বহু প্রকারে সুখকর রক্ষা প্রার্থনা করি। ১০

O Indra ! we know you to be a fulfiller of prayers and a listener to our hymns. We beg of you, the excellent giver, protection that is pleasant in thousand ways. 10.

आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब।
नव्यमायुः प्र सूतिर कृधी सहस्रसा मृषिम्॥ ११

१। सायणः . . . . . हे इन्द्र तु क्षिप्रं नः अस्मान् प्रति आगच्छ इति शेषः। हे कौशिक कुशिकस्य पुत्र इन्द्र! मन्दसानः हृष्टोभूत्वा सुतं अभिषुतं पिब। यद्यपि विश्वामित्रः कुशिकस्य पुत्रस्तथापि तद्रूपेण इन्द्रस्य एवोत्पन्नत्वात् कुशिकपुत्रत्वमविरुद्धं। अयं वृत्तान्तोऽनुक्रमणिकायामुक्तः। कुशिकस्त्वैषीरथिरिन्द्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्यं चकार। तस्येन्द्र एव गाधी पुत्रो जज्ञ इति। हे इन्द्र नव्यं सर्वैर्देवैः स्तुत्यं कर्मानुष्ठानपरमायुर्जीवितं प्रसूतिर प्रकर्षेण सुष्ठु वर्धय। ततो मां सहस्रसां सहस्रसंख्याक-लाभोपेत मृषिमतीन्द्रियद्रष्टारं कृधि कुरु।

२। दयानन्दः......आ समन्तात् तु पुनरर्थे नः अस्माकं इन्द्र सर्वानन्दस्वरूपेश्वर कौशिक सर्वासां विद्यानां उपदेशे प्रकाशे च भवः। तत्सम्बुद्धौ अर्थानां साधूपद्रष्ट र्वा। कोशतिः शब्दकर्मणः कंसते र्वा स्यात् प्रकाशयतिकर्मणः साधु विक्रोशयिता अर्थानामिति वा नद्यः प्रत्यूचुः निरु। २।२५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

अनेन कौशिकशब्द उक्तार्थो गृह्यते। मन्दसानः स्तुतः सर्वस्य त्राता सन् सुतं प्रयत्नेन उत्पादितं प्रियशब्दं स्तवनं वा। पिब श्रवणेन्द्रिया गृहाण। नव्यं नवीनं आयुर्जीवनं प्रकृष्टार्थे क्रियायोगि सु शोभार्थे क्रियायोगि तिर सन्तारय, कृधि कुरु, सहस्रसां सहस्रं बह्वीर्विद्याः सनोति तं ऋषिं वेदमन्त्रार्थद्रष्टारं जितेन्द्रियतया शुभगुणानां सदैव उपदेष्टारं सकलविद्याप्रत्यक्षकारिणं। ११

३। रमानाथः......हे कौशिक कौशिककुलपरममित्र इन्द्र! त्वं शीघ्रमागच्छ। मन्दसानस्त्वं हृष्टः सन् सुतं सोमं पिब। मम नव्यमायुः नवयौवनं सु सम्यक् प्रतिर प्रकर्षेण वर्द्धय। तथा मां सहस्रसां सहस्रलाभोपेतं ऋषिं कुरु। ११

४। रमेश......हे इन्द्र शीघ्र आमादिगेर निकट आइस, हे कुशिकपुत्र, हृष्ट हइया अभिषुत सोम पान कर। नव्य आयुः सम्यक्रूपे वर्द्धन कर। एइ ऋषिके सहस्रधनोपेत कर। ११

५। प्रकृतार्थवाहिनी......हे कौशिक कोशवन् (कुशिकस्य पुत्रः कौशिकः इति सायणः, रमानाथस्तु कुशिककुलपरममित्रमिति, परं कश्यपात्मज इन्द्रो न खलु कुशिकनन्दनः, न तस्य कुशिककुलेन सह परममित्रत्वञ्च आसीत्) इन्द्र मन्दसानः सानि दाने मन्दो हृष्टः दानतुष्टः त्वं नः अस्माकमभिषुतं सोमरसं पिब अपि च मम नव्यमायुः नवयौवनं च प्रसुतिर प्रकर्षेण तारय अतिक्रामय, यथा यौवने मम किमपि स्खलनं न स्यात्, तथा कुरु ; माञ्च सहस्रसाम् सहस्रं भूरि सनोति ददाति इति सहस्रसाः सहस्रदः, तं अतिशयदातारं अकृपणमिति यावत् ऋषिं मुनिं कृधि कुरु। ११

হে ধনবান্ ইন্দ্র, তুমি দানে হৃষ্ট হইয়া থাক, তুমি আমাদিগের অভিষুত সোমরস পান কর, আমার নবযৌবন সুখে অতিক্রান্ত হইতে দাও এবং আমাকে একজন অকৃপণ ঋষি কর।১১

O Indra! you are pleased with offerings. Drink the Soma-juice prepared by us. Allow me to spend my youth in bliss. 11.

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायु मनुवृद्धयो जुष्टा भवन्तु जुष्टयः॥ १२

१। सायणः......हे गिर्वणः अस्मदीयस्तुतिभाक् इन्द्र विश्वतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

सर्वेषु कर्मसु प्रयुज्यमाना इमा गिरोऽस्मदीयाः स्तुतयस्त्वा त्वां परि भवन्तु सर्वतः प्राप्नुवन्तु। कीदृश्यो गिरः? वृद्धायुमनु प्रवृद्धेनायुष्येणोपेतं त्वामनुसृत्य वृद्धयो वर्धमानाः। किंचैता गिरो जुष्टा स्त्वया सेविताः सत्यो जुष्टयोऽस्माकं प्रीतिहेतवो भवन्तु।

२। प्रकृतार्थवाहिनी......हे गिर्वणः देव इन्द्र अस्माकम् इमा विश्वतो गिरः नानाविषये प्रयुक्तानि स्तुतिवाक्यानि त्वा त्वां परिभवन्तु सर्वप्रकारेण प्राप्नुवन्तु जुष्टाः त्वया सेविता ताः गिरः वृद्धायुं दीर्घायुषं त्वा मनु त्वत्प्रीणनानन्तरं वृद्धयो वर्द्धमाना अस्माकं जुष्टयः प्रीतिहेतवो भवन्तु। १२

হে দেবরাজ ইন্দ্র নানা বিষয়ে প্রযুক্ত আমাদিগের এই স্তুতিবাক্য সকল তোমাকে প্রাপ্ত হউক, তোমাকর্ত্তৃক সেবিত সেই স্তুতিবাক্য সকল দীর্ঘায়ুঃ তোমাকে প্রীত করিয়া আমাদিগকেও প্রীত করুক। ১২

O Indra! May these various hymns of ours reach you and may those hymns enjoyed by you please us by having pleased you. 12.

एकादशं सूक्तम्।

ऋषिर्मधुच्छन्दसः पुत्रो जेता, छन्दोदेवते पूर्ववत्।

इन्द्रं विश्वा अवीवृधन्त् समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥ १

१। सायणः......विश्वाः सर्वा गिरः अस्मदीयाः स्तुतयः इन्द्रम् अवीवृधन् वर्द्धितवत्यः। कीदृशं इन्द्रं समुद्रव्यचसं समुद्रवद् व्याप्तवन्तं रथीनां रथयुक्तानां योद्धृणां मध्ये रथीतमं अतिशयेन रथयुक्तं वाजानां अन्नानां पतिं स्वामिनं सत्पतिं सतां सन्मार्गवर्त्तिनां पालकम्। १

२। प्रकृतार्थवाहिनी......अस्माकं विश्वाः सर्व्वा गिरः स्तुतयः समुद्रव्यचसं समुद्रः अन्तरीक्षं भुवर्लोकः (तुरुष्कपारस्यापगोगस्थानानि) तं व्यचति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

वृत्रबलवधार्थं विशेषेण अचति गच्छति इति समुद्रव्यचाः तं अन्तरीक्षगामिनं अन्तरीक्षजेतारं रथीनां रथारूढ़ानां योद्धृणां मध्ये श्रेष्ठतमं रथीतमं (दीर्घत्वं छान्दसं) रथितमं रथिश्रेष्ठम् वाजानां अन्नानां पतिं सत्पतिं साधुजन-पालकं इन्द्रं अवीवृधन् वर्द्धिततन्त्यः। वेदमन्त्रैः इन्द्रस्य यशो विश्वव्याप्तं बभूव इति भावः। १

আমাদিগের স্তুতিমন্ত্রসমূহ অন্তরীক্ষবিজয়ী রথিশ্রেষ্ঠ অন্নপতি সজ্জনপালক ইন্দ্রকে অত্যন্ত বাড়াইয়াছে, তাঁহার যশঃ সর্ব্বত্র ব্যাপ্ত হইয়াছে। ১

Our hymns have highly extolled Indra who is the chief of the warriors, the conquerer of Antariksha, the lord of the food and the protector of the good. His fame has extended everywhere. 1.

सख्ये ते इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वा मभि प्रणोनुमो जेतार मपराजितम् ॥ २

१। सायणः ··· हे शवसस्पते बलस्य पालक इन्द्र ते तव सख्ये अनुग्रह-प्रयुक्ते सखित्वे वर्तमाना वयं वाजिनोऽन्नवन्तो भूत्वा मा भेम, शत्रुभ्यो भीतिं प्राप्ता मा भूम। अतस्त्वामभयहेतुमभिप्रणोनुमः, सर्वतः प्रकर्षेण स्तुमः। कीदृशं त्वां? जेतारं युद्धेषु जयशीलं, अपराजितं क्वापि पराजयरहितं॥

२। प्रकृतार्थवाहिनो ··· हे शवसस्पते बलपते इन्द्र ते तव सख्ये बन्धुत्वे स्थिता वयं वाजिनो योद्धारो मा भेम शत्रुभ्यो भीता मा भूम, वयम् अपराजितं क्वापि पराजयरहितम् अतएव जेतारं युद्धेषु जयशीलं त्वाम् अभिप्रणोनुमः प्रकर्षेण नुमः वन्दामहे! २

হে সেনাপতে ইন্দ্র তুমি আমাদিগের বন্ধু অর্থাৎ সহায়, সুতরাং যোদ্ধা আমরা শত্রু হইতে কিছুতেই ভীত হইব না, কেহ কোন যুদ্ধে তোমাকে পরাভূত করিতে পারে নাই, তুমি সর্ব্বত্র জয়লাভ করিয়াছ, আমরা তোমাকে নমস্কার করি। ২

O Indra, the commander of the army! Thou art our friend. We, warriors, shall not fear our enemies. Thou hast always conquererd and hast never been conquered. We bow to thee. 2.

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्ति ऊतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

१। सायणः......इन्द्रस्य सम्बन्धिन्यो रातयो धनदानानि पूर्वीरनादिकालसिद्धाः प्रभूता वा। अस्य इन्द्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः। एवं सति इदानीन्तनोऽपि यजमानः स्तोतृभ्य ऋत्विग्भ्यो गोमतो गोसहितस्य वाजस्य अन्नस्य पर्याप्तं मघं धनं यदि मंहते दक्षिणारूपेण ददाति, तदानीं ऊतयः बहुधनदानपूर्वकाणि इन्द्रस्य अस्मद्विषयाणि रक्षणानि न विदस्यन्ति, विशेषेण उपक्षीयन्ते। ३

२। प्रकृतार्थवाहिनी.....यदि इन्द्रो गोमतः गोयुक्तस्य वाजस्य अन्नस्य मघं धनं स्तोतृभ्यो यजमानेभ्यो मंहते ददाति, तर्हि तस्य इन्द्रस्य पूर्वीः रातयः पूर्व्व्यः पूर्व्वकालकृता. प्राक्तनाः दानानि ऊतयो रक्षणानि च न विदस्यन्ति (दस् उत्क्षेपणे) न विनश्यन्ति। ३

যদি ইন্দ্র তাঁহার এই অভিনব স্তোতৃগণকে গোধন ও অন্নধন দান করেন, তাহা হইলে তাঁহার পূর্ব্বকৃত দান ও রক্ষা সকল বিনষ্ট হইবে না। ৩

If Indra bestows cows and food on these new supplicants then his former gifts and protections will not perish. 3.

पुरां भिन्दु र्युवा कवि रमितौजा अजायत।
इन्द्रो विश्वस्य कर्म्मणो धर्त्ता वज्री पुरुष्टुतः॥ ४

१। सायणः......अयम् इन्द्रः उच्यमानगुणयुक्तः अजायत सम्पन्नः। कीदृग्गुणकः? इति तदुच्यते। पुराम् असुरपुराणां भिन्दुर्भेत्ता। युवा कदाचिदपि वलीपलितादिवार्द्धकरहितः, कविर्मेधावी अमितौजाः प्रभूतबलः विश्वस्य कर्म्मणः कृत्स्नस्य जोतिष्टोमादेर्धर्त्ता पोषकर्ता वज्री यजमानरक्षणार्थं सर्वदा वज्रयुक्तः, पुरुष्टुतः बहुविधे तत्तत्कर्म्मणि स्तुतः। ४

२। प्रकृतार्थवाहिनी......वज्री वज्रवान् इन्द्रो देवराजः पुराम् असुराणां नगराणां भिन्दुः भेत्ता विनाशकः, तस्य वज्रस्य प्रहारेण असुरनगराणि भिन्नानि भग्नानि अभवन् युवा युवकः, कविः कवित्वशाली वेदमन्त्रव्याकरणप्रणेता अमितौजा अपरिमितबलसम्पन्नः, विश्वस्य सर्व्वस्य कर्म्मणः यागयज्ञादिकार्य्यस्य धर्त्ता धारणकर्त्ता अजायत अभवत्, अतएव स पुरुष्टुतः पुरुभिः बहुभिः स्तुतो वन्दितः। ४

দেবরাজ ইন্দ্র কবি ও প্রভূতশৌর্য্যশালী যুবা, এবং যাগযজ্ঞাদি সমস্ত কর্ম্মের পোষ্টা ও

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

রক্ষাকর্ত্তা এবং তিনি লৌহময় আগ্নেয়াস্ত্র বজ্রধারী। তিনি সেই বজ্রপ্রহারদ্বারা অসুরদিগের শত শত নগরের ধ্বংসসাধন করিয়াছেন, এজন্য সকলে তাঁহাকে স্তুতি করিয়া থাকে। ৪

Indra is a poet. He is mighty and young. He is the upholder of all deeds. He is the destroyer of hundreds of cities (of the Asuras). He is therefore behymned by all. 4.

त्वं बलस्य गोमतोऽपावरद्रिवो बिलम्।
त्वां देवा अबिभ्युष स्तुज्यमानास आविषुः॥ ५

१। सा .....बलनामकः कश्चिदसुरो देवसम्बन्धिनीर्गा अपहृत्य कस्मिंश्चिद्विले गोपितवान्। तदानीं इन्द्रस्तद्विलं स्वसैन्येन समावृत्य तस्माद्विलाद्गा निःसारयामास। तदिदमुपाख्यानमिन्द्रो वलस्य बिलमपोर्णोदित्यादि ब्राह्मणेषु मन्त्रान्तरेषु च प्रसिद्धं। तदेतद्धृदि निधाय अयं मन्त्रः प्रवर्त्तते। हे अद्रिवः वज्रयुक्त इन्द्र त्वं गोमतो बलस्य गोभिर्युक्तस्य बलनामकस्य असुरस्य सम्बन्धि बिलमपावः स्वसैन्यमुखेन अपावृतवानसि। तदानीं तुज्यमानासो बलेन हिंस्यमाना देवा अबिभ्युषस्त्वदीयरक्षया बलादभीताः सन्तस्त्वामाविषुः प्राप्तवन्तः।

स्वाभिमतम्......अद्रिवलवृत्रादयो मेघाः निर्देशोऽयं निघण्टोरतीवभ्रमात्मक इति। निघण्टुमतानुसारी दयानन्दः खलु अतो नितरां प्रमादग्रस्त इति। बलस्तु वृत्रासुरस्य अनुज इति वेदेष्वेव दृश्यते।

अर्वाञ्चं नुनुदे वलम्।

वृत्रवधकाले तस्य रक्षार्थं तन्माता तस्य देहमाच्छाद्य स्थिता, अहो तथापि निघण्टुकारयास्कदयानन्दप्रभृतीना मित्थं व्यामोहप्रकटन मतीव हास्यजनकमिति। इन्द्रः परमेश्वरः, स सूर्य्यश्च मतमेतदपि व्याहतमिति।

२। प्रकृतार्थवाहिनी......हे अद्रिवः अद्रिवन् गोत्रभित् इन्द्र त्वं गोमतः गवापहारिणो वलस्य वलनाम्नः असुरस्य भारतवर्षात् तुरुष्कं गतस्य असुरविशेषस्य वृत्रासुरकनिष्ठभ्रातुरिति यावत् बिलं गुहाम् अपावः अपावृणोः स्वसैन्यैः अपावृतवान्, गुहाद्वारम् उद्घाटितवान्, तदानीं तुज्यमानासः तुज्यमाना असुरसैन्यैर्हन्यमाना देवाः अबिभ्युषः अभीताः सन्तः त्वाम् आविषुः (अव-प्राप्तौ) गतवन्तः त्वां न परित्यक्तवन्तः। ५

এক সময় বৃত্র ও তদীয় কনিষ্ঠ ভ্রাতা বল ইন্দ্রকর্ত্তৃক ভারতবর্ষহইতে তাড়িত হইয়া যথাক্রমে পারস্য ও তুরুষ্ক দেশে যাইয়া আশ্রয় গ্রহণ করেন, তৎপর বলাসুরের অনুচর পণিগণ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

স্বর্গে যাইয়া অঙ্গিরাদিগের গরু চুরি করিয়া তুরুকস্থিত এক পর্ব্বত গুহায় লুকাইয়া রাখেন। ইন্দ্র তুরুকে যাইয়া দেবগণের সহায়তায় সেই গুহাদ্বার উদ্ঘাটনপূর্ব্বক সেই অপহৃত গো সকল বাহির করিয়া আনেন। এ বিষয়ে আরও বহু মন্ত্র ঋগ্বেদে আছে।

হে গোত্রভিৎ ইন্দ্র তুমি গবাপহারী বলাসুরের গুহাদ্বার উদ্ঘাটিত করিলে, অসুর সৈন্যেরা তোমার সহচর দেবগণকে বধ করিতে উদ্যত হয়। কিন্তু তথাপি দেবতারা ভীত না হইয়া তোমার সহায়তা করিতেছিলেন, তাঁহারা তোমাকে পরিত্যাগ করিয়াছিলেন না। ৫

[At one time Vritra and his younger brother Bala being driven out of India by Indra took shelter in Persia and Turkey respectively. Then Panis, the attendants of Bala, stole away the cows of the Angiras in heaven and kept them concealed in a mountain-cave in Turkey. Indra proceeded to Turkey and with the help of the gods opened the gates of the cave and rescued the stolen cows. There are many other passages in the Rigveda which allude to this incident.]

O Indra, the dominator of mountains! When thou openedest the gates of the cave of the cow-stealing demon Bala the terrified gods who were going to be killed by the Asuras did not fall away from thee. 5.

तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन्।
उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः॥ ६

१। सायणः......हे शूर संग्रामे शौर्ययुक्त इन्द्र तव रातिभिः कर्मसु त्वदीयधनदाननिमित्तभूतैरहं होता प्रत्यायं त्वां पुनरागतोऽस्मि। पुरा बहुषु कर्मसु त्वत्तो धनस्य लब्धत्वादस्मिन् कर्मणि प्रत्यागमनमित्युच्यते। किं कुर्वन्? सिन्धुं स्यन्दमानं सोममावदन् सर्वतः कथयन्। अस्मिन् सोमयागे त्वदीयां धनदानकीर्त्तिं प्रकटयन्नित्यर्थः। हे गिर्वणो गीर्भिर्वननीयेन्द्र कारवः कर्त्तार ऋत्विग्यजमाना उपातिष्ठन्त पुरा धनलाभार्थं त्वामुपस्थितवन्तः। उपस्थाय च तस्य तादृशस्य औदार्योपेतस्य ते तव धनदानं विदुः जानन्ति इति।

२। प्रकृतार्थवाहिनी......हे शूर इन्द्र अहं यजमानः तव रातिभिः धनदानैः तुष्टः सन् प्रत्यायं त्वां प्रत्यायं प्रत्यागतः अस्मि यतः त्वां याचमानो जनो न निराशो भवति। हे गिर्वणो देवराज कारवश्च स्तोतारश्च सिन्धुं सिन्धुदेशघटितम् अन्तरिक्षविषयकं तव शौर्य्यादिकम् आवदन् (वचनव्यत्ययः) आवदन्तः सम्यक् वर्णयन्त उपातिष्ठन्त वन्दितवन्तः उपस्थिता स्ते कारवश्च तस्य (विभक्तिव्यत्ययः) तं तादृशं दानशीलं त्वां विदुर्जानन्ति। ६

१৯

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

হে শূর ইন্দ্র! তুমি আমাদিগকে বহুবার ধন দান করিয়াছ, কখনও নিরাশ কর নাই, এজন্য আমি তোমাকে বিশ্বাস করিয়া তোমার নিকট পুনরায় আসিয়াছি। হে দেবরাজ ইন্দ্র! অন্যান্য স্তোতৃগণও তুমি সিন্ধুদেশ অর্থাৎ অন্তরীক্ষে বৃত্রাসুরাদি বধ করিয়া যে কীর্ত্তি সঞ্চয় করিয়াছ, তাহা কীর্ত্তন করিতে করিতে এখানে উপস্থিত হইয়াছেন, তুমি যে তোমার যাচককে নিরাশ কর না, তুমি যে যথার্থ দাতা, তাহা তাঁহারাও জানেন। ৬

O Indra! Being satisfied with gifts I have approached thee again. Other singers, too, singing thy exploits in Sindh (Antariksha) have come. They know thee. 6.

मायाभिरिन्द्र मायिनं त्वं शुष्ण मवातिरः ।
विदुष्टे तस्य मेधिरा स्तेषां श्रवांसि-उत्तिर ॥ ७

१। सायणः......हे इन्द्र त्वं मायिनं नानाविधकपटोपेतं शुष्णं भूतानां शोषणहेतुमितन्नामकमसुरं मायाभिस्तत्प्रतिकूलैः कपटविशेषैः। यद्वा तद्वधोपायगोचरप्रज्ञाभिः अवातिरः हिंसितवानसि। एतच्च यास्केनोक्तं—"इन्द्रः शुष्णं जघानेति।" शुष्णं पिप्रुमित्यादिमन्त्रे चायमर्थो विस्पष्टः। मेधिरा मेधावन्तोऽनुष्ठातारस्तस्य तादृशस्य ते तव महिमानं विदुः जानन्ति। तेषां जानतामनुष्ठातॄणां श्रवांस्यन्नान्युत्तिर वर्द्धय॥

२। प्रकृतार्थवाहिनी......हे इन्द्र त्वं मायिनं कपटं शुष्णम् एतन्नामकमसुरं मायाभिः छलैः "शठे शाठ्यं समाचरेत्" इति न्यायमनुसरन् अवातिरः हिंसितवानसि। मेधिरा मेधावन्तः तस्य तादृशस्य ते तव महिमानमिति शेषः विदुर्जानन्ति तेषां श्रवांसि धनानि उत्तिर वर्द्धय। ७

হে ইন্দ্র! তুমি ছলদ্বারা শঠ শুষ্ণ অসুরকে বধ করিয়াছ, স্তোতৃগণ তোমার সে মহিমার কথা অবগত আছেন, তুমি তাঁহাদিগের ধন বৃদ্ধি কর। ৭

O Indra! Thou hast slain artfully the wily demon S'ushna. The wise know this. Pray, increase their wealth. 7.

इन्द्रमीशान मोजसा अभि स्तोमा अनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ ८।२१

१। सायणः......स्तोमाः स्तोतार ऋत्विजः, ओजसा बलेन ईशानं जगतो नियामकं इन्द्रं अभ्यनूषत, सर्वत्र स्तुतवन्तः। यस्य इन्द्रस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

रातयो धनदानानि सहस्रं सहस्रसंख्योपेतानि सन्ति उत वा अथवा भूयसी: सहस्रसंख्याया अपि अधिका: सन्ति, तमिन्द्रमिति पूर्व्वत्रान्वय:। ८

२। प्रकृतार्थवाहिनी...... यस्य इन्द्रस्य रातयो धनदानानि सहस्रं सहस्रसंख्योपेतानि उत वा अथवा भूयसी: भूयस्य: सन्ति विद्यन्ते स्तोमा लक्षणया स्तोमकारिण: यजमानास्तं ईशानम् इन्द्रं देवराजम् ओजसा बलेन तारस्वरेण इति यावत् अभ्यनूषत सर्व्वत्र स्तुतवन्त:।

যে দেবরাজ ইন্দ্রের দানসংখ্যা সহস্র কি ততোঽধিক, যজমানগণ সর্ব্বত্র সেই প্রভু ইন্দ্রের তারস্বরে ওজস্বিনী ভাষায় স্তুতি করিতেছেন। ৮

The Yajama'nas are singing loudly the praise of Lord Indra whose gifts are a thousand in number or even more. 8.

द्वादशं सूक्तम्।

कण्वपुत्रो मेधातिथि र्ऋषि:। गायत्रीच्छन्द:। अग्निर्देवता।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्।
अस्य यज्ञस्य सुक्रतुम्॥ १

१। सायण:...... अग्ने दूतत्व मेतन्मन्त्रव्याख्याने तैत्तिरीयब्राह्मणे २, ५, ८। समाम्नायते—अग्निर्देवानां दूत आसीत्, उशना: काव्य: असुराणामिति। कीदृशं ? होतारं देवानां तादृशं देवदूत मग्निं अस्मिन् कर्म्मणि वृणीमहे संभजाम:। आह्वातारं विश्ववेदसं सर्व्वधनोपेतम् अस्य प्रवर्त्तमानस्य यज्ञस्य निष्पादकत्वेन सुक्रतुं शोभनकर्म्माणं शोभनप्रज्ञं वा इति।

स्वाभिमतं...... वेदेषु द्वौ अग्नी विद्येते, नराग्नि: जड़ाग्निश्च, अस्मिन् मन्त्रे उल्लिखित: अयम् अग्नि: क: ? सायणादिभि स्तत्र व्यक्तीकृतं जड़ाग्निस्तु स्वयमसिद्धत्वात् कस्यापि देवस्य आह्वानकर्त्ता भवितुं न समर्थ एव। नराग्निरेव वैवस्वत-मन्वादीन् पथप्रदर्शनपूर्व्वकं भारतवर्षं मानिनाय,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

तस्यैव आह्वानेन दैत्यदानवनिपीड़िता अन्येऽपि देवाः स्वर्गात् भारतवर्षं माजग्मुः। स एव नराग्निः देवानां दौत्यं स्वीचकार, यदुक्तं कृष्णयजुषि—अग्निर्देवानां दूत आसीत्, उशनाः काव्यः—असुराणां १४२ पृ। न पुंन जंड़ाग्नौ दौत्यं सर्वतत्त्वज्ञत्वमपि सम्भवति। परं मन्त्रप्रयुक्तः अयम् अग्निः जड़ाग्निरेव इति ध्येयम्। यतः कालेन महता यदा तु भारतवासिनो जना नराग्ने रस्तित्वमपि व्यस्मरन्, तदैव नराग्नेः सर्वं धर्म्मकर्म्मादिकं हूयमाने जड़ाग्नौ आरोपितवन्तः तदयं मन्त्रः। वेदस्शब्दः धनार्थवाची, इति यत् निघण्टुकारेण चिन्तितं तदपि न समीचीनम्।

२। प्रकृतार्थवाहिनी ....वयम् अस्य अनुष्ठीयमानस्य यज्ञस्य यागस्य सुक्रतुं शोभनकर्म्माणं सुसम्पादकं विश्ववेदसं सर्वतत्त्वज्ञं (वेत्तेरस् कर्त्तरि वेदाः तं) अग्नि मग्निदेवं दूतं वार्त्तावहं होतारम् आह्वातारम् अन्येषा मिन्द्रादीनां देवानाम् आह्वानकर्त्तारं वृणीमहे वरयामहे ॥ १

মহর্ষি অগ্নিদেব আমাদিগের এই অনুষ্ঠীয়মান যজ্ঞ সম্পাদন করিতেছেন। তিনি সর্ব্বতত্ত্বজ্ঞ, আমরা তাঁহাকে দৌত্যকার্য্যে বরণ করিতেছি, তিনি এই যজ্ঞে ইন্দ্রাদি দেবগণকে আহ্বান করিয়া আনয়ন করুন। ১

We invite the god Agni the messenger and inviter of the gods and our helper in this sacrifice. 1.

अग्नि मग्निं हवीमभिः सदा हवन्त विश्पतिम्।
हव्यवाहं पुरुप्रियम् ॥ २

१। सायणः..... यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदात् पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्याग्नि मग्निमिति वीप्सा। तं हवीमभिराह्वानकरणैर्मन्त्रैः सदा हवन्त निरन्तरमनुष्ठातार आह्वयन्ति! कीदृशं? विश्पतिं विशां प्रजानां होत्रादीनां पालकं। हव्यवाहं यजमानसमर्पितस्य हविषो देवान् प्रति वोढ़ारं अतएव पुरुप्रियं बहूनां प्रीत्यास्पदम्। २

२। प्रकृतार्थवाहिनी......यजमाना इति शेषः सदा सततं हवीमभिराह्वानमन्त्रैः अग्निं जड़ाग्निं हवन्त (कपोलचल मेतत् पदं) ह्वयन्ति,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

आह्वयन्ति, तथा अग्निं नराग्निमपि निरन्तरं हवीमभिराह्वयन्ति। तौ अग्नी किम्भूतौ ? तदाह—

यो जड़ाग्निः विश्पतिः साग्निकगृहस्थानां प्रजानां पतिः स्वामी, पक्षे यो नराग्निः सर्वेषां नागरिकाणां पतिः प्रभुर्नेता इति। यो जड़ाग्निः—हव्यवाट् यज्ञे प्रदत्तं हविः देवानां समीपे वहति, पक्षे योनराग्नि हव्यं जड़ाग्निं वहति प्रापयति नराग्निः दूतः अन्येषां देवादीनां समीपे वार्त्तां नयति। एको जड़ाग्निस्तनूपाः हिमात् रक्षणहेतोः पुरुप्रियः सर्वजनप्रियः; पक्षे अन्यो नराग्नि रूपद्रुतान् देवान् भारतवर्षे आनीय तेषां प्रभूतहितसाधनाच्च सर्वजनप्रियो बभूव। यजमाना एवम्भूतौ द्वाविव अग्नी आह्वतवन्त इति। २

যজমানগণ নিরন্তরই জড়াগ্নি ও নরাগ্নির উপাসনা করিতেন। সমাজ বা গৃহস্থালীর কোনও আপদ্ বিপদ্ ঘটিলে তাঁহারা জনসাধারণের প্রভু বা নেতা—সর্ব্বজনপ্রিয় বার্ত্তাবহনকারী নরাগ্নিকে আহ্বান করিতেন। পক্ষান্তরে তাঁহারা ইন্দ্রাদি দেবগণকে উপাসনার প্রয়োজন হইলে (ভ্রান্তিবশতঃ) জড়াগ্নিকে আহ্বান করিয়া উহাতে হবিঃ নিক্ষেপ করিতেন—জড়াগ্নি উহা দেবগণের নিকট পঁহুছাইয়া দিতেন (ভ্রান্তিরেষা) জড়াগ্নি তনূপাঃ অর্থাৎ উত্তাপদানে দেহরক্ষাকারী, সুতরাং এহেন হব্যবাহ জড়াগ্নিও নিতরাং সর্ব্বজনপ্রিয় এবং সকলে তাহাকে স্ব স্ব গৃহে স্বামী বা গৃহদেবতাস্বরূপ রক্ষা করিতেন। ২

The sacrificers with hymns of invitation invoke the two Agnis (the sage Agni and the fire) who are respectively the deity of Sa'gnika persons and the leader of men, who are the carrier of oblations and the carrier of the news to the gods, who are loved by all [for protection from cold and from the oppressed god]. 2.

N. B. The two Agnis are often confused with each other. To offer oblations to *fire* for the satisfaction of the gods is due a misconception of the two Agnis.

अग्ने देवाँ इहावह जज्ञानो वृक्तबर्हिषे।
असि होता न ईड्यः॥ ३

१। सायणः......हे अग्ने जज्ञानः अरण्योरुत्पन्नस्त्वं वृक्तबर्हिषे आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानम् अनुग्रहीतु मिह कर्मणि हविर्भुजो देवान् आवह नः अस्मदर्थं होताःदेवाना माह्वाता त्वम् ईड्यः स्तुत्यः असि।

स्वाभिमतं......यदा तु सर्वे भारतागता देवाश्चब्राह्मणाः स्वर्गात् देवाना मानेतु र्नराग्नेः सर्व मेतिह्यं विस्मृतवन्तः, तदेव नराग्ने स्तद्देवानयनकर्म्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

जड़ाग्नौ आरोपित मभूत्। "वृक्तबर्हिषः ऋत्विजः" इति यास्केन व्याख्यातं। वस्तुतस्तु वृक्तं छिन्नं बर्हिः कुशं यज्ञार्थं यै स्ते। मन्त्रेऽस्मिन् "वृक्तबर्हिषे" इति पदं ऋत्विजे इत्येवार्थे प्रयुक्त मिति प्रतीयते। होता आह्वाता इत्यपि व्याख्या अत्र न समीचीना।

२। प्रकृतार्थवाहिनी .... हे अग्ने! जज्ञानः (जन धातोः कानच्) अरणीसंघर्षणेन उत्पादितः त्वं नः अस्माकं होता होमसम्पादयिता, के वयं क्षुद्राः? त्वमेव यज्ञस्य सर्वं मतएव त्व मस्माकमीड्यः वन्दनीयश्च असि भवसि। त्व मिह यज्ञभूमौ वृक्तबर्हिषे यजमाननिमित्तं देवान् इन्द्रादीन् आवह आनय। ३

হে অগ্নি! তুমি অথর্ব কর্ত্তৃক অরণীসংঘর্ষণদ্বারা উৎপন্ন হইয়া এখন আমাদিগের যজ্ঞের সম্পাদয়িতা ও বন্দনীয় হইয়াছ। তুমি এই যজমানের নিমিত্ত এখানে ইন্দ্রাদি দেবগণকে আনয়ন কর। ৩

O Agni! thou who art born of the two Aranis, bring the gods here for the good of the sacrificer. Thou art the inviter of the gods and art worthy of our worship. 3.

ताँ उशतो विबोधय यदग्ने यासि दूत्यम्।
देवै रा सत्सि बर्हिषि॥ ४

१। सायणः......हे अग्ने यद्यस्मात् कारणाद्त्वं यासि देवानां दूतकर्म प्राप्नोषि तस्मात् कारणात् उशतो हविः कामयमानान् तान्देवान् हविःस्वीकारार्थं विबोधय, विबोध्य च बर्हिषि अस्मिन् कर्मणि तैर्देवैः सह आसत्सि आसीद आगत्योपविश॥

२। प्रकृतार्थवाहिनी......हे अग्ने! यत् यतः त्वं दूत्यं दौत्यं दौत्यकर्म यासि स्वीकरोषि, अतः उशतः (वश-शतृ) हविःकामयमानान् तान् देवान् विबोधय जागरय ततस्तानिह आनीय च तैर्देवैः सह त्वमपि बर्हिषि अस्मिन् आस्तीर्णकुशासने आसत्सि आसीदसि आसीद उपविश। अत्रापि नराग्ने दौत्यकर्म जड़ाग्नौ आरोपित मभूत्॥ ४

হে অগ্নি! তুমি সর্ব্বদাই দৌত্যকর্ম্ম গ্রহণ করিয়া থাক, তুমি দেবদূত। যদি দৌত্য গ্রহণ করিয়া থাক, তাহা হইলে যজ্ঞভাগপ্রার্থী দেবগণকে এখানে আসিবার জন্য সজাগ কর ও তাঁহাদিগকে লইয়া এই আস্তীর্ণ কুশাসনে উপবেশন কর। ৪

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MIL

O Agni! as thou hast kindly consented to be a messenger, do rouse up the gods and take your seat with the gods on this seat of Kusa. 4.

घृताहवन दीदिवः प्रति ष्म रिषतो दह।
अग्ने त्वं रक्षस्विनः॥ ५

१। सायणः·····हे घृताहवन घृतेनाहूयमान दीदिवो दीप्यमानाग्ने त्वं रक्षस्विनो रक्षोयुक्तान् रिषतो हिंसकान् शत्रून् प्रति अस्माकं प्रतिकूलान् दहस्म सर्वथा भस्मीकुरु॥ ५

२। प्रकृतार्थवाहिनी·····हे घृताहवन! घृतेन आहवनम् आहुतिर्यस्य तत्सम्बोधनं घृतेन आहूयमान दीदिवः दीदिवन् (भाषाविकारात् नकारस्य रत्वं। रुङ् नकारस्य यथा अद्रिवन् अद्रिवः कपोलचल मेतत् पदं) देदीप्यमान अग्ने! त्वं रक्षस्विनो राक्षसवतो राक्षसैः सह मिलितान् प्रतिरिषतो प्रतिहिंसां कुर्वतः हिंसकान् शत्रून् दह स्म भस्मीकुरु। ५

হে অগ্নে আমরা ঘৃতদ্বারা তোমার আহুতি প্রদান করিলে তুমি তাহাতে প্রদীপ্ত হও। যে সকল শত্রু রাক্ষসদিগের সহিত মিলিত হইয়া আমাদিগের প্রতি হিংসা করে, তুমি তাহাদিগকে দগ্ধ করিয়া যায়। ৫

O shining Agni! thou who art entertained with ghee do burn down the mischief-makers who have been united with Rákshasas. 5.

अग्निना अग्निः समिध्यते कविर्गृहपतिर्युवा।
हव्यवाट् जुह्वास्यः॥ ६।२२

१। सायणः·····अग्निराहवनीयाख्यः स्वस्मिन् प्रक्षिप्यमाणेनाग्निना निर्मथ्येन प्रणीतेन वा सह समिध्यते सम्यक् दीप्यते। कीदृशोऽग्निः। कविः मेधावी; गृहपतिः यजमानगृहस्य पालकः; युवा नित्यतरुणः। हव्यवाट् हविषो वोढा; जुह्वास्यः जुहूरूपेण मुखेन युक्तः॥ ६

स्वाभिमतम्·····मन्त्रेऽस्मिन् एको जड़ाग्निरपरो नराग्नि रिति। महर्षिरग्निरपि वह्ने रुपासक आसीत्, सोऽपि अरणीसंघर्षणेन अग्निं प्रज्वाल्य तमुपास्त इति।

२। प्रकृतार्थवाहिनी·····अग्निना अग्निनाम्ना ऋषिणा अग्निः वह्निः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

समिध्यते प्रज्वाल्यते। असौ नराग्निः कविः गद्यपद्यरचनापटुः पक्षे जड़ाग्निश्च कवि र्नानाशब्दकारी; असौ नराग्निः गृहपतिः गृहाणां सर्वेषां पुरवासिनां भवनानां पतिः पालकः, पक्षान्तरे असौ जड़ाग्निः गृहपतिः गृहस्य पतिः गृहपतिस्वरूपो गार्हपत्याग्निः, तथा नराग्निर्युवा प्राप्तयौवनः, पक्षे जड़ाग्निश्च युवा प्रतियागं नित्यतरुणः। स जड़ाग्निश्च पुनः किम्भूतः? हव्यवाट् हव्यवहनकारी, यो वह्निः हुतं द्रव्यादिकं देवान् वहति प्रापयति सः। सः वह्निः पुनः किम्भूतः? जुह्वास्यः—जुहूर्ज्वाला एव आस्यं मुखं यस्य सः। ६

অগ্নির উপাসক অগ্নি ঋষিকর্তৃক অগ্নি অর্থাৎ বহ্নি প্রজ্বালিত হইতেছে। অগ্নি ঋষিও গদ্যপদ্য-রচনাপটু বলিয়া কবি, জড়াগ্নিও নানাপ্রকার শব্দ করে বলিয়া কবি; অগ্নি ঋষি সকল নগরবাসীর নেতা বলিয়া গৃহপতি, জড়াগ্নিও প্রতি গৃহে গার্হপত্য অগ্নিরূপে অবস্থাপিত বলিয়া গৃহপতি; অগ্নি ঋষি প্রাপ্তযৌবন বলিয়া যুবা, জড়াগ্নিও প্রতিযজ্ঞে নূতন প্রজ্বালিত হয় বলিয়া যুবা অর্থাৎ নিত্য তরুণ। অপি চ, জড়াগ্নি হুত দ্রব্যসকল দেবগণের নিকট বহন করে বলিয়া সে হব্যবাট্ এবং সে জুহূ অর্থাৎ জ্বালারূপ আস্য বা মুখদ্বারা ভক্ষণ করে বলিয়া তাহার নাম জুহ্বাস্য। ৬

Fire, the carrier of oblations, the maker of various sounds, the lord of house-holders and always young, and with flames as its mouth, is being kindled by the sage named Agni. 6.

N. B. The epithets of *fire* here are more applicable to the *person* Agni. This is perhaps due to a confusion of the two.

कवि मग्नि मुप स्तुहि सत्यधर्म्माण मध्वरे।
देव ममीवचातनम्॥ ७

१। सायणः....हे स्तोतृसंघ। अध्वरे क्रतौ अग्निमुपस्तुहि उपेत्य स्तुतिं कुरु। कीदृशं? कविं मेधाविनं; सत्यधर्माणं सत्यवदनरूपेण धर्मेण उपेतं देवं। द्योतमानं; अमीवचातनं अमीवानां हिंसकानां शत्रूणां रोगाणां वा घातकम्। ७

२। प्रकृतार्थवाहिनी......हे यजमान त्वम् अध्वरे यज्ञे कविं मेधाविनं सत्यधर्म्माणं सत्यसन्धम् अमीवचातनम् अमीवा शत्रुः तस्य चातनं घातकं शत्रुनाशक मग्निं देवम् उपस्तुहि समीपं गत्वा वन्दस्व। एष खलु मन्त्रो नराग्नि पर इति। ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

হে যজমান, তুমি যজ্ঞে কবি অর্থাৎ পণ্ডিত এবং সত্যধর্ম্মা ও শত্রুহন্তা অগ্নিদেবের নিকটে যাইয়া তাঁহার স্তুতি কর।

Worship in the sacrifice the god Agni who is wise and truthful and destroyer of enemies. 7.

यस्त्वामग्ने हविष्पति दूतं देव सपर्य्यति।
तस्य स्म प्राविता भव॥ ८

१। सायणः.....हे अग्ने। देव यो हविष्पति यंजमानः देवदूतं त्वां सपर्य्यति परिचरति, तस्य यजमानस्य प्राविता भवस्म, अवश्यं रक्षको भव। ८

२। प्रकृतार्थवाहिनी.....हे देव अग्ने! यो हविष्पतिर्यजमानो दूतं (अत्रापि नराग्ने दैवदूतत्वं जड़ाग्नौ आरोपितं) देवदूतं त्वां सपर्य्यति वन्दते, त्वं तस्य प्राविता प्रकर्षेण रक्षाकर्त्ता भवस्म भवसि। अथवा नराग्निपर एष मन्त्र इति। ८

হে দেব অগ্নে! তুমি দেবদূত, যে যজমান তোমার বন্দনা করে, তুমি তাহাকে সম্যক্ প্রকারে রক্ষা করিয়া থাক। ৮

O Agni! thou art the messenger of the gods. Thou protectest the sacrificer who worships thee. 8.

यो अग्निं देववीतये हविष्माँ आविवासति।
तस्मै पावक मृळय॥ ९

१। सायणः....हविष्मान् हविर्युक्तो यो यजमानो देववीतये देवानां हविर्भक्षणहेतुयागार्थमग्निमाविवासति अग्नेः समीपे विशेषेण आगत्य परिचर्यां करोति, हे पावकाग्ने तस्मै मृळय तं यजमानं सुखय॥ ९

२। प्रकृतार्थवाहिनी......यो हविष्मान् हविर्युक्तो यजमानो देववीतये देवानां वीतये पीतये सोमपानार्थं अग्निदेवम् आविवासति सम्यक् परिचरति, हे पावक जगत्पावन अग्न त्वं तस्मै तं मृळय मृड़य सुखय सुखिनं कुरु। ९

যে হবির্যুক্ত যজমান দেবগণের সোমপানের জন্য অগ্নির বন্দনা করে, হে জগৎপাবন অগ্নিদেব তুমি তাহাকে সুখী কর। ৯

O Agni, the purifier of the world! bring thou happiness to that sacrificer who serves Agni with oblations for the draught of the gods. 9.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

स नः पावक दीदिवो अग्ने देवाँ इहावह।

उप यज्ञं हविश्च नः॥ १०

१। उवटः......यस्त्वम् उक्ताधिकारः स नः अस्माकं हे पावक पावयितः! दीदिवः दीप्तिमन् हे अग्ने देवान् इह आवह उपयज्ञं यज्ञस्य समीपं ततः अनन्तरं हविश्च नः संबन्धि देवान् प्रापय इति शेषः। ८—१७अ यजुः।

२। सायणः......हे दीदिवो दीप्यमान पावक! शोधक अग्ने स त्वं नः अस्मदर्थं इह देवयजनदेशे देवान् आवह। ततो नः अस्मदीयं यज्ञं तत्रत्यं हविश्च उप देवसमीपे प्रापय इति शेषः। १०

३। दयानन्दः ......स जगदीश्वरो भौतिको वा नः अस्मभ्यं पावक पवित्रकर्त्तः शुद्धिहेतुर्वा, दीदिवः स्वसामर्थ्येन देदीप्यमान दीप्तिमान् वा, अग्ने सर्वप्रापक प्राप्तिहेतुर्वा देवान् विदुषो दिव्यगुणान् वा, इह अस्मिन् संसारे अस्मत्सन्निधौ आ समन्तात् वह प्रापय प्रापयति वा। उप सामीप्ये यज्ञं पूर्वोक्तं त्रिविधं हविः दातुम् आदातु मर्हं नः अस्माकं॥ १०

४। प्रकृतार्थवाहिनी . . . . . हे दीदिवः दीदिवन् देदीप्यमान पावक अग्ने! स त्वम् इह यज्ञभूमौ देवान् इन्द्रादीन् आवह आनय। ततः नः अस्माकं यज्ञं यागं हविश्च उपावह देवानां समीपे नय॥ १०

হে দীপ্যমান জগৎপাবন অগ্নিদেব! সেই উপকারকরণসমর্থ তুমি এই যজ্ঞভূমিতে দেবগণকে আনয়ন কর ও আমাদিগের যজ্ঞ ও হবিঃ উাহাদিগের নিকট উপস্থাপিত কর। ১০

O shining and purifying fire! bring thou the gods here (to the sacrificial ground) and then carry our oblations to them.

सः नः स्तवान आ भर गायत्रेण नवीयसा।

रयिं वीरवती मिषम्॥ ११

१। सायणः. . . . . हे अग्ने नवीयसा नवतरेण पूर्वैरप्यसंपादितेन गायत्रेण गायत्रीच्छन्दस्केनानेन सूक्तेन स्तवानः स्तूयमानः स त्वं नोऽस्मदर्थं रयिं धनं वीरवतीं शूरपुत्रप्रभृत्यपत्ययुक्तामिषमन्नं चाभर संपादय॥ ११

२। प्रकृतार्थवाहिनी. . . . . हे अग्ने! नवीयसा गायत्रेण गायत्री-च्छन्दसा नूतनविरचितेन मन्त्रेण स्तवानः स्तूयमानः स त्वं नः अस्माक मस्मदर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

रयिं धनं वीरवतीं पुत्त्रपौत्रादियुंक्ता मिषमन्नञ्च आभर आहर। त्वमस्माभिः स्तुतः सन् अस्मभ्यं धनं पुत्त्रपौत्रादिकं तथा अन्नञ्च देहि ॥ ११

হে অগ্নে! আমরা গায়ত্রীচ্ছন্দে বিরচিত এই নূতন মন্ত্রে তোমার স্তুতি করিতেছি। তুমি স্তুত হইয়া আমাদিগকে ধন, জন ও অন্ন প্রদান কর। ১১

O Agni! We invoke thee with this new prayer couched in Gáyattri metre. Do thou grant us men, wealth and food. 11.

अग्ने शुक्रेण शोचिषा विश्वाभि र्देवहूतिभिः।
इमं स्तोमं जुषस्व नः ॥ १२।२३

१। सायणः.....हे अग्ने शुक्रेण शोचिषा त्वदीयश्वेतवर्णदीप्त्या विश्वाभिर्देवहूतिभिस्त्वत्कृतसर्वदेवताह्वानसाधनस्तोत्रैश्च युक्तस्त्वं नोऽस्मदीयमिमं स्तोमं स्तोत्रविशेषं जुषस्व सेवस्व। १२

२। प्रकृतार्थवाहिनी.....हे अग्ने! त्वं शुक्रेण निर्म्मलेन शोचिषा दीप्त्या तथा विश्वाभि र्नानाविधाभि र्देवहूतिभिः देवाह्वाने रुपलच्चितः, तव शोचिरपि भृशं निर्म्मलं तथा त्वं सर्वप्रकारेण देवानामपि आह्वाता। अतएव वन्दनीयस्त्वं नः अस्माक मिमं पठ्यमानं मन्त्रं जुषस्व भजस्व। १२।२३

হে অগ্নে! তোমার দীপ্তি অতি নির্ম্মল। অপি চ তুমি আমাদিগের নিমিত্ত সর্ব্বদাই ইন্দ্রাদি দেবগণকে আহ্বান করিয়া থাক। অতএব বন্দনীয় তুমি আমাদিগের পঠ্যমান এই স্তুতিমন্ত্র গ্রহণ কর। ১২

O Agni! Your glow is white and you are the inviter of the gods. Do thou enjoy this hymn. 12.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

त्रयोदशं सूक्तम् ।

सुसमिद्ध इत्यादिकं द्वादशर्चं माप्रीसूक्तं तस्य काण्वो मेधातिथिर्ऋषिः, गायत्रं छन्दः अग्न्यादयो द्वादश देवताः ।

सुसमिद्धो न आवह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १

१। सायणः...... हे अग्ने ! सुसमिद्धो नामकस्त्वं नः अस्मदीयाय हविष्मते यजमानाय तदनुग्रहार्थं देवान् आवह। हे पावक शोधक होतः होमनिष्पादक अग्ने यक्षि च यज च।

स्वाभिमतं—अत्र सायणादिभिः "यक्षि च यज च देवान् अर्चय" इति व्याख्यातं, परं तन्न साधीयः। अग्निरेव देवः अर्चनीयः स कथमन्यान् देवान् अर्चयिष्यति ? वस्तुतस्तु यजधातुरयं यथा पूजनार्थक स्तथा दानार्थकश्च "यजो देवार्चादानसङ्गक्तौ" अतएव यक्षि प्रयच्छ इत्येव व्याख्या साधीयसी स्यात्।

२। प्रकृतार्थवाहिनी...हे होतः पावक सुसमिद्धः सम्यक् प्रज्वालित स्त्वं नः अस्माकं हविष्मते हविर्युक्ताय यजमानाय देवान् इन्द्रादीन् आवह आनय, तथा यक्षि च यजस्व च धनादिकं प्रयच्छ च ॥ १

হে হোমসম্পাদক জগৎপাবন অগ্নে! তুমি আমাদিগকর্ত্তৃক প্রজ্বালিত হইয়া হবির্যুক্ত যজমানের জন্য এখানে দেবগণকে আনয়ন কর ও আমাদিগকে ধনজনাদি দান কর। ১

O Agni, the purifier of the world and the helper in sacrifice! Do thou bring here the gods for the sacrificers and give us wealth &c. 1.

मधुमन्तं तनूनपात् यज्ञं देवेषु नः कवे ।
अद्या कृणुहि वीतये ॥ २

१। सायणः......हे कवे मेधाविन् अग्ने तनूनपादेतन्नामकस्त्वमद्यास्मिन्दिने नोऽस्मदीयं मधुमन्तं रसवन्तं यज्ञं हविः वीतये भक्षणार्थं देवेषु कृणुहि कुरु प्रापयेत्यर्थः ॥ २

२। प्रकृतार्थवाहिनी......हे कवे (नराग्नेर्विशेषणं जड़ाग्नौ योजितमिति)। तनूनपात् तनू—न—पत्+णि+क्विप् कर्तरि, यस्य सेवनेन क्षिमात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

तनूर्न पतति, तनूं देहं न पातयति इति तनूनपात् तनूपाः, तत्सम्बुद्धौ अद्य नो वयं देवेषु देवानां वीतये पीतये यज्ञं मधुमन्तं सोमरसयुक्तं कृणुहि कृतवन्तः (व्यत्ययोबहुलम्)। २

হে দেহরক্ষাকারিন্ অগ্নে! অদ্য আমরা দেবগণের পানের জন্য যজ্ঞে সোমরস অভিষুত করিয়াছি। ২

O Agni the preserver of our body from cold! We have this day prepared the sweet Soma juice in this sacrifice for the draught of the gods. 2.

नराशंस मिह प्रिय मस्मिन् यज्ञ उपह्वये।
मधुजिह्वं हविष्कृतम् ॥ ३

१। सायणः.....इह देवयजनदेशे अस्मिन् प्रवर्तमाने यज्ञे नराशंस-मेतन्नामकमग्निमुपह्वये आह्वयामि। कीदृशं ? प्रियं देवानां प्रीतिहेतुं। मधुजिह्वं मधुरभाषिजिह्वोपेतं, माधुर्यरसास्वादकजिह्वोपेतं वा। हविष्कृतं हविषो निष्पादकं। ३

२। दयानन्दः.....नराशंसं नरैः रंभितः शस्यते प्रशस्यते, तं सुखसमूहकारकं। नराशंसो यज्ञ इति कात्थक्यः। नरा अस्मिन् आसीनाः शंसन्ति अग्निम् इति शाकपूणिः। नरैः प्रशस्यो भवति। निरु ८।६। इह अस्मद्भोगविषये संसारे, प्रियं प्रीणाति सर्वान् प्राणिनः तं, अस्मिन् प्रत्यक्षे यज्ञ यष्टव्ये उपह्वये उपगतभोगद्योतने उपतापये, मधुजिह्वं मधुरगुण-सम्पादिका जिह्वा ज्वाला यस्य तं, हविष्कृतं हविर्भिः क्रियते तं अत्र वर्त्तमानकाले कर्मणि औणादिकः क्तः प्रत्ययः। ३

३। रमानाथः.....अहं प्रियं देवानां प्रीतिहेतुं मधुजिह्वं मधुरभाषिणं हविष्कृतं हविषो निष्पादकं नराशंसं नरैः स्तूयमान मग्निं इह अस्मिन् यज्ञे उपह्वये आह्वयामि। ३

४। रमेश.....एइ यजन देशे एइ यज्ञे प्रिय मधुजिह्व हव्य निष्पादक नराशंसनामक अग्निके आह्वान करि। ३

५। प्रकृतार्थवाहिनी.....अह मिह यज्ञ-भूमौ अस्मिन् यज्ञे समारब्धे यागे प्रियं सर्वजनप्रियपात्रं मधुजिह्वं मधुरभाषिणं हविष्कृतं हविः सम्पादकं नरेषु आशंसा प्रशंसा यस्य स तं (तनूनपात्, नराशंसश्च अग्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

र्नाम-विशेष इति न। परन्तु विशेषणद्वय मेतत् इति) नराशंस मग्निं भूस्थान-देवताविशेषं भारतवासिनं उपह्वये आह्वयामि। नराग्निपर एव एष मन्त्रः। ३

আমি সর্ব্বজনপ্রিয় মধুরভাষী হবিঃসম্পাদক সর্ব্বজনপ্রশংসনীয় মহর্ষি অগ্নিদেবকে এই যজ্ঞে স্বয়ং উপস্থিত থাকিতে আহ্বান করি। ৩

In this sacrifice I invoke the god (sage) Agni who is beloved, sweet-sounding and the performer of sacrifice and is deserving of the praise of men. 3.

अग्ने सुखतमे रथे देवाँ ईळित आवह।
असि होता मनुर्हितः॥ ४

१। सायणः...... इट्शब्दाभिधेय हे अग्ने! ईळितः अस्माभिः स्तुतः सन् सुखतमे अतिशयेन सुखहेतौ कस्मिंश्चित् रथे देवान् स्थापयित्वा कर्म्मभूमौ आवह। (इट्शब्दाभिधेयत्व मत्र सूचयितुं ईड़ित इति विशेषणं) मनुर्हितः मनुना मन्त्रेण मनुष्येण वा यजमानादिरूपेण हितोऽत्र स्थापितः। त्वं होता देवानां आह्वाता असि। ४

२। प्रकृतार्थवाहिनो....हे अग्न त्वं ईळितः अस्माभिः स्तुतः सन् सुखतमे रथे सुखतमेन रथेन देवान् इन्द्रादीन् आवह आनय; त्वं होता होम सम्पादयिता मनुर्हितः मनुषा वैवस्वतमनुना हितः स्थापितः असि भवसि॥ ४

হে অগ্নে, তুমি আমাদিগের হোতা। তোমাকে বৈবস্বত মনু স্থাপন করিয়াছেন। তুমি আমাদিগকর্ত্তৃক স্তুত হইয়া দেবগণকে সুখজনক রথে আনয়ন কর। ৪

O Agni! being behymned by us bring the gods here in pleasing chariots. You have been placed here by Vaivaswata Manu and you help us in our sacrifice. 4.

स्तृणीत बर्हिरानुषग् घृतपृष्ठं मनीषिणः।
यत्रामृतस्य चक्षणम्॥ ५

१। सायणः.....हे मनीषिणो बुद्धिमन्त ऋत्विजः! बर्हिर्दर्भं स्तृणीत वेदेरुपरि आच्छादयत। अत्रापि बर्हिर्नामकोऽग्निः सूच्यते। कीदृशं? बर्हिरास्तरणीयं, आनुषक् अनुक्रमेण सक्तं परस्परं संबद्धं, घृतपृष्ठं घृत-पूर्णानां स्रुचां बर्हिषि आसादितत्वाद् घृतं पृष्ठं पृष्ठ उपरिभागे यस्य बर्हिषस्तद्-घृतपृष्ठं। यत्र यस्मिन्बर्हिष्यमृतस्यामृतसमानस्य घृतस्य चक्षणं दर्शनं भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

यद्वा मरणरहितस्य देवस्य वर्हिर्नामकस्याग्नेर्दर्शनं भवति, तद्बर्हिः स्तृणीतेति पूर्वेणान्वयः॥ ५

स्वाभिमतम्......अस्मिन् मन्त्रे सायणादयः "घृतपृष्ठं घृतं पृष्ठे उपरिभागे यस्य बर्हिषः" एवं व्याख्यातवन्तः तत् वयं न समीचीनं मन्यामहे।

समिधेव अग्निप्रज्वालनार्थं घृताक्ता भवति न पुनः कुशादिकं। पञ्चनदादिशीतप्रधानदेशे प्रायशः स्थण्डिलादिकं तुषाराच्छादितं बभूव अनावृते तस्मिन् देवाना मुपवेशनं क्लेशकरं स्यात्, तस्मादेव कुशास्तरणप्रसङ्गः। घृतं तुषारः (वरफ) स्नुरिति च।

२। प्रकृतार्थवाहिनी......हे मनीषिणो बुद्धिमन्त ऋत्विजः यूयं घृतपृष्ठं घृतपृष्ठे (विभक्तिव्यत्ययः) घृतेन तुषारेण (वरफेन) उपलक्षितं पृष्ठं उपरिभागो यस्य तादृशे स्थण्डिले वेदेरुपरिभागे इति यावत् आनुषक् अनुक्रमेण परस्पर-सम्बद्धं बर्हिः कुशं स्तृणीत विस्तारयत। यत्र यस्मिन् आस्तीर्णे कुशसंस्तरे अमृतस्य अमरस्य इन्द्रादेः चक्षणं दर्शनं उपवेशनं भवेत्। ५

হে বুদ্ধিমান্ ঋত্বিক্‌সকল, তোমরা বরফসিক্ত [অতএব উপবেশনের অনুপযোগী] বেদীর উপরে কুশ সকল একটীর পর একটী এই ভাবে বিছাইয়া দেও, যেখানে দেবতারা আসিয়া বসিবেন, আমরা দেখিব। ৫

O wise Ritwiks! strew Kusas one after another over the sacrificial altar wet with ice [and thus unfit for being sat upon] where we may have a sight of the immortals. 5.

वि श्रयन्ता मृतावृधो द्वारो देवी रसश्चतः।
अद्या नूनञ्च यष्टवे॥ ६।२४

१। सायणः....द्वारो यज्ञस्य शालाद्वाराणि विश्रयन्तां कपाटोद्घाटनेन विव्रियन्तां। कीदृश्यः? ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य वा वर्द्धयित्र्यः, देवी द्योतमाना असश्चतः असज्यन्त्यः, उद्घाटनेन प्रविष्टपुरुषसङ्गरहिताः यद्वा असश्चतः प्रविष्टपुरुषरहितान् यज्ञगृहान् तत्पुरुषप्रवेशाय द्वाराभिमानिन्यः एतत्संज्ञका अग्निविशेषमूर्त्तयो विश्रयन्तां विशेषेण सेवन्तां। द्वारसेवया तत्र पुरुषप्रवेशेन वा किं प्रयोजनं? इति तदुच्यते—अद्य अस्मिन् दिने नून सवश्यं यष्टवे यष्टुं चकारात् दिनान्तरेष्वपि इति द्रष्टव्यम्। ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

२। प्रकृतार्थवाहिनी. . . . ऋतावृधो यज्ञस्य सम्यक् वर्द्धयित्र्यः असश्चतः असश्चन्त्यः प्रविष्टपुरुषसङ्गरहिताः अतएव संरुद्धा द्वारो देवीः द्वारो देव्यः यागमण्डपद्वाराणि अद्यव यष्टवे यष्टुं यजमानस्य यागकर्म्मणे विश्रयन्ता सुघाटिता भवन्तु ॥ ६।२४

যজ্ঞের সংবর্দ্ধক নির্জ্জন যাগগৃহদ্বারসকল যজমানের যজ্ঞকর্ম্মের জন্য উদ্ঘাটিত হউক। ৬

May the closed and solitary gates of the sacrificial halls, which help the sacrifice, be opened for the sacrifices of the Yajamana. 6.

नक्तोषासा सुपेशसा अस्मिन् यज्ञ उपह्वये।
इदं नो बर्हि रासदे ॥ ७

१। सायणः····· नक्तशब्द उषःशब्दश्च लोके कालविशेषवाचिनी। इह तु तत्कालाभिमानिवह्निमूर्त्तिद्वये प्रयुज्येते। नक्तोषासा नक्तोषोनामिके वह्नि-मूर्त्ती अस्मिन् प्रवर्त्तमाने यज्ञकर्मणि उपह्वये आह्वयामि। किमर्थं? नोऽस्म-दीयमिदं वेद्यामास्तीर्णं बर्हिर्दर्भमासदे आसत्तुं प्राप्तुं। कीदृश्यौ? सुपेशसा शोभनरूपयुक्ते ॥

२। प्रकृतार्थवाहिनी। नः अस्माकम् इदं बर्हिः कुशं कुशासन मिति यावत् आसदे उपवेशनाय आस्तृत मिति शेषः। अहम् अस्मिन् यज्ञे सुपेशस सुपेशसे सुरूपे नक्तोषासा नक्तोषसौ रात्रिम् उषसञ्च उपह्वये आह्वयामि, ते अत्रागत्य अस्मिन् आस्तृते कुशासने उपविशताम्। ७

এই আমরা উপবেশনের জন্য কুশ আস্তৃত করিয়া রাখিয়াছি। আমি এই যজ্ঞে সুরূপা রাত্রি ও উষাদেবীকে আহ্বান করিতেছি, তাঁহারা আসিয়া ইহাতে উপবেশন করুন। ৭

This Kusa-seat of ours has been stretched out for accommodation. I invoke the beautiful gods—night and morning twilight—to come and take their seat here. 7.

ता सुजिह्वा उपह्वये होतारा दैव्या कवी।
यज्ञं नो यक्षता मिमं ॥ ८

१। सायणः······तच्छब्दोऽत्र सर्वनामत्वात्प्रसिद्धार्थवाची। ता तौ याज्ञि-कानां प्रसिद्धौ द्वावग्नी उपह्वये आह्वयामि। नोऽस्मदीयमिमं यज्ञं यक्षतां। तावुभौ यजतामनुतिष्ठतां। कीदृशौ? सुजिह्वा शोभनजिह्वोपेतौ। प्रिय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MID

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

(T)

बाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MID

Acc. No. 3332
Class No 294·59212 Book No UME
Author उमेशचन्द्र
Title... ऋग्वेद संहिता

Due on	Borrower's Name	Returned on

294·59212
UME
3332

महेन्द्र संस्कृत विश्वविद्यालय
बाल्मीकि विद्यापीठ
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

C-0. In Public Domain. Digitization by eGangotri.Funding: MI

Nepal Sanskrit University, Balmeeki Campus, Kathmandu